CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

4.4 NHP

23560
हि. 1204

मेधा

सं श्रुतेन गमेमहि

१९६१ - १९६२

शासकीय दू. श्री वै. संस्कृत महाविद्यालय, रायपुर, मध्यप्रदेश
द्वारा प्रकाशित

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वर्ग संख्या ...... प्राप्ति-संख्या ......

ग्रन्थ-कार्ड

श्री गणेश वर्णी दि० जैन (शोध) संस्थान

ग्रन्थागार

नरिया, वाराणसी-५

ग्रन्थ नाम मेधा - शोधपत्रिका

लेखक सं० १, भा० १-२, १९६५-६२

लेनेवाले का	देनेकी	लेनेवालेका	लौटानेकी

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पि. १३०४
२३ ६८

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मेधा

With compliments..................
....................................The Editor.

शासकीय दू. श्री वै. संस्कृत महाविद्यालय, रायपुर
की

शोध-पत्रिका

ग्रंथसंख्या-१ जुलाई १९६१ – अप्रैल १९६२ भाग-१ तथा २

संपादक : डॉ. श्रीनाथ हसूरकर

सं श्रुतेन गमेमहि

शासकीय दू. श्री वै. संस्कृत महाविद्यालय, रायपुर, मध्यप्रदेश
द्वारा प्रकाशित

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शासकीय दू. श्री वैं. संस्कृत महाविद्यालय, रायपुर की ओरसे
डॉ. श्रीनाथ हसूरकर द्वारा प्रकाशित.

श्री. पां. ना. बनहट्टी,
व्यवस्थापक, नारायण मुद्रणालय, नागपुर द्वारा मुद्रित.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मेधा

शासकीय दू. श्री वै. संस्कृतमहाविद्यालय, रायपुर,
की
शोध-पत्रिका

ग्रंथसंख्या-१ जुलाई १९६१-अप्रैल १९६२ भाग-१ तथा २

विषयानुक्रमणिका

	विषय	लेखक	पृष्ठांक
१	भट्टहेमाद्रे रघुवंशदर्पणः।	श्री. रेवाप्रसाद द्विवेदी	७
२	भामह-संमत-काव्यस्वरूपानुसंधानम्।	श्री. रामनिहाल शर्मा	४४
३	स्याद्वाद-मञ्जरी-विधूननम्।	श्री. राजेन्द्र चौधरी	५४
४	चतुर्दशनिरुक्तानां तत्कर्तॄणाञ्च स्वरूपविवेचनम्।	श्री. केशवप्रसाद मिश्र	७८
५	पाणिनीयप्लुतविमर्शः।	श्री. कृष्णशास्त्री कानिटकर	९०
६	धातु और आख्यात।	श्री. रामनंदन ओझा	१०५
७	अपभ्रंश-कथाकाव्य का ऐतिहासिक विकास।	श्री. देवेन्द्रकुमार जैन	११४
८	छत्तीसगढ़ की जनपदीय शब्दावली।	श्री. कान्तिकुमार	१३५
9	Vedānta-Sarva-Saṁgraha of Yajñeshwar : A Doctrinal Study-	Dr. S. S. Hasurkar	142
10	A Study in The Evolution of Nationalism in Midde East-	Shri. Sinha.	149

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मेधा का यह प्रकाशन शासकीय दू. श्री संस्कृत महाविद्यालय, रायपुर के मूल उद्देश्योंमें से अन्यतम की पूर्ति है ।

एतदर्थ यह महाविद्यालय शिक्षा–विभाग, मध्यप्रदेश–शासन का अत्यन्त उपकृत है ।

मेधा का यह प्रथम अंक भगवती विश्वमेधा के प्रति श्रद्धा-पूर्ण प्रथम अर्घ्य के रूप में समर्पण करते हुए यह संकल्प करता है—

मेधां सायं मेधां प्रातर्मेधां मध्यंदिनं परि ।
मेधां सूर्यस्य रश्मिभिर्वचसा वेशयामहे ॥

(मेधा–सूक्त, ६ काण्ड, अथर्ववेद)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



१—क–प्रतिः (सर्गः १२)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मेधा

१९६१ — १९६२

भट्टहेमाद्रे रघुवंशदर्पणः

श्रीरेवाप्रसादद्विवेदी

कालिदाससाहित्यस्य गाम्भीर्यमुद्रां विश्लेष्य ततोऽर्थकात्स्न्र्यमधिजिगमिषुरहं विद्वदुपदेशेनैकं १२५० पृष्ठात्मकं नामाख्यातोपसर्गनिपातानां प्रत्येकं समासव्यासाभ्यां यथामूलं पृथङ्निर्देशेन समस्तसन्दर्भोत्तरं 'कालिदास–शब्दानुक्रमः' इति नाम्ना शब्दानुक्रमकोषं (word index) ई० १९५८ संवत्सरे काश्यामरचयम्। एतत्साह्येनापि व्यापृतो महाकवेरन्तरङ्गं स्प्रष्टुमनीशानः प्रकाशितान् व्याख्याग्रन्था-नवाश्रयम्। तत्रापि मेघदूतादन्यत्र कुत्रापि काव्ये सञ्जीविनीप्रभृतीः पञ्चषा एव व्याख्या ऋते काश्चनापि तदितराश्चतुः–पञ्चाशदधिका व्याख्या अप्रकाशतया प्रकाश्यापि वा पारेमुद्रणतया दुर्लभा वीक्ष्य तत्संपादनाय कृतमतिः सारस्वतदधीचिभिः श्रीमद्भिर्वासुदेवशरणाग्रवालैर्भट्टश्रीहेमाद्रे रघुवंशदर्पणे न्ययोजिषि। अत्र च व्यापृतः ६०–६१योर्मध्ये पुष्कलां सामग्रीमवाप्नवम्। विद्वत्प्रीतयेऽत्र तामेव लेशत उपच्छन्दयामि।

पाण्डु–ग्रन्थाः

रघुवंशदर्पणस्य चतुर्दश पाण्डुग्रन्थानहं सूचितः। तेषु दश ग्रन्थाः सम्यगनुशीलिताः प्रतिलिप्ताश्च यथायथम्। तेषां विवरणमत्र प्रस्तवीमि—

(१) **क-प्रतिः**। प्रतिरियं पुण्यपत्तन(पूना)स्थभण्डारकरप्राच्यविद्याशोधसंस्थानतः सांप्रतं कीर्तिशेषैः श्रीमद्भिर्गोडेमहोदयैः प्रेषिता। तत्र संस्थानेऽस्याः क्रमाङ्काः '४७।१८७३–४' सन्ति। अस्या लिपिः प्राचीना नागरी। पञ्चमात् सर्गादारभ्य १८५ पत्रेषु १९ सर्गस्य ५२ पद्यांशं यावत् स्थिता। अन्तिमस्य पत्रस्य लोपात् अन्तिमानां ५।। पद्यानां दर्पणोऽत्र खण्डित एव। मध्ये सर्वाण्यपि पत्राण्यनुपप्लुतानि सन्ति। अन्तिमस्य पत्रस्याभावात् पुष्पिका, लिपिकृतो देशकालाख्याश्च नाप्यन्ते। पत्राणां परिणतेः प्रतिरियं ४५० वर्षदेशीया प्रतीयते। ५–१९सर्ग यावत् सर्गपुष्पिका प्रतिसर्गमेकरूपैवं स्थिता—'**इति श्रीमदीश्वरसूरिसूनुभट्टहेमाद्रिकृते रघुवंशदर्पणे [अमुकः] सर्गः**'

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लिपिकरोऽस्याः प्रतिपदं प्रमाद्यति । पद्यान्तरेषु पद्यान्तराणामंशान् मेलयति । केषाञ्चन पद्यानां व्याख्यानं त्यजति, केषाञ्चन चांशत एव लिखति । तथासौ प्रमाद्यति यथा ६।७६–स्थं वाणिनीं पाणिनिं करोति । प्रतिरियं यैः पठिता तैरपि पत्रपार्श्वे पङ्क्तिसंख्याप्रतीकेन टिप्पनकैर्योजिता । तानि च पुनरुक्तिभूयिष्ठान्यपि क्वचन ग्रन्थविलोपं परिहरन्ति ।

पञ्चमसर्गारम्भे 'ॐ नमः श्रीगणेशाय' इति मङ्गलं '१' इति च पत्रसंख्या 'प्रतिरियं पञ्चमादेव सर्गादारब्धेति प्रमाणयतः । अस्या आदर्शतमं पत्रं प्रथमे फल्के चित्रितं पश्यन्तु ।

(२) ख-प्रतिः । इयं गुर्जरराजधान्या अमदाबादतो मुनिवर्यैः श्रीपुण्यविजयैः प्रेषिता । इयमपि पञ्चमादेव सर्गादारभ्यते । ततश्चान्तिमं सर्गं यावद् विद्यते । भगवदनुकम्पयाऽन्तिमस्य सर्गस्य टीकान्तपुष्पिकापि सुरक्षितास्ति । मध्ये कतिपयानि पत्राण्यलिखितानि सन्ति । तेषु तु केचनांशास्त्यक्ता एव, षष्ठस्य सर्गस्य तृतीयं पद्यमादाय अष्टमस्य सर्गस्य द्वितीयं पद्यं यावदपि त्यक्तमस्ति । एकस्मिन्नेव पत्रे षष्ठसर्गस्य द्वितीयाद् श्लोकात् परमानन्तर्येणैवाष्टमस्य सर्गस्य तृतीयः श्लोको व्याकृतो लिखितः । नूनमसौ लेखकस्यैव प्रमादः । प्रतिश्चेयं यस्मात् पत्राद् आरब्धा तत २७ तमं पत्रं यावत् पत्रसंख्या न सन्ति । २८ तमे पत्रे २८ अङ्को दृश्यते । ततः प्रथमे पत्रे केनचिदाधुनिकेन '१४' इति पत्राङ्को दत्तः । न चात्र मङ्गलमपि लभ्यते । नापि चेयमारम्भतोऽन्ततो मध्यतः पार्श्वतो वा लेशायापि त्रुटिता । उद्देहिकादंशस्तु कतिपयेषु पत्रेषु लभ्यते, किंतु पत्राणां संघर्षादिजन्यो गात्रोपघातो नास्ति । अतः पूर्वतनेषु १३ पत्रेषु चतुर्थस्यापि सर्गस्य दर्पणो लेखकेनावश्यमस्यां लिखितः स्यात् । स तु संग्राहकेण भिन्नेनापि वा केनचित् पुस्तान्तरे संदानितः । प्रतिरियं '१६६८' वि० संवत्सरस्य वैशाखकृष्णद्वितीयायां गुरौ वासरे पूर्णा । लेखकस्य तु तत्र नाम नास्ति । यस्याः प्रतेरियं प्रतिलिपिस्तस्यास्तु पूर्णं विवरणं लेखकेन लिखितम् । द्वितीये फल्के तत् सर्वमपि यथामूलं भवन्तः पश्येयुः । तत्र—

'संवत्सप्ताग्निभूपेऽब्दे द्विपूर्णशरभूमिते ।
शाके च कार्तिके मासि सिताष्टम्यां रवेर्दिने ॥
गोपीनाथोद्धवौ भैमीसेवकौ रामरुद्रयोः ।
हैमाद्रं रघुवंशस्यालिखतां भाष्यमुत्तमम् ॥युग्मम्॥' इति दृश्यते ।

तत्र भूपशब्दो ज्यौतिषे १६ संख्याप्रतिपादकत्वेन प्रथितः । अतः विक्रमस्य १६३७ संवत्सरः शकस्य च १५०२ संवत्सरः स्थिरीभवति । तत्र लेखकौ द्वौ (१) गोपीनाथः (२) उद्धवश्च । तयोरेकतरः [प्रायेण गोपीनाथः] द्वादशं सर्गं यावदलिखदिति तत्सर्गान्तपुष्पिकातः प्रतीमः । सा चैवम्—

'इति श्रीमदीश्वरसूरिसूनुभट्टहेमाद्रिकृते रघुवंशदर्पणे रावणवधो नाम द्वादशः सर्गः' ॥

"श्रीरामनारायणवासुदेव गोविन्द वैकुण्ठ मुकुन्द कृष्ण ?
श्रीकेशवानन्त नृसिंहविष्णो मां त्राहि संसारभुजङ्गदष्टम् ॥१॥

अहं करोमि त्वमपाकरोषि पापानि कर्माणि सदैव विष्णो ।
बालो यथा पङ्कयते शरीरं पुनः पुनः क्षालयते च माता ॥२॥

त्वमेव माता पिता त्वमेव भ्राता सखा त्वमेव काय्ये च बहुरदकनागा "॥

प्रतिरियं नागराक्षरैरेवाङ्किता १२८ पत्रात्मिका चास्ति । तत्र ४० तममपि पत्रं ३९ अङ्केनाङ्कितं कृत्वा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रघुवंशदर्पण:



२—ख–प्रति: (सर्ग: १९)

रघुवंशदर्पण:



३—ख–प्रति: (सर्ग: १९)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रघुवंशदर्पणः



४—ग–प्रतिः (सर्गः १२, १३)

रघुवंशदर्पणः



५ — ग–प्रतिः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ततः परं ४१ पत्रे '४०' इति ४२ पत्रे '४१' इति क्रमेण प्रतिपत्रमेकोनः संख्यांको दत्तोऽस्ति। अतः चरमतमे पत्रे १४१ इति स्थाने १४० अङ्को भ्रान्त एव। अस्या आदर्शभूता प्रतिरपि मध्येऽव्यक्ताक्षरा त्रुटिताऽलिखिता वाभूदिति प्रतीयते। तृतीये फल्के तत् स्पष्टमेव दृश्यते।

(३) ग-प्रतिः। प्रतिरियं मद्रपुर्या (मद्रासस्य) अड्यारसंस्थातः माइक्रोफिल्मरूपेण प्राप्ता। अस्यास्तत्रत्यो ग्रन्थक्रमाङ्कः ८९१ अस्ति। इयमपि पञ्चमादेव सर्गादारभ्यते, समाप्यते चाष्टादशे सर्गे। मध्ये ५६, ७३, ९९–१०३, १०५, १०९–११, ११८–१३४, १४५–१४८, १५४–१५७, १९०, १९१ पत्राणि लुप्तानि। आरम्भः क-प्रतेरेव यथा 'ॐ नमः श्रीगणेशाय' इति मङ्गलवाक्याद् भवति। प्रतिसर्गे पुष्पिका सैव स्थिता या कख-प्रत्योः प्राप्ता। अष्टादशसर्गस्य ५१ तमपद्यांशं यावदेव स्थितेः प्रतेरपूर्णत्वात् समयादिकं ज्ञातुमशक्यम्। प्रतेः स्थित्या पत्राणां च वार्धक्येनोन्नीयते यदियं ५५० वर्षाणि प्राचीना स्यात्। एतदर्थं पत्रकमेकं स्वस्वरूपेण चतुर्थे फल्के चित्रितं पश्यन्तु।

अष्टादशस्य सर्गस्य चरमतमौ श्लोकौ कख-प्रतितो भिद्येते। तथा हि पञ्चाशत्तमस्य श्लोकस्य व्याख्या—

'न केवलमिति। अल्पे काले गच्छति तस्यावयवा एव न केवलं वृद्धिं प्रापुः किन्तु वंश्या गुणा शौर्यादयोऽपि आरम्भसमये सूक्ष्मफले शक्ता अत एव लौकिकैरभिलषितं पृथुत्वम्। खलु वाक्यालङ्कारे। सूक्ष्म आरम्भो येषामिति विशेषणं विशेष्यभावप्रयोक्तुराशयत्वात् सूक्ष्मस्य परप्रयोग इति केचित्। कम् कान्तौ कान्तिरिच्छेति क्षीरतरङ्गिणी[1] ।।४९।।' क प्रतौ तु—

'न केवलमिति। काले गच्छति सति सुदर्शनस्य शरीरावयवा। केवलं विशिष्टां विवृद्धिं न ययुः वंशे भवा वंश्या गुणाः खल्वपि प्रथिमानमापुः। पृथोर्भावः। पृथ्व्यादिभ्य इमनिच्। रऋतोर्हलोघे-र्लघोः। लोकस्य कान्ताः प्रियाः। प्रारम्भे सूक्ष्मा अवयवा अपि ।।५०।।'

खप्रतौ च 'लोके' इत्यतः पूर्वम्-'असति' इति पदं दृश्यते, विवृद्धिमित्यस्य स्थाने वृद्धिमिति च। अन्यत् सर्वं क प्रतितोऽभिन्नम्। अङ्कोऽपि '५०' एव।

एकपञ्चाशत्तमस्य व्याख्या चैवम्—

'स इति। स तिस्रो विद्या त्रयीवार्तादण्डनीति(ती)र्गुरूणामक्लेशकर एव जग्राह, उपदेश-मात्रेणाबुद्धेत्यर्थः। जन्मान्तरे दृष्टं पारं × × × ×।।' कप्रतौ तु—

'स इति। स सुदर्शनः पूर्वाणि च तानि जन्मान्तराणि तेषु दृष्टं पारं यासां ता आन्वीक्षिकी त्रयी वार्ताः तिस्रो विद्याः स्मरन्निव जग्राह।—००००।'

ख प्रतावप्येषैवमेवस्थिता।

एकोनपञ्चाशत्तमस्य श्लोकस्य व्याख्या तु कख-प्रतितः कार्त्स्न्येन संगच्छते। अतोऽष्टादशस्य सर्गस्य अन्तिमौ द्वौ श्लोकौ दर्पणेतरव्याख्याकावेवेति निश्चितम्। अत्रैव च प्रतौ महोपाध्याय-श्रीकृष्णभट्टविरचिताया रघुवंशदीपिकाया अपि चतुर्थसर्गान्तपत्रं संलग्नमस्ति। तन्मुद्रा पञ्चमे फल्के दृश्या।

---

१ अंशा इमे यथामूलमेव प्रत्यक्षरमुद्धृताः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(४) घ-प्रतिः । प्रतिरियं मद्रपुर्या अड्यारसंस्थाया एव माइक्रोफिल्मरूपेण प्राप्ता । तत्रास्या ग्रन्थक्रमाङ्कः ८९८ अस्ति । स्पष्टनागराक्षरेयं प्रतिः नितरां महत्त्वपूर्णा भ्रामिका चास्ति कल्कत्तास्थ–एशियाटिकसोसाइटीमृतेऽन्यत्रानुपलभ्यस्य तृतीयसर्गदर्पणस्यात्र तत्संस्थायाः सूचीपत्रानुसारम् अंशतोऽस्तित्वादस्या महत्त्वम्, पञ्चदशतः एकोनविंशं सर्गं यावद् व्याख्याया दर्पणेतरत्वेऽपि तत्साधकाभावाद् भ्रामिकात्वं च । तृतीयसर्गस्य षष्ठस्य पद्यस्यांशमादाय द्वादशं पद्यं यावदक्षता, त्रयोदशस्य पद्यस्यान्तिमम्ंशमादाय २१ पद्यस्यान्तिमादंशात् पूर्वं क्षता, ततः २८ पद्यं यावदक्षता, २९ पद्यस्यान्तिममंशमादाय सर्गान्तं यावच्च क्षतास्ति ।

चतुर्थः सर्गः प्रतावस्यां नास्ति । पञ्चमस्तु सर्गः पञ्चमस्य श्लोकस्य 'कुशाग्रीयमतिः प्रोक्तः सूक्ष्मदर्शी च यः पुमानि'ति हलायुधः'—इति क प्रतिस्थाया दर्पणपङ्क्ते 'पुमानिति हलायुध' इत्यंशतः पूर्वं त्रुटितः । तत ऊर्ध्वमपि केवलं ५३ तमस्य पद्यस्य 'अथेति । अथ भावोपनतैः दिव्यमहिमसंपन्नैः कल्पद्रुमैः पुष्पैः सुरतरुः' इत्यंशतः परं नास्ति । मध्येऽपि भूयानंशः प्रायेण त्रुटित एव । षष्ठः सर्गः 'अवन्तिनाथोऽयमुदग्रबाहु'रित्यत आरम्य ७८ तमं पद्यं यावदेवास्ति । मध्ये कीटदष्टः, अस्पष्टाक्षरः, कतिपयपत्र विकलः च विद्यते । प्रत्यन्तरेभ्यः संवादोऽस्य दर्पणत्वे प्रमाणम् । सप्तमः सर्गः द्वादशपद्यादारभ्य खण्डितमध्योऽतं यावदवस्थितः । तत्र कख-प्रतिस्था सर्गान्तपुष्पिकापि लभ्यते । अष्टमोऽपि सर्गः ७६ तमात् पद्यादारम्य पूर्णोऽस्ति । पुष्पिका च दृश्यते । नवमः सर्गः पूर्णो लभ्यते । पुष्पिकापि तत्रास्ति । दशमः सर्गः ४३ तमं पद्यपर्यन्तमेवास्ति । ४४ तमस्य पद्यस्य वैमानिका इति प्रतीकमात्रं दृश्यते । दर्पणत्वं त्वस्यासंदिग्धम् । एकादशः सर्गः–" दीर्घतमानाम् आर्षेयः प्रवरो भवतीति आश्वलायनी तु दीर्घातपसामिति पाठः । त्रयमपि प्रमाणमार्षत्वात् । प्रवरमञ्जर्यां तु भृगुगणव्याख्याने पुरुषोत्तमश्च एकदेशविकृतमनन्यवदिति न्यायादिति ॥३३॥"— इति ३३ तमस्य पद्यस्येयन्तमंशमादाय आरब्धः ९१ पद्यांशेन समाप्यते । पुष्पिकाया अभावेऽपि दर्पणत्वमस्य निश्चितम् । साधयामीति पद्यस्य व्याख्या कख-प्रत्योर्व्याख्यया ऽक्षरशः सङ्गच्छते । द्वादश-त्रयोदश-चतुर्दशा न सन्ति । पञ्चदशस्तु सर्गस्तृतीयस्य श्लोकस्यांशादारम्य समाप्तिं यावदुपलभ्यते । षोडशस्तु सर्गः तृतीयस्य श्लोकस्यान्तं यावदेवास्ति । सप्तदशो नास्ति । अष्टादशः ३७ तमस्य पद्यस्यांशादारम्यान्तं यावदुपलभ्यते । एकोनविंशः पूर्णः एवास्ति ।

अस्यां प्रतौ स्थितस्तृतीयः सर्गो दर्पणो नास्ति । दर्पणस्य संक्षेपः, सूत्ररूपं किंचिद्व्याख्यानान्तरं वैतत् संभवति । कल्कत्तातः प्राप्तायाः इह ञ-प्रतित्वेन दत्तविवरणायाः पुष्पिकासहितायाः प्रतेः प्रागुपदर्शितांशमात्रात्मिकाया अस्याः प्रतिपदं विसंवादात् । तथाहि – 'निधानगर्भामिव सागराम्बरामित्यादि' पद्यस्य अड्यारप्रतिस्थं व्याख्यानमेवमस्ति—'निधानेति । नृपः प्रियां ससत्त्वां सगर्भामबुद्ध । निधानगर्भां भुवमिति प्रियत्वोक्तिः । मध्ये लीनोऽग्निर्यस्यास्तां शमीमिवेति तेजस्वितोक्तिः । शमी तरुभेदः, गूढजलां सरस्वतीं नदीमिवेति पावनत्वोक्तिः । सरस्वत्या ऊर्ध्वे वालुका अन्तर्जलमिति च वार्ता । साकरां धरामिति पाठे आकरः खनिः । अन्यः सागरा अम्बरं यस्याः विशेषणवलाद् भुवः प्रतिपत्तिः ॥८॥'
कल्कत्ताप्रतौ पुनरेवमेतत्–' निधानगर्भेति । निधानं गर्भे यस्यास्तां सागराम्बरां भूमिमिवेति प्रियत्वोक्तिः । भूतधात्री रत्नगर्भा विपुला सागराम्बरेस्यमरशेषे । अत्र पृथिव्या विशेषणमात्रेणैवालम् (त्रमेवालम्) तथा वामनः–' विशेषणप्रयोगो विशेष्यप्रतिपत्तौ जातायां विशेषणमात्रस्यैव प्रयोगः [अव्यक्तम्] अभ्यन्तरे लीनः पावको यस्यास्तां शमीमिवेति गर्भस्य तेजस्वितोक्तिः । अन्तः सलिलं यस्यास्तां सरस्वतीं नदीमिवेति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



६— घ–प्रतिः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पावनत्वोक्तिः [अव्यक्तम्] ॥ चा' एवमेव 'समुद्गतो वारणदन्तकोशयोर्बभार कान्ति गवलापिधान-योरिति पाठान्तरं-दिनेषुगच्छत्सु नितान्तेत्यादिपद्यस्योत्तरार्धं कल्कत्ता प्रतौ दत्तम्, तथैव निर्णयसागर-प्रतावपि। अड्यारप्रतौ तु क्रमेण निस्तीर्येति पद्यस्य व्याख्यायाम्। किं च इयमपि च व्याख्या— 'शरीरे'ति प्रतीकादुपात्ता। एवमिह विष्णुपुराणादीनां-सर्वेषामेव दर्पणोद्धृत प्रमापकाणामस्तित्वेऽपि संस्थानविषयप्रतिपादनप्रामाण्यविसंवादाद् दर्पणाद्भिन्नमेवैतदिति निश्चितम् ॥

महता खेदेन प्रतिपादयामो यदस्यां प्रतौ स्थिताः '१५, १६, १८, १९' इत्येतेऽपि चत्वारः सर्गा दर्पणतया ख्यापिता अपि दर्पणात् सर्वथैव भिन्नाः। तदत्रापि कानिचित् प्रमाणानि प्रदीयन्ते—

प्रथमं प्रमाणं त्वेतदेव यदेषामन्तो लभ्यते, दर्पणस्य कखग-पुस्तकेषु निर्व्यभिचारं स्थिता पुष्पिका तु न। 'पञ्चदशः सर्गः' 'अष्टादशः सर्गः' 'एकोनविंशः सर्गः' इत्येतावन्मात्रं लभ्यते। एकोनविंश-सर्गान्ते या पुष्पिका लभ्यते तां प्रतिच्छायरूपेण षष्ठे फलके, स्पष्टञ्चाधस्तात् पश्यन्तु—

[का]व्ये श्रीकालिदासकृतौ एकोनविंशतिमः सर्ग्रः(र्गः) समाप्तः। शुभं भवतु। संवत् १६१० वर्षे अश्वन (आश्विन) मासे शुक्लपक्षे दशम्यां तिथौ रविवासरे षटपदज्ञाति महसूरा सुत लिलाधर सुत विणायगेनेदं पुस्तकमलेखि अलिखत्। आत्मपठनार्थं परोपकारार्थं च। श्रीरस्तु। यादृशं पुस्तके दृष्टं तादृशं लि[खि]तं मया। यदि शुद्धमशुद्धं वा मम दोष(षो) न दीयताम् ॥ श्रीरस्तु। श्री श्रीकालिदास-चरणकमलेभ्यो नमः ॥ छ ॥ छ ॥

द्वितीयं च प्रमाणं प्रत्यन्तरविसंवादः। तथाहि—पञ्चदशस्य सर्गस्यान्तिमोंऽशोऽस्यां प्रतावेवं स्थितः—

"निर्वर्त्येति। सुग्रीवादिषु देवाङ्गेषु प्राप्तनिजब्रह्मलोकादनन्तरं स्वां स्वां योनिमनुप्रविष्टेषु रु(ऋ)क्षवान(र)राक्षसेषु रामायणमुपसंजिहीर्षुराह—विष्वक्सेनो भगवान् असौ सकलजगदाधारभूतां स्वतनुं निजतनुमविशत् विवेश। किं कृत्वा? एवममुना प्रकारेण सुराणां कार्यं निर्वर्त्य रावणवध-लक्षणमभयप्रदानं संपाद्य। किं भूतं कार्यम्? दशमुखभयोच्छेदि रावणवधभयोच्छेदकम्। किं भूतां स्वतनुम्? सप्तलोकप्रतिष्ठां सप्तलोकेषु भूर्भुवःस्वर्लक्षणेषु प्रतिष्ठा यस्याः सा ताम्। किंकृत्वा? दक्षिणे उत्तरे च गिरौ यथाक्रमं लङ्कानाथं विभीषणं पवनतनयं हनुमन्तं च उभयं स्थापयित्वा। उत्प्रेक्षते कीर्तिस्तम्भ-द्वयमिव कीर्तिस्तम्भभूतौ निवेश्य ताभ्यां तेन तुष्टौ नाम **स्वमदायि** इति भावः। पञ्चदशः सर्ग्रः(र्गः) ॥ श्री ॥ छ ॥"

क-प्रतौ तु दर्पण एवंरूपः—

'निर्वर्त्ये'ति। रामायणमुपसंजिहीर्षुराह—विष्वक्सेनो विष्णुः रामः सुराणां दशमुखात् भयं तस्यच्छेद एव कार्यम् एवं निर्वर्त्य कृत्वा सप्तलोकाः प्रविष्टा यस्यां ताम् स्वतनुं स्वमूर्तिमविशत्। दक्षिणे गिरौ वसुवेलाद्रौ उत्तरे गिरौ च गन्धमादनाद्रौ। पूर्वादित्वात्स्मिन्विकल्पः। कीर्तिस्तम्भद्वयमिव उभयं स्थापयित्वा लोक(लङ्का)नाथं विभीषणं पवनतनयं हनूमन्तं च ॥ इति श्रीमदीश्वरसूरिसूनुभट्टहेमाद्रिकृते रघुवंशदर्पणे पञ्चदशः सर्गः ॥' खप्रतौ—'रामायणमि'त्यत्र 'रामायणार्थ'मिति पाठः। 'भयं तस्य छेद एव कार्यम् एवम्' इत्यस्य स्थाने 'छेद एव'मिति पाठः, सप्तलोकाः प्रविष्टा यस्यामित्यस्य स्थाने

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सप्तलोकाः प्रति यस्यास्तामिति, लोकनाथमित्यस्य स्थाने लङ्कानाथमिति, पञ्चदशः सर्ग इत्यस्य स्थाने स्वर्गारोहणो नाम पञ्चदशः सर्ग इति च पाठो दृश्यते। आनुपूर्वी तु सैव।

अड्यारस्य ८९१ प्रतावपि अस्य श्लोकस्य व्याख्या एवमेवास्ति। पुष्पिका च तथैव वर्तते। केवलं रामायणार्थमिति प्रतिष्ठा यस्यास्तामिति च कप्रतेर्भेदः। ख प्रतेस्तु तदभिन्नम्।

षोडशस्य सर्गस्यारम्भिकाः २॥ श्लोका एव सन्ति। तत्र दर्पणाद् भिन्नत्वमक्षरशो दृश्यते। तथा हि—

'श्रीरामाय नमः। रामायणादधिकमर्थमागमान्तरप्रसिद्धं सर्गचतुष्टयेन वर्णयितुमाह—अथेति। अथ रामभद्रस्य स्वस्थानप्राप्तेनन्तरं लवतक्षपुष्करांगद-चन्द्रकेतु-शत्रुघाति-सुबाहवो रघुप्रवीराः सप्त रघुश्रेष्ठाः रघुसूनवः कुशं रत्नविशेषभाजं चक्रुः। 'जातौ जातौ यदुत्कृष्टं तद् रत्नमभिधीयते'। रत्नविशेषं भजते सः किंभूतं कुशं पुरोजन्मतया ज्येष्ठं प्रथमजन्मतया वृद्धं गुणैश्च वृद्धम्। न चैतच्चित्रम्। एषां सौभ्रात्रं [सु]भ्रातृत्वं कुलकुलमनुसरत्ये (कुलमनुसरत्ये)वं—शीलम्। ज्येष्ठानुवृत्तित्वमेषां प्रबन्धानुगतम्। सुभ्रातुः कर्म सौभ्रात्रम्। युवादित्वादण्॥१॥

ते सेत्विति। ते भ्रातरः अन्योन्यदेशप्रविभागसीमां परस्परविषयविच्छेदमर्यादां न व्यतीयुः न व्यतिचक्रमुः। किं भूतास्ते? सेतुवार्तागजबन्धमुख्यैः कर्मभिरभ्युच्छ्रिता अपि। सेतुः क्रयो विक्रयश्च, वार्ता पशुपाल्यं कृषिवाणिज्यम्, गजबन्धनं वारी यत्र इभा बध्यन्ते, तन्मुख्यैः कर्मभिः व्यापारैर्वर्द्धिता अपि निजनिजसीमां नात्याक्रमन्। के[इ]व? समुद्रा इव यथा समुद्रा वर्द्धिता अपि वेलां नातिक्रामन्ति। सीमामिति डाच्। ताभ्यामन्यतरस्यामिति॥२॥

'चतुर्भुजांशेति। तेषां कुशादीनां चतुर्भुजांशप्रभवो रामादि प्रभवो वंशः अष्टधा भिन्नः अष्टभिः प्रकारैः पृथग्भूतः सन् विप्रससार विस्तारं प्राप्तः। चतुर्भुजांशप्रभव इति कोऽर्थः चतुर्भुजः कृष्णः। तस्यांशा रामादयः प्रभव उत्प [× × ×]'

एतेषामेव 'क' प्रतौ दर्पण एवंस्थितः—

'इदानीं रामायणादधिकमर्थमागमान्तरसिद्धमर्थं सर्गचतुष्टयेनाह—अथेति। अथ इतरे लव-तक्षक-पुष्कर-अंगद-चन्द्रकेतु-शत्रुघाति-सुबाहवो सप्त रघुप्रवीराः पुरोजन्मतया अग्रजन्मत्वेन ज्येष्ठं कुशं रत्नविशेषभाजं चक्रुः। अतिशयेन वृद्धः प्रशस्यो ज्येष्ठः। हि यस्मादेषां सौभात्रं कुलानुसारि। सुभ्रातॄणां भावः कर्म वा। युवादित्वादण्॥१॥

अत्र ख प्रतौ सिद्धमर्थमित्यस्य स्थाने प्रसिद्धमर्थमितिपाठः।

ते इति। कुशाद्याः अन्योन्यस्य परस्परस्य देशानां प्रविभागसीमां समुद्रवेलामिव न व्यतीयुः। इण् गतौ। सीमामिति डाबुभाभ्यामिति डाप्। अबन्ध्यैः सफलैः कर्मभिः अभ्युच्छ्रिता अपि। सेतुः तडागादिबन्धः, प्रवहणादि क्रिया [क्रयो] विक्रयश्च, वार्ता कृषिगोरक्षादि, 'वार्ता कृष्याद्युदन्तयोः गजानां बन्धो रोधः, ते मुख्या येषां तानि। सेतुः कोषविवृद्धिः स्याद् वार्ता वृत्त्युपजीवनम्। गजबन्धः कूटयुद्धमित्येके। कृषिर्वणिक्पथो दुर्गं सेतुः कुञ्जरबन्धनम्। खन्याकर धनादानं शून्यानां च निवेशनम्। अष्टवर्गमिमं साधुः स्तब्धवृत्तिर्विवर्द्धयेदिति—कामन्दकः॥२॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

खप्रतौ स्तब्धेत्यस्य स्थाने स्वच्छेति पाठः ।

चतुर्भुजांशेति । चतुर्भुजस्य विष्णोः अंशात् प्रभवति स, तेषां कुशादीनां वंशं (शः) अष्टधा प्रससार । साम योनिः यस्य स सुरद्विपानां । दिग्गजानां वंश इव । सामयोनित्वं सुरद्विपानां प्राक् [६।२७, १०।२३] उक्तम् । दीयत इति दानं धनम् । दानप्रवृत्तेः सकाशादविरतानाम् । उभय-विशेषणम् । 'दानं गजमदे त्यागे' इति वैजयन्ती ॥३॥

खप्रतौ तु सामयोनित्वमित्यस्य स्थाने मामयोनित्वमिति, प्रागुक्तमित्यस्य स्थाने च प्रयुक्तमिति, प्रमादलिखितं दृश्यते । वैजयन्ती स्थले च 'विश्व' इति प्राप्यते ।

अष्टादशसर्गस्यान्तिमश्लोकव्याख्या—

प्रतिकृतीति । राज्ञां कन्या नृपपुत्र्यः श्रीभुवावधिविविदुः सपत्नीके चक्रुः, राजलक्ष्मीवसुधे सपत्नीके चक्रुरिति वाक्यार्थः । किंभूते श्रीभुवौ ? प्रथमपरिगृहीते प्रथममेव स्वीकृते पूर्वं भूपतिः श्रीपतिश्च, पश्चात् कन्यापतिः । अतः सपत्नीराजक (?) नीताः । किंभूता राजकन्याः । प्रतिकृतिरचनाभ्यः प्रतिबिम्बरचनाभ्यः समधिकतररूपाः समधिकतरं रूपमाकारो यासां ताः । तैः पटादौ प्रतिबिम्बं लिखित्वा दर्शिताभ्यः किंभूतैरमात्यैः शुद्धसंतानकामैः शुद्धं संन्तानं कामयन्ते शुद्धसन्तानकामास्तैः । इत्यष्टादशः सर्ग्र(र्गः) ॥ छ ॥ श्रीः ॥

'क ख' प्रत्योस्तु—

प्रतिकृति । तस्य यूनः सुदर्शनस्य शुद्धसन्तानकामैः अमात्यैः आहृता राजकन्याः प्रथमपरिगृहीते अङ्गीकृते श्रीभुवौ अधिविविदुः । अधिवेदनं भार्यान्तरपरिग्रहः । सपत्नीवत्यौ चक्रुरित्यर्थः । दूतैः संदर्शिताभ्यः पाठादिषु (पटादिषु) प्रतिकृतीनां प्रतिबिम्बानां रचनाभ्यः समधिकृतरं रूपं यासां ताः ॥ इति श्रीमदीश्वरसूरिसूनुभट्टहेमाद्रिकृते रघुवंशदर्पणे वंशानुक्रमणो नामाष्टादशः सर्गः ॥

एवमेव 'अनश्नुवानेने' त्यनुपदमेवोदाहृतं यत् पद्यं क–ख–ग प्रतिषु अक्षरशः सङ्गच्छते तदेवात्र तथैव भिद्यते । तथाहि—

अनश्नुवानेनेति । भूमिः पृथिवी तस्य राज्यलक्ष्मी [रा]ज्ञः सुदर्शनस्य भुजेन युगहस्तेन रक्षावती आसीत् रक्षायुक्ता बभूव । किंभूतेन हस्तेन ? युगोपमानमनश्नुवानेन । 'हस्तद्वयस्य यन्मानं तन्मानं युगमुच्यते' युगस्योपमानं सादृश्यमनश्नुवता । पुनः किं भूतेन ? अबद्धमौर्वीकिणलाञ्छनेन न बद्धं जातं प्रन्थं (?) वा किणस्य लाञ्छनं लक्ष्म येन स तेन । अपरं किंभूतेन ? अस्पृष्टखड्गत्सरुणाऽपि अगृहीतखड्गमुष्टिनापि । एवंविधेनापि भुवं ररक्षेति भावः ॥५१॥

'न केवलमि'ति च पद्यं यथा कख–प्रतिभ्यां ग–प्रतौ भिन्नं तथैव ताभ्यस्सर्वाभ्य एवात्र भिन्नम् । तथाहि—

'काले गच्छति सति न केवलं तस्य राज्ञः सुदर्शनस्य शरीरावयवा विवृद्धिं ययुः भुजादयो वृद्धिं प्रापुः खलु निश्चयेन तस्य वंश्या गुणा अपि शौर्यादयो गुणाः प्रथिमानमापुः पृथुत्वं जग्मुः । किंभूताः? प्रारम्भसूक्ष्माः प्रारम्भे आरम्भे सूक्ष्मा लघवः । पृथोर्भावः प्रथिमा । पृथिव्या(थ्वा)दिभ्य इमनिज्वा । इमन्प्र(निच्प्र)त्यये सति । वृद्धदृष्टामेव यस्य बहुलम् उकारलोपः । रशब्दप्रकृतौ लघोरशब्दादेशसिद्धं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रथिमानमिति ॥५१॥' एवमेव 'सपूर्वजन्मान्तरदृष्टपारः' इत्यस्यापि व्याख्या क ख ग-प्रतिभ्यः सर्वथैव भिन्ना।

एकोनविंशस्य सर्गस्य पुष्पिका तु मूलरूपेणैव प्रागुपादर्शि, व्याख्यानमिदानीमुपदर्श्यते। तत्रान्तिमस्यैव पद्यस्य व्याख्या—

तं भूत्यर्थमिति। राज्ञी पट्टराज्ञी भर्तुः राज्ञः अग्निवर्णस्य अव्याहताज्ञा अस्खलिताज्ञा। या राज्ञी अन्तर्गूढम् अन्तर्गुप्तं बीजमुष्टिं दधाना क्षितिरिव पृथिवीव बभौ शुशुभे। यथा क्षितिः पृथिवी गुप्तं बीजं दधाति। किमर्थं प्रजानां भूत्यर्थं लोकानामभ्युदयाय। किं भूतानां प्रजानाम्? प्रसवसमयाकाङ्क्षिणीनां प्रसवस्य समयं कालं काङ्क्षन्ति वाञ्छन्त्येवंशीलाः तासाम् प्रसवसमयमनुपालयन्तीनाम्॥ इति श्रीरघुवंशे महाकाव्ये कालिदासकृतावेकोनविंशतितमः सर्गः समाप्तः॥

ख प्रतावस्य व्याख्यानं यथारूपमस्ति तथा २-३ फलकाभ्यां स्पष्टमेव।

तदित्थमिदं स्पष्टमेव नूनं यत् पञ्चादशात् सर्गाद् एकोनविंशं सर्गं यावत् अडयारसंस्थानस्य ८९८ प्रतेर्व्याख्यानमेतद् दर्पणो नास्ति। नास्ति च मल्लिनाथीया संजीविन्यपि। लेखकेन स्वस्मै कुतश्चिदेतदुपात्तं स्यात् 'विणायकेनेदं पुस्तकमलेखि अलिखदिति' लिपौ व्याकृतौ च संदिहानोऽस्या अनन्वर्थसंज्ञो लेखकस्तु निर्मातुं न प्रभवति। स स्वयमेव स्वस्य लिपिकृत्त्वम् 'अलेखी'ति स्वीकरोति।

अस्यां प्रतौ '१६१०' इति ये विक्रमाब्दाङ्का दृष्टाः तात्स्थ्याच्चेत् ते दर्पणलेखस्यापि मान्याः स्युः तर्हि खप्रतेरादर्शभूताया गोपीनाथोद्धवलिखिताया अपि प्रतेरस्याः २७ वर्षप्राचीनत्वं सिद्ध्यति तस्या '१६३७' संवत्सरे लिखितत्वस्य पूर्वमुल्लिखितत्वात्।

(५) ङ-प्रतिः। पूनास्थ भ० प्रा० शो०संस्थानस्य २६-१८७२।७३-इति क्रमाङ्कीया। तत्र अष्टमस्य सर्गस्य ७७ पत्रात् १६४ पत्रं यावत् सामग्री विद्यते। पत्राण्यस्य नितरां जर्जराणि चतुरस्रं खण्डितांशानि तथा सन्ति यथा स्पर्शमात्रमपि न सहन्ते। लिपिर्नागरी सुव्यक्ताक्षरा चास्ति। दर्पणत्वमस्या निश्चितं, पुष्पिकाया लाभात्।

(६) च-प्रतिः। तत्रत्यैव '७५७-१८८६-९२' इति क्रमाङ्कीया। अत्र विंशति पत्राणि नितरां स्वस्थानि स्पष्टलघुनागराक्षराणि च सन्ति। १५-७ श्लोकांशतः १६-८० श्लोकांशपर्यन्तो भागस्तत्र पूर्णतः स्वस्थो विद्यते। आरंभः १७२ पत्रतो भवति समाप्तिश्च १९१ पत्रे। नियतमेवास्यां पूर्णो दर्पणो लिखितः स्यात्। १५ सर्गे पुष्पिकालाभात्, १६ सर्गेऽपि क प्रतेरक्षरशः ऐक्यादस्या दर्पणत्वं निश्चितमेव।

(७) छ-प्रतिः। तत्रत्यैव ३३३-१८८४।८६ क्रमाङ्कीया। अत्र द्वावंशौ संकलितौ। उभावपि स्फीतनागराक्षरौ। प्रथमे ४६ पत्राणि सन्ति। तेषां दशसु पत्रेषु एकादशस्य सर्गस्य- २० पद्यस्य प्रथमा नव पङ्क्तीर्विहाय शेषोंऽशः दृश्यते। ८४ पद्यास्यान्तिमाः द्वित्राः पङ्क्तीरादाय साधयामीति ९१ पद्यस्य व्याख्यायां-'प्रयोगतोऽनुमन्तव्या अनेका हि धातव इति' इत्यतः पूर्व्यमंशं यावत् पत्रमेकं नास्ति एतान्यपि पत्राणि नितरां गलितानि स्पर्शासहिष्णूनि खण्डितमध्यानि, अङ्गुलद्वयमात्रावशिष्टमध्यानि च सन्ति। अन्येषु च दशसु द्वादशः सर्गो वर्तते। तत्र 'सौहृदेऽपि चेति विस्वः' दशा वर्तिः दशावर्तावस्थायां-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मिति विश्वः ॥१॥' इति कप्रतिसंवादिनोंऽशात् पूर्वं प्रथमश्लोकव्याख्या नास्ति। अतश्चारभ्य पञ्चमं श्लोकं यावत् खण्डितास्या, ततः षष्ठस्य पद्यस्यान्तिममंशमादाय ३२ पद्यस्यान्तिमाया एकस्याः पङ्क्तेः पूर्वं यावत् पूर्णतः खण्डिता। ततश्च १०२ पद्यस्य 'लोकपालद्विपानामैरावतादी'—इति कप्रतेरक्षरशः संवादिनमंशं यावदक्षता, स्वस्थपत्रा व्यक्ताक्षरा च वर्तते। पत्राङ्काः १७७ वर्तन्ते। ततोऽस्याः सर्गान्तरयुक्तत्वं सुखमनुमीयेत। द्वितीये भागे पत्राणि नितरां स्वस्थानि उज्ज्वलानि च सन्ति। तत्र २७ पत्रतः ७२ पत्रं यावत् अव्युच्छिन्ना सामग्री विद्यते। सा च त्रयोदशस्य सर्गस्य षष्ठपद्यांशतः प्रारभ्यते। सर्गान्ते—

इति श्रीरघुवंशे महाकाव्ये श्रीकालिदासकृतौ श्रीमदीश्वरसूरिसूनुभट्टहेमाद्रिकृते
रघुवंशदर्पणे अयोध्यागमनो नाम त्रयोदशः सर्गः समाप्तः ॥१३॥

इति नवीना पुष्पिका दृश्यते। चतुर्दशः सर्गः पूर्णोऽस्ति। तत्र 'श्रीरघुवंशे महाकाव्ये श्रीकालिदासकृता'-विति पुष्पिकांशो नास्ति। शेषा च पुष्पिका यथाप्रत्यन्तरमवस्थिता। पञ्चदशस्य च सर्गस्य षष्ठपद्यांशं यावत्-स्थितिः।

(८) ज-प्रतिः—तत्रत्यैव १६१-१८८२।८३ क्रमाङ्कीया १२५ पत्रात्मिका तत्र ५-१५ सर्गाः। १६-१८ स्यापि कश्चनांशो वर्तते। मध्ये कानिचन पत्राणि त्रुटितानि सन्ति। नागरैरेवाक्षरैरियं लिखिता स्वस्था व्यक्ताक्षरा चास्ति। इयं ५० तमपत्रादारब्धा। ५० तमे पत्रे प्रथमपृष्ठे प्रथमापङ्क्तिः 'रघुवंशदर्पणे दिग्विजयो नाम चतुर्थः सर्गः ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥'—इतिरूपा स्थिता। स्पष्टमेवैतत् यत् ४९ पत्रेषु प्रथमसर्गात् चतुर्थसर्गं यावद् दर्पणोऽस्यां लिखितः।

(९) झ-प्रतिः। कलकत्तास्थ—एशियाटिकसोसायटीपुस्तकागारस्य ४९९७। १००१० क्रमाङ्कीया नागराक्षरैर्लिखिता। १-४ सर्गटीका अत्र नास्ति। अतः परं द्वादशसर्गपर्यन्तं खण्डितमध्या प्रवर्तते। शिशुहितैषिण्या अपि कतिचित् पत्राणि सन्ति। तेषु चतुर्थसर्गस्यापि पत्रकमेकमस्ति। यद्यपि तत्र शिशुहितैषिणीति नाम पुष्पिकादिकं च नोपलभ्यते तथापि लिप्या टीकाक्रमेण च तत् स्फुटमेव।

(१०) ञ-प्रतिः। तत्रत्यैव ४९९८। ८१७० क्रमाङ्कीया। अत्र त्रीणि खण्डानि सन्ति। येषु प्रथमद्वितीययोः सर्गयोः टीका नास्ति। तृतीयसर्गस्य संपूर्णो दर्पणः पुष्पिकासहितो वर्त्तते। चतुर्थस्य च सर्गस्य पत्रकमेकमस्ति। यत्र प्रथमश्लोकात् पञ्चमश्लोकांशं यावदेव दर्पणः स्थितः। नागराक्षरेष्वेव लिखितेष्वेषु पत्रेषु कानिचन नितरां प्राचीनानि कानिचन च स्वस्थानि। लिपिसौभाग्यमत्र क्वचित् सर्वातिशायि। क्वचिच्च दुरुन्नेयताकश्मलं वाचयितुर्ललाटलिपिं ह्रेपयति। वाक्यांशाः तथा प्रम्लिष्टा यथा नोत्पुच्छयितुं शक्नुते मतिः। तथापि तृतीयस्य सर्गस्य कार्त्स्न्येन लाभो हीरप्रसुवमिवेङ्गालखनिमिमां विद्वत्संभावनास्पदं निर्मिमीत एव। प्रतेरारम्भः 'श्रीगणेशायनमः। अविघ्नमस्तु'—इति मङ्गलेन भवतीति प्रथमद्वितीययोरत्र संग्रहाभावः सूच्यते। प्रतिसर्गं च मङ्गलं नास्ति। चतुर्थस्य सर्गस्यारम्भोऽत्र मङ्गलर-हित एव दृश्यते।

इतः परं पञ्चानां प्रतीनां सूचना प्राप्ता। तासु चतस्रः त्रिवेन्द्रमस्थकेरलविश्वविद्यालयस्य पुस्तकालये सन्ति एका च अमदावादस्य लालभाई दलपतभाई भारतीयसंस्कृतिविद्यामन्दिरस्य ग्रन्थागारे। आद्यासु चतसृषु ८३३—संख्याकायां केवलश्चतुर्थः सर्गः ३३७५ संख्यायां केवलो द्वितीयः सर्गः ७७९५—संख्यायां केवलो दशमः सर्गः १२८१ संख्याकायां च विशीर्णानि वल्मीकदष्टानि च कतिचन

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पत्राणि सन्तीति श्रीमद्भिर्वासुदेवशरणाग्रवालैः सूचितम्। पञ्चम्यां प्रतौ ५-१८ पर्यन्तस्य भागस्य सूचना तत्रत्यैरध्यक्षैः श्रीमद्भिः दलसुखमालवणियामहात्मभिर्दत्ता। लंदनस्थ–इण्डियाआफिसग्रन्थागारे, जयपुरस्थ महाराजप्रासादसंग्रहालयग्रन्थागारे, उज्जयिनीस्थसिंधियाप्राच्यसंस्थानग्रन्थागारे, काशीस्थसरस्वतीभवन-ग्रन्थागारे, पाटनस्थहेमचन्द्राचार्यसंस्थानग्रन्थागारे, जोधपुरस्थशासकीयसंग्रहालहग्रन्थागारे च दर्पणस्य प्रतयो न सन्तीति ततस्ततो विद्वद्भिः सकृपं सूचितोऽस्मि। तंजोर–नागोर–बीकानेर–जैलसमेर-नेपालसंस्था एतदर्थमभ्यर्थिताः सन्ति। साम्प्रतं विदुषः प्रार्थयामि, ते हि प्रथमसर्गाच्चतुर्थसर्गपर्यन्तमासादयेयुश्चेत् प्रतीः लम्भयित्वा ता जनमिममनुगृह्णीयुरिति।

साम्प्रतं **दर्पणस्य कतिचन विशेषा**नुपक्षिपामः।

प्रमापकाः

विद्याचतुष्टयनिष्यन्दभूतस्य काव्यस्यानुशीलनावहिते चेतसि तासां परापतनाहमहमिकैव भाष्योत्कर्षमुपजनयतीति दर्पणकृतस्तां कैश्चित् प्रमापकैः प्रमिण्वन्तु—

(१) अमरः, क्षीरस्वामी, अमरशेषः, अनेकार्थसंग्रहः, उत्पलमाला, एकाक्षरनिघण्टुमाला, कामधेनुः, केशवः, त्रिविक्रमः, धनञ्जयः, निघण्टुः, प्रतापमार्तण्डः, भागुरिः, यादवप्रकाशः, विद्यचासी (?) विश्वप्रकाशः, वैजयन्ती, शब्दभेदप्रकाशः, शब्दार्णवः, सज्जनः, हलायुधः, अन्ये च द्वित्राः कोषेषु,

(२) अष्टाध्यायी, महाभाष्यम्, कैयटः, कैयटविवरणम्, काशिका, न्यासः, पाणिनीयमत-दर्पणः, गणदर्पणः, कविकल्पद्रुमः, गणरत्नमहोदधिः, क्षीरतरङ्गिणी, पदमञ्जरी, मुग्धबोधप्रदीपः, सारस्वतम्, सारस्वतनरेन्द्रटिप्पणी, अन्ये च द्वयेके व्याकरणग्रन्थेषु,

(३) ऋग्वेदः (३।१२), आश्वलायनः, आश्वलायनकारिका, आश्वलायनीनारायणीया वृत्तिः, शांबव्ध्यगृह (?), शौनकश्चेत्यादय आगमग्रन्थेषु,

(४) बृहत्संहिता, ज्योतिषरत्नमाला, श्रीपतिपद्धतिः, नारदीयसंहिता, मुहूर्तदर्पणः, अध्यात्म-प्रकरणविज्ञानेश्वरः (६।२२), लघुजातकम्, इति प्रभृतयो ज्यौतिषे,

(५) मनुः, याज्ञवल्क्यः, विज्ञानेश्वरः, वृद्धपाराशरः, विष्णुस्मृतिः, विष्णुरहस्यम्, भृगुव्याख्यान-सहिता प्रवरमञ्जरी, शंखः, पुरुषोत्तमश्चेति धर्मशास्त्रेषु,

(६) पाद्मम्, वामनम्, वाराहम्, मात्स्यम्, वैष्णवम्, मार्कण्डेयम्, श्रीधरीसहितं श्रीमद्भागदवतम्, वायव्यं, कौर्म्यं चेति पुराणेषु,

(७) कौटल्यः, कामन्दकश्च भूयसा नीतिशास्त्रेषु,

(८) गोनर्दः, वात्स्यायनः, रतिरहस्यं श्रृङ्गारतिलकञ्चेति कामशास्त्रेषु,

(९) योगवासिष्ठं गीता चेति दर्शनेषु,

(१०) शालिहोत्रं (५।७४) चाक्षुषं (५।५१), पालकाप्यं (६।७) योगयात्रा (१६।४१) चेतिं पशुशास्त्रेषु,

(११) वसन्तराजीयम् (११।६१, १६।१२), शकुन्तार्णवः, गार्ग्यश्चेति शकुनशास्त्रेषु,

(१२) वृक्षोदयः, प्रयोगरत्नावली चेति भूम्ना वृक्षशास्त्रेषु,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(१३) सङ्गीतकलिका स्वरशास्त्रेषु,

(१४) दण्डी (काव्यादर्शः), वाग्भटः, रुद्रटः, मम्मटः, प्रतापरुद्रः, वामनः, काव्योपदेशः, भोजः, भरतः, दशरूपकम्, रसाकरः, शृंङ्गारतिलकः, औचित्यालङ्कारः (औचित्यविचारचर्चा) भास्करनामा काव्यप्रकाशटीकाकारः (१७।१) महिमभट्टश्च काव्यनाट्यशास्त्रेषु,

(१५) वाग्भटम्—वैद्यशास्त्रेषु,

(१६) महाभारतमितिहासेषु,

(१७) शम्भुरहस्यं तन्त्रेषु,

(१८) कुमारसंभवम्, मेघदूतम्, रघुवंशम्, शाकुन्तलम्, किरतार्जुनीयम्, शिशुपालवधम्, नैषधम्, भट्टिकाव्यम्, अनर्घराघवम्, नलोदयः, नीतिशतकम्, सूर्यशतकम्, रामायणम्, बालरामायणम्, महिम्नस्तुतिः, कर्णामृतमित्यादीनि काव्येषु,

(१९) सहस्रनामभाष्यम् (३।५०)–स्तोत्रेषु,

(२०) नाथः, सुबोधिनीकारः, वल्लभः च टीकाकारेषु।

पाठान्तराणि

परम्परावहां चेतःसु यथावदुपसंक्रान्ता अपि संप्रदायाः आदर्शतलवैचित्र्यात् प्रतिबिम्बवद् भजन्त्येवाश्रयवैचित्र्यात् विचित्रताम्। आन्वीक्षिकीयुक्तास्तत्र स्वाभाव्यात्, कविप्रतिभासंवादात्, अन्यथापि वा कथञ्चिद् यत्र रिक्थभूतं तं संप्रदायं–सुरक्षितं वीक्षन्ते तदेव भूग्नाऽऽद्रियन्ते। पौरुषेये हि वाङ्मये तथ्यमिदं पाठान्तररूपेण प्रत्यक्षमाजिहीते अनया च दिशा दर्पणे श्रद्दधत एव प्रागेव गवेषकाः। साम्प्रतं निदर्शान्तरैरपि सत्यमिदं स्पष्टयामः।

दर्पणे पाठान्तराणि त्रिविधान्युपलभ्यन्ते–पदगतानि, पादगतानि, पद्यगतानि चेति। तत्र पद्यगतष्वेव प्रक्षेपा अप्यस्माभिः संगृहीताः। तानि चैकैकशोंऽशेनात्र प्रतिपादयामः—

(१) तृतीयसर्गस्य–'उवाच धात्र्या–' इत्यादि पद्यं दर्पणे 'यदाह धात्र्या'–इति पठितं दृश्यते। तत्र चतुर्थचरणगतस्य तेनेति तत्पदस्य यत्पदाकाङ्क्षा शाम्यति। एवमेव—

उदये मदवाच्यमुज्झता श्रुतमाविष्कृतमात्मवत्त्वया।
मनसस्तदुपस्थिते ज्वरे पुनरक्लीबतया प्रकाश्यताम्॥

इति ८।८४ पद्ये मल्लिनाथपाठः। तत्र—

'मदेन यद्वाच्यं निन्दादुःखं तदुज्झता परिहरता सत्यपि मदहेतावमाद्यता त्वया यदात्मवत् अध्यात्मप्रचुरं श्रुतं शास्त्रमाविष्कृतमि'ति तद्व्याख्या। हेमाद्रेरत्र मदवाच्य–स्थाने यदवाच्यमिति पाठः, आत्मवत् त्वयेति स्थाने च 'आत्मनस्त्वया' इति पाठः। कियती ह्यत्र स्वारसिकता वाक्यार्थस्य। यत्तदोरभिसंबन्धाद् 'उदयास्तमनयोः सूर्यस्येवैकरूपता धीरस्याभिमतेति योऽभिमानो भवता पूर्वमुदयेऽनुत्सिक्तेन प्राकाशि साम्प्रतं विपद्यपि स प्रकाशनीय'—इति कविहृदयमुदेतितराम्। एतद्विपर्यय एवानेन कविना अत्रैव काव्ये—'अभितप्तमयोऽपि मार्दवं भजते' इति समर्थितः—'अयोघनेनाय इवाभितप्तं वैदेहिबन्धोर्हृदयं विदद्र' इति च चतुर्दशे सर्गे। मदश्च मद्यादिजन्यो विकार उच्यते। न च प्रियानाशः मदवाच्यो भवितुमर्हति। उदये स्मयवाच्येति पठितं स्यात्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(२) ज्योतीरथा = सप्तमस्य सर्गस्य षट्त्रिंशस्य पद्यस्य मल्लिनाथादृते—

'प्रत्यग्रहीत् पार्थिववाहिनीं तां भागीरथीं शोण इवोत्तरङ्गः।'

इत्युत्तरार्धपाठे आपततो वस्तुनः स्वीकरणरूपः प्रतिग्रहः 'प्रत्यग्रहीत्'-पदलभ्यः। ततः—पार्थिववाहिनीकर्तृक एव प्रथमोद्योगोऽत्र स्थिरः। स्पष्टं चेदं ३५ पद्यात्—'तमुद्वहन्तं पथि भोजकन्यां रुरोध राजन्यगणः स दृप्तः।'—इत्येवं रूपात्। ततश्च वाहिनीमभियुयुक्षमाणां वीक्ष्याजोऽपि तामभियुयोजेति वाच्ये लब्धे शोणभागीरथ्योरुपमा वैषम्यमुपजनयति। शोणो हि भागीरथीगामी, न तु भागीरथी शोणगामिनी। ततोऽत्र शोणकर्तृक उद्योगो भागीरथीकर्तृकश्च प्रतिग्रह उन्मिषति। हेमाद्रिरत्र —'ज्योतीरथां शोण०००' इति पाठमुपादत्ते। तत्र ज्योतीरथा शोणगामिनी नदी। तत्कर्तृकोऽभियोगः शोणकर्तृकश्च प्रतिग्रहोऽत्र पाठे स्पष्टमुन्मिषति। तेनाभियोगप्रतिग्रहसाम्यात् शोणज्योतीरथौपम्यमजवाहिन्योरौचित्यसौभगं भजते। सोऽयमर्थः—नागरीप्रचारिणीपत्रिकायाश्चन्द्रबलीपाण्डेयाङ्के प्रकाशिते 'ज्योतीरथा' नाम्नि लेखे डॉ. वासुदेवशरणैः स्पष्टीकृतः। अत्रैकमिदमपि वैचित्र्यं यद् उभावपीमौ टीकाकारावन्योन्यपाठान्तरं न वित्तः। ततो नेदं पाठान्तरमपितु लिपिकृतो मतिविपर्यय एव।

(३) विवृताननत्वम्——१३।१० पद्ये मल्लिनाथपाठ एवंरूपः——

ससत्त्वमादाय नदीमुखाम्भः संमीलयन्तो विवृताननत्वात्।
अमी शिरोभिस्तिमयः सरन्ध्रैरूर्ध्वं वितन्वन्ति जलप्रवाहान्॥

अत्र आदानविसर्गयोः कर्मतया अम्भो-जलप्रवाहावुपात्तौ, 'संमीलन्ति' न तावद्बन्धनकोशास्तयावचितपुष्पाः'—इति कालिदासप्रयोगेणैवाकर्मकत्वेऽपि णिजन्तत्वात् सकर्मकतया स्थिताया संमीलनक्रियायास्तु कर्म न दृश्यते। तदर्थमेतत्पाठमभ्युपगच्छद्भिराक्षेपमात्रं शरणम्। अतएव मल्लिनाथोऽपि तेनैव पथा——'चञ्चुपुटं संघट्टयन्तः' इति कर्मण आक्षेपं कुरुते। चञ्चुपुटसंमीलनयोः स्वारसिकान्वयासंभवे च संमीलनं संघट्टनतया विपरिणमयते। किंच 'विवृतनत्वा' दिति हेत्वर्थकस्यापादानस्य ससत्त्वनदीमुखाम्भसाऽन्वयमभिप्रैति। तेन हीनपदत्वमस्थानस्थपदत्वं नेयार्थत्वं च दोषत्रयमत्रापतति। 'विवृताननत्वादि'त्याननपदेन तिमिसान्निध्यादर्थान्तरस्य प्रत्ययासंभवे चञ्चुपुटस्यैव ग्रहणे पौनरुक्त्यावहश्चायमाक्षेपः। एवमेव तिमीनां शतयोजनायतत्वप्रसिद्धेरेव ससत्त्वनदीमुखाम्भोग्रहणसंभवे तदर्थं विवृताननत्वोपादानमपुष्टम्। दर्पणकृतस्तु तत्र 'विवृताननत्वम्' इति पाठः। तस्य च मीलनकर्मतयोपादानात् सर्वोऽप्यसौ दोषप्रपञ्च एकपद एव विलीयते। न च संमीलयन्तोऽविवृताननत्वादित्यकारप्रश्लेषो युक्तः, तथा सत्यपि कर्मण आक्षेपोऽपरिहार्यः।

(३) शेषा = १७।७९ पद्ये मल्लिनाथपाठ एवंरूपः—

'दूरापवर्जितच्छत्रैस्तस्याज्ञां शासनार्पिताम्।
दधुः शिरोभिर्भूपाला देवाः पौरन्दरीमिव॥'

अत्र प्राचामालङ्कारिकाणां मते क्रियागतस्य भूतत्वस्योपमानेऽनन्वयापत्तिः, देवाः पौरन्दरीमाज्ञां दधति, न तु दधुः। नव्यमते तदभावेऽपि राज्ञां देवोपमयाऽतिथेश्च पुरन्दरोपमया नास्ति कश्चनातिशयलाभः। एतावताऽतिथौ राजान्तरव्यतिरेको दुर्लभः। देवानामिन्द्राज्ञाकारित्वमागमप्रमितम्, तेन——'सेवकाः स्वामिनो यथे'ति चतुर्थचरणपरिवर्त्ते सादृश्यस्यानुभविकत्वसिद्धावुत्कर्षातिशयलाभः,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रमाणान्तरापेक्षया प्रत्यक्षस्यैव ज्येष्ठत्वोपगमात्। आज्ञाया अमूर्तत्वात् तद्धारणस्य च मूर्तत्वात् तयोरन्वयौचित्याय—

एषा मनो मे प्रसभं शरीरात् पितुः पदं मध्यममुत्पतन्ती।
सुराङ्गना कर्षति खण्डिताग्रात् सूत्रं मृणालादिव राजहंसी॥

इति विक्रमोर्वशीयकाव्य इवात्रापि केनचित् मूर्तेनैवोपमानेन भाव्यम्। किं च सार्वभौमसामन्तयोरौपम्याय देवपदमत्र कुबेरादिदेवविशेषपरतया नेयम्। अन्यथा तु देवानां राजत्वाभावे सामन्तोपमानत्वं न संगच्छेत। देवा हि स्वर्पतेः प्रजा, न तु तदधिकृता विषयाध्यक्षाः। एवं प्रजया राज्ञामौपम्यं कवौ प्रतिभानदारिद्र्यमापातयेत्। न चैतत् कालिदासे संघटते, तस्यौपम्ययशसो विद्वदुपश्लोकितत्वात्, सर्वातिशयित्वाच्च। तं हि महान्तोऽप्यभियुक्ता (अभिनवगुप्तपादाचार्या) भगवदनुग्रहपवित्रवाचं मन्वते। दर्पणकारस्तु तत्र 'शेषां पौरन्दरीमि'वेति पठति। अस्मिंस्तु पाठे सर्व एव विप्रतिपादाः प्रावृषि रजःकणा इव विलयमुपेत्य सचेतसां चित्ताकाशं निर्मलयन्ति। शेषाज्ञयोरौपम्यं कविषु प्रसिद्धमेव। खजुराहोतः प्राप्ते धङ्गदेवस्याभिलेखे 'शिरसाऽवहन्नृपतयः शेषामिवाज्ञामि'ति लभ्यत एव। स्वयं कालिदासोऽपि कुमारसंभवे--'तथेति शेषामिव भर्तुराज्ञामादाय मूर्ध्ना मदनः प्रतस्थे' [३।२२] इत्यनयोः सादृश्यमुपादत्त। श्रीकण्ठचरितकवेर्मङ्खस्यापि--

'शेषां वचोमयीं मूर्ध्नि गृह्यमाणां सुपर्वभिः।
पुनरप्यथ जग्रन्थ नाथो मन्मथमाथकृत्॥' [श्रीक० १९।४०]

एतत्कवयतोऽभिप्रायोऽयमात्मीयः। शेषाशब्दार्थे दर्पणकारो विश्वप्रकाशमेवमुद्धरति—'प्रसादान्निजनिर्माल्यदाने शेषेति कीर्तिते' ति। मल्लिनाथोऽपि कुमारसंभवस्योद्धृतं पद्यं व्याचक्षाणः शेषाशब्दाय प्रमाणमेतदुद्धृत्य–'माल्याक्षतादिदाने स्त्री शेषे'ति केशववैजयन्त्योः प्रमाणवाक्यमप्युद्धरति। श्रीकण्ठचरितटीकायां जोनराजोऽपि 'शेषां वचोमयी'मित्यस्य 'वचनमयीं मालामि'ति व्याख्यानं कुरुते। तदित्थं महापुरुषोपभुक्तशेषदानं शेषापदवाच्यं भवति। तेन च 'गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनमि'ति भारवेरपि नायमभिप्रायोऽनध्यक्षः। प्रमाणैरेषोऽर्थो द्रढीयते। तथा च शाकुन्तलस्य ७।२ पद्ये–विहितासुरप्रणाशाय दुष्यन्ताय देवराजो महेन्द्र आत्मपिनद्धां मन्दारमालां प्रयच्छति। स तां तत्कन्धरे पिधापयति। पद्यं च तदित्थम्—

अन्तर्गतप्रार्थनमन्तिकस्थं जयन्तमुद्वीक्ष्य कृतस्मितेन।
आमृष्टवक्षोहरिचन्दनाङ्का मन्दारमाला हरिणा पिनद्धा॥

पउमचरिउकाव्यस्य ११।१४।१० पद्ये

णन्द वह जअसद्द पडतिहिँ
सेसा अग्घपत्तजलजुत्तिहिँ।

इति सोऽयं शेषाशब्दो दृश्यते।

'तस्यै स्त्रियस्ता प्रददुः शेषां युयुजुराशिषः।
ताभ्यो देव्यै नमश्चक्रे शेषां च जगृहे वधूः॥ [१०।५३।४८]
शेषामाधाय शिरसि स्वधाम्न्युद्वास्य सत्कृतम् [११।३।५४]
इति शेषां मया दत्तां शिरस्याधाय सादरम् [११।२७।४७]

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इति श्रीमद्भागवतेऽपि चतुर्वारमसौ शब्दोऽस्मिन्नेवार्थे प्रयुक्तः। पौरन्दरी च शेषा तदानींतनो नोत्तुलपुरस्कारः। 'सर्वेऽपि राजानस्तदर्थं लालायन्ते स्म। प्राप्तायां च तस्यां यथा ते नितरां तुष्यन्ति स्म, आत्मनश्च कृतिनो मन्यन्ते स्म तथैवातिथेराज्ञायां प्राप्तायां इत्यतो [पाठात्]अर्थलाभो महीयान्। अतोऽतिथेराज्ञायाः प्रतीक्ष्यत्वं, निरतिशयस्पृहणीयत्वञ्च प्रतीयते। तेन चातिथेः सकलचक्रवर्तिप्रमुखत्वमपि। न हि चक्रवर्त्यन्तरसाधारण्येनातिथेराज्ञां साध्वसाक्रान्ताः सन्तो राजानोऽबिभरुः, प्रत्युतात्मोत्कर्षाशंसया धन्यात्मभावेन प्रीणिताः गुणानुरक्ता बद्धश्रद्धाश्च। प्रकृतद्वये परस्परमौपम्यं प्राचां कवीनामतिमात्रं प्रियमिति विदितचरमेव।

(४) नकारस्य स्थाने चकारः—

'स दक्षिणं तूणमुखेन वामं व्यापारयन् हस्तमलक्ष्यताजा' विति सप्तमस्य सर्गस्य युद्धवर्णने नायककौशलवर्णनाय मल्लिनाथपाठानुसारं पद्यम्। अत्र मल्लिनाथस्तृतीयां सप्तम्यर्थपरतयाऽभ्युपैति वामं च क्रियाविशेषणतया। दर्पणकारोऽत्र 'तूणमुखे च' बाममिति पठति। दक्षिणं वामं चेत्युभयं चकारेण व्यापारे समुच्चाययति। ततश्च नायकस्य सव्यसाचित्वमुन्मिषति। चकारनकारौ लिपौ प्रायेण सरूपावेव भवतः। ततोऽत्र मल्लिनाथ एव द्रुतोऽनुमीयते।

(५) चकारस्य नकारः—

'आलोकमार्गं सहसा व्रजन्त्या कयाचिदुद्वेष्टनवान्तमाल्यः।
बद्धुं न संभावित एव तावत् करेण रुद्धोऽपि च केशपाशः॥'

इति मल्लिनाथस्वीकृतेन पाठेन पद्यमिदं रघुवंशे [७।६] कुमारसंभवे च [७।५७] लभ्यते। हेमाद्रिस्तु तत्र—'यत्र रोधमात्रमपि नास्ति तत्र बन्धस्तावद् दूरापास्तः' इति भावं दर्शयति। दर्पणप्रतिषु तु 'रुद्धोऽपि चे' त्येव लेखो दृश्यते। नूनमस्य चकारस्थाने नकार एवाभिप्रेतः। लिपिकेनैव तदन्यथाकारि। कुमारसंभवेऽत्र श्लोके निर्णयसागरप्रतौ 'रुद्धोऽपि न केशहस्तः' इति पाठान्तरं प्रदर्शितमस्ति। अनयोर्नकारघटितः एव पाठे सचेतसोऽभ्यरोचन्त। व्यक्तिविवेककारोऽत्र प्रमाणम्। स हि विधेयाविमर्शप्रकरणे विधेयभूतस्य विशेषणस्य समासकृतमप्राधान्यं प्रत्याचक्षाणः पद्यमिदं प्रत्युदाजहार। तत्रापि काशिक-चौखंभाप्रतौ 'रुद्धोऽपि च केशहस्त' इत्येव मुद्रितं दृश्यते। वृत्तौ तु 'अवलोकनव्यवधानदायिनीं तावतीमपि कालकलां विघ्नायमानां मन्यमानयानया सततं स्वाधीनेनैकेन करकमलेन रोधोऽप्यस्य न कृतः' [पृ. २००] इति नकारघटनौपयिकमेवाभिप्रायमसौ दिदेश। हेमाद्रिमल्लिनाथयोः 'केशपाश' पाठस्थाने कुमारसंभवस्य निर्णयसागरप्रतौ प्रदर्शितः 'केशहस्त' इति पाठः चकारस्थाने नकारमपि व्यक्तिविवेककृदभिमतं साधयति। तेन हि 'करेण रुद्धोऽपि न केशहस्त' इत्येव प्राक्तनः पाठः प्रतीयते। तदित्थं पद्यार्थे प्राणा इवागताः। तेन सहसापदार्थः उद्वेष्टनवान्तमाल्यर्थश्च परिपुष्यतः। केशपाशस्य करेण रोधः सहसा पलायनं चेत्युभयं नातिसमञ्जसम्। सर्वं विस्मृत्यैव पलायनं वधूवरावलोकनौत्सुक्यसान्द्रतां प्रसाधयति। न च कररुद्धस्य केशपाशस्य वेष्टनभङ्गे माल्यवमनं चापि संभवतः। किञ्च

प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव।
उत्सृष्टलीलागतिरागवाक्षमालक्तकाङ्कां पदवीं ततान।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विलोचनं दक्षिणमञ्जनेन संभाव्य तद्वञ्चितवामनेत्रा।
तथैव वातायनसंनिकर्षं ययौ शलाकामपरा वहन्ती ॥

इत्यादिना संदर्भेण

ततस्तदालोकनतत्पराणां सौधेषु चामीकरजालवत्सु।
बभूवुरित्थं पुरसुन्दरीणां त्यक्तान्यकार्याणि विचेष्टितानि ॥

इति सामान्यतः प्रतिज्ञातस्य कार्यान्तरपरित्यागेनैव निर्वाहः कविना कृतः।

'प्रस्थानभिन्नां न बबन्धनीवीम्। ०० हस्तेन तस्थावलम्ब्य वासः ॥' इति नीवीमात्रस्य करावरोधस्तत्र सुकविरौचित्यमनुरुन्धन्नुपनिबबन्ध। एवमुदाहरणान्तराण्यपि लभ्यन्ते।

(२) पादपाठान्तरम्

हेमाद्रिमल्लिनाथयोः पादपाठान्तरमत्यधिकं नास्ति। यावदप्यस्ति तावत् कियन्नु महत्त्वपूर्णमस्तीति निदर्शनेनैकेनावगच्छन्तु—

'अप्यग्रणीर्मन्यकृतामृषीणां कुशाग्रबुद्धे! कुशली गुरुस्ते।
यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मेः ॥' [५।४]

इति मल्लिनाथपठिते पद्ये हेमाद्रेर्वक्ष्यमाणानि पाठान्तराण्यनुशील्य विप्रतिपत्तीरनुभवामः। तथा हि— कौत्सगुरोरुष्णरश्मिपदवाच्येन सूर्येण तदुपार्जिताशेषज्ञानस्य चैतन्यपदार्थेन प्रबोधेनात्रौपम्यं पर्यवस्यति। तत्र

'शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः।' इति
'अशनेरमृतस्य चोभये वशिनश्चाम्बुधराश्च योनयः'।

इति च कालिदासकाव्येषु तपोधनानामुग्रता भयप्रकरणेषु दृष्टापि गुरुशिष्ययोः शमप्रकरणेऽत्र तस्या अनौपयिकत्वात् सूर्यवाचकान् भास्वद्विवस्वदादीन् प्रकाशव्यञ्जकान् पर्यायशब्दान् विहायोष्णरश्मिशब्दस्योपादानं नात्यर्थं पुष्यति। किं च 'चैतन्यमत्र प्रबोध' इति मल्लिनाथव्याख्या। तत्र प्रबोधशब्दः 'प्राबोधयन्नुषसि वाग्भिरुदारवाचः' इत्यादिषु दृष्टार्थोऽत्रापि जागरणपरोऽवसीयते। तच्च जागरणं सूर्यपक्षे निद्रात्यागरूपेणैवान्वितमपि ज्ञानपक्षे चक्षुरुन्मीलनरूपेणैवाज्ञानतिमिरापगमात्मनान्वीयेत। तथा च सति जघन्यव्यापाराश्रयणोत्तरोऽत्रौचित्यविगमः स्फुटः। वृत्तसमावर्तने शिष्ये स्थितं ज्ञानं चक्षुरुन्मीलनमात्रं न भवति, उन्मीलितचक्षुषा तेन निहितस्य ज्ञानराशेरवाप्तेः। किं च जागरणं लोकस्य स्वो धर्मः। न हि तत् सूर्येऽपि कृतावस्थानं विभाव्यते। न च ज्ञानं तथा भवति। तच्च गुरोरात्मरूपतयैवागमेषु प्रतीतम्। शक्तिपातरूपेण शिष्ये गुरोरात्मावेशो हि ज्ञानमिति तान्त्रिकाणां समयः। तदित्थं स्पष्ट एवात्रोपमावैषम्यकलङ्कः। न च तटस्थयोरौपम्यं कालिदासः क्लेशोत्तरं योजयेदिति संभाव्यते। असौ चात्र चमरीपुच्छदाहो यद् इयमेवोपमास्मिन्नेव सर्गे पञ्चत्रिंशत्तमे पद्ये पुनरुच्यते। यथा —

'इत्थं प्रयुज्याशिषमग्रजन्मा राज्ञे प्रतीयाय गुरोः सकाशम्।
राजापि लेभे सुतमाशु तस्मादालोकमर्कादिव जीवलोकः ॥'

अत्रैव चास्या औचित्यवत्त्वम्। अन्यथा–'रघुः कौत्सात् सुतं लेभ' इत्यतो वाक्यादुन्मिषन्ती नियोगबुद्धिः कथमपि न शाम्येत। अनया च महानुभावस्य कौत्सर्षेरजोत्पत्तौ निमित्तत्वमात्रं स्फुरति। पिता

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हि पूर्वं पुत्रभावसामर्थ्यमात्मनि संचिनुते, तदुत्तरं कृतगर्भाधानो जायासंक्रमेण पुत्ररूपं प्राप्नुते। अतश्च पुत्रः पितुरात्मजन्माभिधीयते। दिलीपाख्याने चैतत् स्पष्टम्। तत्र दिलीपो नन्दिन्याः पयसा पूर्वमात्मनि सुतत्वयोग्यतामाधत्ते, ततो सुदक्षिणामहिम्ना रघुरूपम्। अत्र रघुरपि कौत्साशिषा पूर्वमात्मनि सुतत्वयोग्यतामाधत्ते सैव च योग्यतात्र—'सुतमाशु लेभे' इति वाक्यस्यार्थः। आलोकसाम्येन चायं परिपुष्यति। यथा हि जीवलोक आलोकमवाप्य कर्मवितानेन ताँस्तानभीष्टान् फलविशेषानश्नुते तथैव रघुरपि कौत्साशंसया सुतत्वसामर्थ्यमवाप्य जायाप्रतिच्छन्देन सुतशरीरमाप। अत एव—'ब्राह्मे मुहूर्ते किल तस्य देवी कुमारकल्पं सुषुवे कुमार'मित्यनन्तरपद्ये पौनरुक्त्यं परिहीयते। तावदर्थलाभाय—'ब्राह्मे मुहूर्ते जनिमाप यस्मात् कुमारकल्पः स शुभः कुमार'इत्यस्यैव पूर्वार्धरूपस्य पर्याप्तत्वात्। एवञ्चालोकसाम्येन 'यं पुत्रमसावात्मन्याधत्त तमेव देवी सुषुव' इत्यर्थयोजनया 'देवी सुषुवे' इत्यनन्तरपद्यार्थः 'सुतमाशु लेभे' इति पूर्वपद्यार्थेन गतार्थो न भवति। एवमौपम्यमिदमत्रैवौचित्यं लभते, न तु गुरुशिष्यप्रकरणे।

दर्पणे त्वत्र चत्वारः पाठाः। तथा हि—(१) चैतन्यमर्कादिव जीवलोकः (२) लोकेन चैतन्यमिवोष्णरश्मेः (३) चैतन्यमुग्रादिव दीक्षितेन (४) ज्ञानं यतस्त्वां प्रविवेश पुण्यं चैतन्यमुग्रादिव यायजूकमिति च। दर्पणकारोऽत्र प्रथममेव पाठं प्रथमतया पठति। तत्रोक्तक्रमेण पद्यान्तरपौनरुक्त्याद् अरुचिस्तदवस्थैव। यद्यपि उष्णरश्मेरपेक्षयार्कशब्दोऽत्र स्वारस्याधिक्यं बिभर्ति, तस्य पूजार्थस्य भौवादिकस्य अर्चतेः 'अर्च्यत' इति कर्मणि, स्तवनार्थस्य चौरादिकस्य 'अर्कधातोर्वा,' [एरचि] तत्रैव घञा निष्पत्तेः पूज्यत्वस्तोतव्यत्वाद्यर्थलाभाद् गुरौ गौरवबुद्धिः प्रतिबिम्ब्यते। पाठेऽस्मिन्नुपमानभूतस्य जीवलोकस्य प्रथमान्तत्वादुपमेयेऽपि तल्लाभाय 'त्वया ज्ञानम्' इति पद्यद्वये विसर्गलोपमाम्नाय 'तु+अयाः +ज्ञानम्' इति चिकित्सा क्रियते। सा च वैदर्भमार्गे सविशेषं स्तुतस्य कालिदासस्य प्रसादविशदेषु काव्येषु शल्यायते परम्। तच्छोधनायैव नूनं 'लोकेनेत्यादेर्द्वितीयस्यारुचिपदस्य पाठस्यावतारः। तदित्थं तृतीयश्चतुर्थश्चेति पाठद्वयमवशिष्यते। तत्रापि चतुर्थस्तूत्तरार्धपाठान्तरम्। अर्थस्तूभयोरेकरूपमेव। दर्पणकारः पाठमिममेवं व्याचष्टे—'यथा उग्राद् दीक्षितेन यजमानेन चेतना प्राप्यते, दीक्षितो हि प्रथमं चेतनां जुहोति। पुनः उग्राद् दुष्प्रवेशात् तां भजत' इत्यागमः। इति। आगमपदेन दर्पणकारो द्वितयमेव परामृशति ब्राह्मणं पुराणञ्चेति। तत्र पुराणार्थं स्कन्देन साक्षादिव देवसेनामिति ७।१ पद्यस्य 'देवसेनाम्। तया स्वपतित्वेन स्कन्दोऽभिषिक्त इत्यागमः' इति व्याख्यायाम्, षोडशसर्गस्यावतरणिकायाम् 'इदानीं रामायणादधिकमर्थमागमान्तर' प्रसिद्धं सर्गचतुष्टयेनाहे'ति, ६।७३ पद्येऽपि ककुत्स्थशब्दव्याख्याने 'इक्ष्वाकुवंश्यः पुरञ्जयो राजा इन्द्रसहायार्थं वृषरूपमिन्द्रमारुह्य वृषपर्वतनामानमसुरं हतवान्। तत्प्रभृति ककुत्स्थ इत्यागम' इति च तत्प्रयोगः स्पष्ट एव। ब्राह्मणार्थे पुनरर्थलाभात् तद्‌योजना। 'यजमानोऽग्निः' [६।३।३।२१, ६।५।१।८, ७।४।१।२१, ९।२।३।३३] 'यजमान आग्नेयो भवति' [३।९।१।९] इति शतपथब्राह्मणे दीक्षितस्याग्निरूपत्वमुरीकृतम्। अग्निरूपेषु चाष्टमूर्तीनां नामानि तत्रैव षष्ठे काण्डे कुमारोत्पत्तिप्रकरणे दर्शितानि तथा हि—'भूतानां पतिः संवत्सर उषसि रेतोऽसिञ्चत्, स संवत्सरे कुमारोऽजायत। सोऽरोदीत्। तं प्रजापतिरब्रवीत् कुमार ? किं रोदिषि, सोऽब्रवीत् नाम मे धेहि।' तमब्रवीन्—रुद्रोऽसीति। अग्निर्वै रुद्रः यदरोदीत्तस्माद् रुद्रः। सोऽब्रवीत्—'धेह्येव मे नामेति'। तमब्रवीत् सर्वोऽसीति। आपो वै सर्वः। अद्भ्यो हीदं सर्वम्। सोऽब्रवीत् धेह्येव मे नामेति। तमब्रवीत् पशुपतिरसीति। ओषधयो वै पशुपतिः। तस्माद्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यदा पशव ओषधीर्लभन्तेऽथ पतीयन्ति । सोऽब्रवीत्—'धेह्येव मे नामे'ति । तमब्रवीद् उग्रोऽसीति । वायुर्वा उग्रः । तस्माद् यदा बलवद् वाति, उग्रो वातीत्याहुः । सोऽब्रवीत् धेह्येव मे नामेति । तमब्रवीद् 'अशनिरसी'ति । विद्युद् वा अशनिः । यं विद्युद् हन्त्यशनिरवधीत्याहुः । सोऽब्रवीत् 'धेह्येव मे नामे'ति । तमब्रवीत्—भवोऽसीति । पर्जन्यो वै भवः । पर्जन्याद्धीदं सर्वं भवति । सोऽब्रवीत् धेह्येव मे नामेति । तमब्रवीत् 'महान् देवोऽसी'ति । प्रजापतिर्वै चन्द्रमाः, प्रजापतिर्वै महान् देवः । सोऽब्रवीत् धेह्येव मे नामेति । तमब्रवीद् ईशानोऽसीति । आदित्यो वा ईशानः । आदित्यो ह्यस्य सर्वस्येष्टे। सोऽब्रवीत् एतावान् वा अस्मि, मा मा इतः परं नाम धा इति । तान्येतान्यष्टावग्निरूपाणि । कुमारो नवमः । सैवाग्नेस्त्रिवृत्ता । [शतपथ ब्रा. ६।१।३।८–१८ संक्षेपः] वाक्यान्तरेषु च यजमानस्याष्टमूर्तित्वमपि ब्राह्मणाभिमतम् । 'प्राणा दीक्षा' [शत. १३।१।७।२, तै. ३।८।१०।२] 'वाग्दीक्षा तया प्राणो दीक्षया दीक्षितः' [तै. ३।७।७।७] 'वाग्दीक्षा' [कौ. ७।१] 'आपो दीक्षा, तया वरुणो राजा दीक्षया दीक्षितः' [तै. ३।७।७।६] 'पृथिवी दीक्षा, तयाग्निर्दीक्षितः' [तै. ३।७।७।६]—इत्येवमादिषु तत् स्पष्टमेव । एवमेव अथ य एतमेतद् दीक्षयन्ति तद् द्वितीयं म्रियेत, यज्ञाद्ध ह वा एष पुनर्जायते यो दीक्षितः [ऐ. ७।२२], अग्नीषोमौ वा एतमन्तर्जम्भ आदधाते यो दीक्षते [श. ३।३।४।२१, ३।६।३।१९]—इत्येवमादिभिर्वाक्यैर्दीक्षितस्य चेतनाया यज्ञे होमः, तत एव च पश्चात्तल्लाभो विदितः । अष्टमूर्तिषु केवलाया उग्रमूर्तेरेव दीक्षितस्य चैतन्यलाभः पुराणेषु भूम्ना प्रथितः । तथा हि लिङ्गपुराणस्योत्तरार्धे द्वादशेऽध्याये सनत्कुमारनन्दिकेश्वरसंवादे—

'भूरापोऽग्निर्मरुद् व्योम भास्करो दीक्षितः शशी ।
भवस्य मूर्तयः प्रोक्ताः शिवस्य परमेष्ठिनः ॥

खात्मेन्दुवह्निसूर्याम्भोधराः पवन इत्यपि ।
तस्याष्टमूर्तयः प्रोक्ता देवदेवस्य धीमतः ॥

'पञ्चभूतानि चन्द्रार्कावात्मेति मुनिपुङ्गवाः ।
मूर्तयोऽष्टौ शिवस्याहुर्देवदेवस्य धीमतः ॥

आत्मा तस्याष्टमी मूर्तिर्यजमानाह्वया परा।
दीक्षितं ब्राह्मणं प्राहुरात्मानं च मुनीश्वराः ॥'

—इत्येवं शिवस्याष्टौ मूर्तीरुद्दिश्य त्रयोदशेऽध्याये तासां संज्ञान्तराणि स्थानानि चैवं निरुक्तानि—

'चराचराणां भूतानां धाता विश्वंभरात्मकः ।
शर्व इत्युच्यते देवः ० ० ० ० ।
वह्न्यात्मा भगवान् देवः स्मृतः पशुपतिर्बुधैः ।
पवनात्मा बुधैर्देव ईशान इति कीर्त्यते ।

व्योमात्मा भगवान् देवो भीम इत्युच्यते बुधैः ।
सूर्यात्मा भगवान् देवो रुद्र इत्युच्यते तथा ।
सोमात्मको बुधैर्देवो महादेव इति स्मृतः ।
यजमानात्मको देवो महादेवो बुधैः प्रभुः—
उग्र इत्युच्यते सद्भिरीशानश्चेति चापरैः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आत्मा यो यजमानाख्यः सर्वभूतशरीरगः ।
मूर्तिरुग्रस्य सा ज्ञेया परमात्मबुभुत्सुभिः ॥ '

एवमेव—विकेशी, उमा, स्वाहा, शिवा, दिशः, सुवर्चला, रोहिणी, दीक्षा चेति क्रमेण पत्न्यः; अङ्गारकः, शुक्रः, षण्मुखः, मनोजवः, सर्गः, शनैश्चरः, बुधः, संतानश्चेति यथाक्रमं पुत्रास्तत्रैवैषां निरूपिताः ।

शिवपुराणेऽपि शतरुद्रीसंहिताया द्वितीयेऽध्याये—

' तस्य शंभोः परेशस्य मूर्त्यष्टकमयं जगत् ।
शर्वो भवस्तथा रुद्र उग्रो भीमः पशोः पतिः ।
ईशानश्च महादेवो मूर्त्तयश्चाष्ट विश्रुताः ॥
भूम्यम्भोऽग्निमरुद्व्योमक्षेत्रज्ञार्कनिशाकराः ।
अधिष्ठिताश्च शर्वाद्यैरष्टरूपैः शिवस्य हि ॥ '

इत्येवं नामास्पदानि निरूप्य भगवत उग्रस्य महिमाऽप्येवं निरूपितः—

' बहिरन्तर्जगद् विश्वं बिभर्ति स्पन्दते स्वयम् ।
उग्र इत्युच्यते सद्भी रूपमुग्रस्य सत्प्रभो ?
आत्मा तस्याष्टमं रूपं शिवस्य परमात्मनः ॥ '–

ब्रह्माण्डे पुराणे पुनरस्य भूयान् विस्तरः । तत्रानुषङ्गपादस्य दशमेऽध्याये शतपथोक्तक्रमेणैवाख्यानमिदं दृश्यते । विशेषस्त्वयं यत् शतपथेऽग्नेः प्राधान्यमस्ति, अत्र पुनः शिवस्यैव । सोऽयं मन्ये महाभारतस्य कुमारोत्पत्तिवर्णनप्रभावः तत्र कुमारस्य शिवरूपत्वप्रतिपादने संरभदर्शनात् । ब्रह्माण्डेऽपि समुत्पन्नः कुमारः ब्रह्मणा रोदनकारणं पृष्टः स्वनाम जिज्ञासते, अतुष्यंश्च नामान्तराणि लभते, स्थानानि च निश्चाययते । ब्रह्मापि तस्मै–' रुद्रभवशर्वेशानपशुपतिभीमोग्रमहादेवे 'त्यष्टौ नामानि क्रमेण प्रयच्छति । ततश्च

' लब्ध्वा नामानि चैतानि ब्रह्माणं नीललोहितः—
प्रोवाच, नाम्नामेतेषां स्थानानि प्रदिशेति ह ॥ १८ ॥

इति स्थानानि पृष्टो ब्रह्मा नामानुरूपा अमूरष्टौ तनूः निर्ममौ—

' ततो विसृष्टास्तनव एषां नाम्नां स्वयंभुवा ।
सूर्यो जलं मही वायुर्वह्निराकाशमेव च ।
दीक्षिता ब्राह्मणाश्चन्द्र इत्येवं तेऽष्टधा तनुरिति ॥ '–

ततश्च यथापूर्वं तेषां नाम्नां स्थानानि सार्थवादं भूम्ना निर्दिश्य सप्तमीमुग्रतनुमेवमुपावर्णयत्—

' सप्तमं यन्मया प्रोक्तं नामोग्रेति तव प्रभो ।
तस्य नाम्नस्तनुस्तुभ्यं द्विजो भवति दीक्षितः ॥ '

दीक्षिते चैतन्यसंक्रममप्यस्यानन्तरमेवैवमुल्लिलेख—

' एवमुक्ते तु यत्तस्य चैतन्यं वै शरीरगम् ।
विवेश दीक्षितं तद्वै ब्रह्माणं सोमयाजिनम् ।
तावत्कालं स्मृतो विप्र उग्रो देवस्तु दीक्षितः ॥ '

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एवमेव—'तनुरुग्रात्मिका सा तु तेनोग्रो दीक्षितः स्मृतः ।
उग्रा तनुः सप्तमी या दीक्षितो ब्राह्मणः स्मृतः ॥

इत्युपक्रम्य सर्वेषामेतेषां पत्नीपुत्राँश्च यथापूर्वमुपादिदेश ।

कालिदासोऽपि पौराणिकममुं ज्ञानराशिं प्रतिपदमुपयुङ्क्ते ।

'ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव । ययातिरिवान्तरा तिष्ठ । [शाकु०]

गुरोर्यियक्षोः कपिलेन मेध्ये रसातलं संक्रमिते तुरङ्गे ।
तदर्थमुर्वीमवदारयद्भिः पूर्वैः किलायं परिवर्धितो नः ॥१३।३॥

ततोऽयमश्वः कपिलानुकारिणा गुरुस्त्वदीयस्य मयापहारितः ।
अलं प्रयत्नेन तवात्र मा निधाः पदं पदव्यां सगरस्य संततेः ॥३॥

अथोपयन्त्रा सदृशेन युक्तां स्कन्देन साक्षादिव देवसेनाम् ।७।–'

इत्येवमादिषु निदर्शनशतेषु कालिदासविदां नैतदप्रत्यक्षम् । दीक्षितस्य शिवरूपत्वमप्यसौ बहुशः प्रकरणान्तरेषु जुगुम्फ । तृतीये सर्गे रघुः सुरेन्द्रं ब्रूते—

'यथा च वृत्तान्तममुं सदोगतस्त्रिलोचनैकांशतया दुरासदः ।
तवैव संदेशहराद् विशांपतिः शृणोति लोकेश ! तथा विधीयताम् ॥

नवमे सर्गे च—'अजिनदण्डभृतं कुशमेखलां यतगिरं मृगशृङ्गपरिग्रहम् ।
अधिवसँस्तनुमध्वरदीक्षितामसमभासमभासयदीश्वरः ॥२१॥'

इत्येवमसौ दशरथं वर्णयते । अत्र दीक्षितवेशस्य शतपथब्राह्मणादिदृष्टप्रकारतयैव शब्दशो निर्वाहो दृश्यते । अष्टमूर्तिवर्णनं च कालिदासस्य सर्वस्वभूतो विषयः । नाटकत्रये रघुवंशे च स भगवन्तं शिवमेव स्तौति । तत्रापि च—

'अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः' इति मालविकाग्निमित्रे,

'या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री'त्यादिक्रमेण च शाकुन्तले शिवस्याष्टमूर्तिरूपमेव स्तौति । अन्यत्रापि—

'तत्राग्निमाधाय समित्समिद्धं स्वमेव मूर्त्यन्तरमष्टमूर्तिः [कुमार० १]

'अवेहि मां किङ्करमष्टमूर्तेः—' इत्यादिषु कालिदासः शिवस्याष्टमूर्तित्वमुल्लिखति । ब्रह्मा देवान् तारकध्वंसोपायमुपदिशन् शिवस्याष्टमूर्तिरूपमेव मनसिकृत्यैवं ब्रूते—

'उभे एव क्षमे वोढुमुभयोर्बीजमाहितम् ।
सा वा शंभोस्तदीया वा मूर्तिर्जलमयी मम ॥ [कुमार० २]

तदेवं कालिदास आगमिकमिदमष्टमूर्तिरहस्यमुपजीव्येव शतशो व्यापृतः । सोऽयमत्र गुरुशिष्यप्रकरणे किमिवेदं विस्मरेत् । ततोऽस्य—'चैतन्यमुग्रादिव दीक्षितेने'ति पाठ एवाभिमतः । एतेन च गुरुशिष्ययोर्विनयसमुदाचारोऽपि नितरां स्पष्टीभवति । न हि तत्र ताटस्थ्येन वार्तासंवादालापादिमात्रेण शास्त्रार्थविचारः प्रावर्तत, प्रत्युत साधनचतुष्टयसंपत्त्या समुद्रग्रतरेषु तेषु शक्तिपातरूपश्चैतन्यसमावेश एवामहीयत । तादृशे च विनयक्रमे दीक्षितोग्रौपम्यमेव सामञ्जस्यमावहति, न तु ताटस्थ्यकश्मलं सूर्यज्योतिर्जीव-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लोकौपम्यम्। एतांश्चागमिकान् भावान् हृदयेकृत्य दर्पणकारोऽभिप्रायमिममधिकं स्पष्टयति—' अष्टमूर्तेः स्वमूर्तिभेदेन नामविभागः । तद्यथा–सूर्ये रुद्रः, जले भवः, भूमौ शर्वः, वायावीशानः, अग्नौ पशुपतिः, आकाशे भीमः, दीक्षित उग्रः, चन्द्रमसि महादेव ' इति । दीक्षितस्योग्र इति संज्ञा महिम्मश्रुतौ च— ' भवः शर्वो रुद्रः पशुपतिरित्यादिना । ज्ञानं यतस्त्वां प्रविवेश पुण्यं चैतन्यमुग्रादिव यायजूकमि 'ति पाठे यजजपदशां यङ्—इत्युक्तं ।।, पूर्वमुद्धृते ९।२१ पद्येऽपि दर्पणकृत्—' दीक्षितमीश्वरोऽनुप्रविशतीत्यागम '—इति तमेव संप्रदायं स्मरति । ईश्वरशब्दोऽत्र ' महेश्वरस्त्र्यम्बक एव, यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षर ' इति कालिदासोक्त्यैव शिवार्थकः ।

प्रकरणेऽत्र ' सर्व ' इति शतपथपाठस्य पुराणेषु ' शर्व ' इति परिणतिः शोच्या । एवमेव शतपथे वायोरुग्रत्वाभिधानात् पुराणेषु तस्येशानत्वाभिधानम्, आत्मनश्चोग्रत्वाभिधानमपि सङ्गमनीयम्।

दर्पकृता चात्र संप्रदायमवगच्छतापि योऽयं ' चैतन्यमर्कादिव जीवलोक ' इति पाठः प्राथम्येनाभिमतस्तत्र रघुवंशस्य गुरुशिष्यसंप्रदायमेव कारणं मन्महे ।

तृतीयसर्गस्य ' दिनेषु गच्छत्स्वि 'त्यादेः पद्यस्योत्तरार्धपाठान्तरमेवमत्र दर्शितं—

' समुद्गमो वारणदन्तकोषयोर्बभार कान्ति गवलापिधानयोः । '

इति । निर्णयसागरप्रतावप्येद् दत्तमस्ति । न तु दर्पणनाम्ना ।

(३) **श्लोकपाठान्तराणि**— । एतानि हि पाठान्तराणि वर्णनप्रसङ्गेष्वेव बाहुल्यभाञ्जि । तत्र मल्लिनाथपाठदृशा त्रिविधा स्थितिः (१) मल्लिनाथादृतान्येव प्राधान्येन व्याख्यायान्ते तद्रूपान्तराणि, (२) स्वाभिमतानां व्याख्यानेषु मल्लिनाथादृतानां रुपान्तरतया प्रदर्शनानि, (३) मल्लिनाथाविदितानां च क्षेपकाक्षेपकत्वाभ्यां व्याख्यानानि । एतानि चात्र कात्स्न्र्येन यथालाभमुपलम्भयामहे—

पञ्चमसर्गस्य—संहारविक्षेपलघुक्रियेणेति ४५—तमस्य पद्यस्यान्ते पद्यमिदं पाठान्तरतया प्रदर्शयति । तथाहि पाठान्तरम्—

' स भोगिभोगाधिकपीवरेण हस्तेन तीराभिमुखः सशब्दम् ।
संवेष्टितार्धप्रयुतेन दीर्घाश्चिक्षेप वारीपरिघानिवोर्मीन् ।।

भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः । परिघोऽर्गला ' इति ।

अतः परं ४६—पद्यमेवंरूपमुपादत्ते—

' कारण्डवश्लिष्टमृदुप्रताना पुलिन्दयोषाम्बुविहारकाञ्चीः ।
कर्षन् स शैवाललता नदीष्णः प्रौढावलग्नास्तटमुत्ससर्प ।।

तत्रैव च—शैलोपमः शैवलमञ्जरीणां जालानि कर्षन्नुरसा स पश्चादिति मल्लिनाथपठितं पद्यं पाठान्तरतया दर्शयति । पृथक्श्लोकतया च व्याख्याति ।

षष्ठे सर्गे—असौ महाकालेति ३४—तमं पद्यं व्याख्याय मल्लिनाथादृष्टं पद्यं पाठान्तरतया दर्शयति—

' अत्र पाठान्तरमस्ति—

असौ महाकालनिकेतनस्य चन्द्रार्धमौलेर्निवसन्नदूरे ।
दिवापि जालान्तरचन्द्रिकायां नारीमुखस्पर्शसुखानि भुङ्क्ते ।।

अनेन बहुस्त्रीकता सूचिता ।'

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ज्याघातरेखे सुभुजो भुजाभ्यामिति ५५ तमे पद्ये मल्लिनाथादृष्टं पाठान्तरमेवं दर्शयति—

'रणेऽप्यमित्रीणतया प्रकाशः शरासनज्यानिकषो(षौ) भुजाभ्याम् ।
विष्पष्टलेखौ रिपुविक्रमस्य निर्वाणमार्गाविव यो बिभर्त्ति ॥

इति । व्याख्याति चांशतः । निर्णयसागरीये संस्करणेऽपि चैतन्नास्ति निर्दिष्टम् । 'अथोरगाख्यस्य पुरस्येति ५९–पद्यस्य क्षेपकरूपेण पद्यान्तरमिदं दर्शयति—

'अथाधिगम्योरगराजकल्पमाचारपूतोभयवंशदीपम् ।
पतिं पुरस्योरगपूर्वनाम्नः शुद्धान्तरक्ष्या जगदे कुमारी ॥

व्याख्याति च । न चैतन्निर्णयसागरीये संस्करणे दर्शितम् । एतावन्त्येव पाठान्तराणि षष्ठे सर्गे दर्पणकृददर्शयत् ।

सप्तमे सर्गे पाठान्तराणि दर्पणे न लभ्यन्ते निर्णयसागरसंस्करणे ११ पद्यानन्तरं 'स्तनन्धयन्त'-मिति पद्यमेकं पाठान्तरत्वेन दर्शितम् । तदत्र नास्ति । अष्टमे सर्गे 'अजिताधिगमाय पार्थिव' इत्यादि १७ पद्यान्ते पाठान्तरतया—

'समदृश्यत भूपतिर्युवा सचिवैः प्रत्यहमर्थसिद्धये ।
अपुनर्जननोपपत्तये प्रवयाः संयुयुजे च योगिभिः ॥'

पद्यमिदं पठति व्याख्याति च । न चैतन्मल्लिनाथे दृश्यते । नापि नि०सा०संस्करणे । नि० सा० संस्करणे १९ पद्यानन्तरं 'नयचक्षुरजो दिदृक्षये'त्यादिः श्लोकः पाठान्तरतया प्रदर्शितः । सोऽयमत्र दर्पणे नास्ति । अस्मिन्नेव सर्गे—'मनसापि न विप्रियं मया'—इत्यादि पद्यानन्तरं मल्लिनाथः

'तदपोहितुमर्हसि प्रिये प्रतिबोधेन विषदमाशु मे ।
ज्वलितेन गुहागतं तमस्तुहिनाद्रेरिव नक्तमोषधिः ॥'—

पद्यमिदं व्याख्यत् । तदिदं दर्पणे नास्ति ।

नवमे सर्गे वसन्तवर्णनमस्ति । तत्र पाठान्तरप्राचुर्यमस्ति । तदिदमत्र कार्त्स्न्येन प्रतिपादयामः—

'जघननिर्विषयीकृतमेखलाननुचिताश्रुविलुप्तविशेषकान् ।
स रिपुदारगणानकरोद् बलादनलकानलकाधिपविक्रमः ॥'

पद्यमिदं दशमपद्यतया दर्पणे लभ्यते । नि०सा०संस्करणानुसारं सुमतिविजयेनाप्येतद् व्याख्यातमस्ति । मल्लिनाथे तु न दृश्यते । वस्तुतः पुनरुक्तयमकेमतत् २९–तमेन—

'व्रणगुरुप्रमदाधरदुःसहं जघननिर्विषयीकृतमेखलम् ।
न खलु तावदशेषमपोहितुं रविरलं विरलं कृतवान् हिमम् ॥'

पद्येनैतेन । मल्लिनाथो हेमाद्रिश्चेत्युभावपि पद्यमिदं व्याख्यातवन्तौ । न च कालिदास एकमेव यमकं द्विरुपयुञ्ज्यात्मनोऽशक्तिं प्रदर्शयेदिति कस्यचिदाधुनिकस्य पाण्डित्यकण्डूरियम् ।

'हिमविवर्णितचन्दनपल्लवं विरहयन् मलयाद्रिमुदङ्मुखः ।
विहगयोः कृपयेव शनैर्ययौ रविरहर्विरहध्रुवभेदयोः ॥

मल्लिनाथः पद्यमिदं नादत्त । दिनकरमिश्रैरेतद् व्याख्यातमिति नि०सा०संस्करणतो ज्ञायते । वस्तुतस्तु—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

'जिगमिषुर्धनदाध्युषितां दिशं रथयुजा परिवर्तितवाहनः ।
दिनमुखानि रविर्हिमनिग्रहैर्विमलयन् मलयन्नगमत्यजत् ॥'

इति २६—पद्येन गतार्थत्वात् कालिदासस्य तादृग्विधोत्प्रेक्षापराङ्मुखत्वाच्च प्रक्षिप्तमेवैतत् ।

'परभृता मदनक्षतचेतसां प्रियसखी लघुवागिव योषिताम् ।
प्रियतमानकरोत् कलहान्तरे मृदुरवा दुरवापसमागमम् ॥३०॥'

मल्लिनाथः पद्यमिदं नादत्त । एतच्च—

'अरुणरागनिषेधिभिरंशुकैः श्रवणलब्धपदैश्च यवाङ्कुरैः ।
परभृताविरुतैश्च विलासिनः स्मरबलैरबलैकरसाः कृताः ॥४३॥ इति पद्यात्—

'त्यजत मानमलं बत विग्रहैर्न पुनरेति गतं चतुरं वयः ।
परभृताभिरितीव निवेदिते स्मरमते रमते स्म वधूजनः ॥५८॥

इति पद्याच्च गतार्थत्वात् पुनरुक्तमेव ।

'दशनचन्द्रिकया व्यवभासितं हसितमासवगन्धि मधोरिव ।
बकुलपुष्पमसेवत षट्पदैः शुचिरसं चिरसंचितमीप्सुभिः ॥३४॥'

मल्लिनाथः पद्यमिदं नादत्त । एतच्च—

'सुवदना-वदना-सवसंभृतस्तदनुवादिगुणः कुसुमोत्करः ।
मधुकरैरकरोन्मधुलोलुपैर्बकुलमाकुलमायतपङ्क्तिभिः ॥३६॥'

इति पद्यरत्नेन पुनरुक्तार्थतया प्रक्षिप्तमेव ।

'सुरभिसंगमजं वनमालया नवपलाशमधार्यत भङ्गुरम् ।
रमणदत्तमिवार्द्रनखक्षतं प्रमदया मदयापितलज्जया ॥३७॥

उपहितं शिशिरापगमश्रिया मुकुलजालमशोभत किंशुके ।
प्रणयिनीव नखक्षतमण्डनं प्रमदया मदयापितलज्जया ॥३८॥'

अनयोरेकतरं प्रक्षिप्तमेवेति यमकपौनरुक्त्या नियतम् । तत्र मल्लिनाथः 'सुरभिसङ्गमजमि'ति विहाय 'उपहितमित्यादि व्याकरोति, दर्पणकारस्तु 'सुरभिसङ्गमे'त्यादि व्याख्याय 'उपहिते'त्याद्यपि तत्संदर्भेऽज्ञातो व्याकरोति । 'शेषं पूर्ववदि'ति च तत्र पूर्वपद्यानुवृत्तिं दर्शयति । वस्तुतस्त्वत्र द्वितीयस्यैव पद्यस्य प्रक्षिप्तत्वं मान्यम् । तत्र च प्रमाणं व्यक्तिविवेके प्रथमस्यैवोद्धरणम् । दर्पणकृतोऽपि च तद् विदितम् । स ह्येतत्पद्यव्याख्याने व्यक्तिविवेकमुल्लिखति । तत्र व्यक्तिविवेके [चौखंभासंस्करणस्य ३०९ पृष्ठे] (तत्) पौनरुक्त्यमत्रैवं दर्शितं (दर्पणे यदुल्लिखितमस्ति) 'सुरभि००० इत्यार्द्रनखक्षत-विशेषणं, प्रमदार्थः, तद्विशेषणं चेति त्रितयमपि पुनरुक्तम् । सुरभिशब्दात् पुंस्त्वविशिष्टात् रमणार्थोऽवगम्यते वनमालाशब्दाच्च स्त्रीत्वविशिष्टात् कामिन्यर्थः, तद्विशेषणोपादानं तु व्यर्थमेव, व्यावर्त्याभावात् । तेन यथा कामुकसङ्गमसमुत्थमङ्गनया लोहितं वक्रं च नखक्षतं धार्यते तद्वद् वनमालया वसन्तसमागमजं नवं भङ्गुरं च पलाशमधार्यतेति समुदायादयमर्थः सचेतसामुन्मिषत्येव । यतोऽलङ्कारान्तरोपकृताल्लिङ्ग-विशेषनिर्देशादेवार्थानां स्त्रीत्वपुंस्त्वानुमितिरनुमतैव महाकवीनाम् । यथा—'ऐन्द्रं धनुः'०० इत्यत्र शरदो नायिकात्वस्येन्दो रवेश्च नायकप्रतिनायकत्वयोरभिव्यक्तिः ।' व्यक्तिविवेकव्याख्यानमपि तथ्यमिदं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रमाणयति । तथाहि—'आर्द्रनखक्षतमिवेति भिन्नक्रम इव शब्दः । यापितो गमितो निर्वाहित इत्यर्थः । उपमानादेवाकारसादृश्येन पलाशं प्रति दीयमानार्द्रनखक्षतमित्यस्मात्०० ॥'

अनयोस्तात्पर्यमीमांसया पुनः प्रथमे पुरुषकर्तृकस्य प्रमदाप्रतीकाश्रितस्य नखक्षतस्य, द्वितीये च प्रमदाकर्तृकस्य पुरुषप्रतीकाश्रितस्य तस्य वाक्यार्थविषयता समुदेति । तत्र द्वितीये शिशिरापगमपदेन वसन्तारम्भमात्रं सूच्यते, 'तपात्यये वारिभिरुक्षिता नवैर्भुवा सहोष्माणममुञ्चदूर्ध्वगम्', 'करीव सिक्तं पृषतैः पयोमुचां शुचिव्यपाये वनराजिपल्वलम्', 'कामो वसन्तात्ययमन्दवीर्यः केशेषु लेभे बलमङ्गनाना'-मित्याद्युदाहरणेष्वत्ययादिशब्दप्रतिपादितानामृतूनां प्रारब्धमात्रत्वस्यैवानुभविकत्वात् । एवञ्चात्र शिशिरापगमश्रीपदेन प्रतिपाद्यमानाया वसन्तश्रियाः शैशवमात्रं प्रतीयेत, न तु प्रगल्भं वयः । तथा च सति तस्यास्तादृशप्रमदौपम्यमनुचितमेव । किं च शिशिरापगमश्रीवाच्याया मधुश्रिया वसन्तपत्नीत्वमेवागमप्रमितम् । तथा हि—मणिद्वीपवर्णनप्रस्तावे कांस्यताम्रसालयोर्मध्यवर्तिन्यां कल्पवाटिकायां वसन्तस्थितिं प्रतिपादयता श्रीमद्देवीभागवतकृता मधुश्रीर्माधवश्रीश्चेत्यस्य द्वे पत्न्यौ प्रतिपादिते । यथा—

'कांस्यतालादुत्तरे तु ताम्रसालः प्रकीर्तितः ।।३४।।
द्वयोस्तु सालयोर्मध्ये संप्रोक्ता कल्पवाटिका ।।३५।।
तद्वनं रक्षितं राजन् वसन्तेनर्तुनाऽनिशम् ।।३६।।
मधुश्रीर्माधवश्रीश्च द्वे भार्ये तस्य सम्मते ।।३८।। [१२ स्कं. १० अध्या.]

एवमिह किंशुकेन मधुश्रियाः समागमवर्णनस्यागमविरोधितया, परस्त्रियाः पुरुषान्तरे प्रकटसंभोगस्यानुपपन्नतया च सचेतसां प्रवृत्तिरसंभवैव । किं च महाकविरसौ रसध्वनिमेवोपनिबद्धुं सर्वत्र कृतसंरम्भो दृष्टः । कुमारसंभवे तिर्यक्संभोगचित्रणेऽप्यसौ विभावानौचित्यं परिहरन् तथाऽनुभूतः । अभिसारिकावर्णनेष्वपि नास्य तथा प्रवृत्तिः । ततोऽनुचितविभावममुं रसाभासमसौ किमिव निबध्नीयात् । अस्तु वा तथा, तथापि मदयापितलज्जात्वेऽपि प्रमदानां पुरुषेषु नखक्षतप्रवृत्तिः कुत्सितैव । किं च सर्व एव लताद्रुमा वनस्थलीमधुश्रियोर्भूषणतयैव कालिदासाभिमताः, न कामुकतया । स हि—

'सुरभिगन्धिषु शुश्रुविरे गिरः कुसुमितासु मिता वनराजिषु' [रघु. ९।३४]
'न खलु शोभयति स्म वनस्थलीं न तिलकस्तिलकः प्रमदामिव' [रघु. ४१]
'लग्नद्विरेफाञ्जनभक्तिचित्रं मुखे मधुश्रीस्तिलकं प्रकाश्य ।
रागेण बालारुणकोमलेन चूतप्रवालोष्ठमलञ्चकार ॥' [कुमार ३]
'रक्ताशोक–रुचा विशेषितगुणो बिम्बाधरालक्तकः
प्रत्याख्यातविशेषकं कुरबकं श्यामावदातारुणम् ।
आक्रान्ता तिलकक्रिया च तिलकैर्लग्नद्विरेफाञ्जनैः
सावज्ञेव मुखप्रसाधनविधौ श्रीर्माधवी योषिताम् । [मालविका०]

इत्येवमादिषु काव्येषु संवादिनीमेव प्रतिपत्तिमाश्रित्य तथा दृष्टचरः । तत् कथमिवासावत्र किंशुकस्य प्रकृतिविरुद्धं मधुश्रीकामुकत्वमुपवर्णयेत् ?

एवमिह 'उपहितमि'त्यादेरेव पद्यस्य प्रक्षिप्तत्वमातिष्ठामहे । 'सुरभिसङ्गमजमि'त्यादेश्च पद्यस्य प्रागुक्तसमस्तानुपपत्तिशामकतया प्रथमपाठत्वम् । कुमारसंभवे चास्य संवादिचित्रमेवमुपलभ्यते—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

'बालेन्दुवक्राण्यविकासभावाद् बभुः पलाशान्यतिलोहितानि ।
सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम् ॥३॥

अन्यानि च पाठान्तराण्येवं लभ्यन्ते—

'लघयति स्म न पत्यपराधजां न सहकारतरुस्तरुणीभृताम् ।
कुसुमितो नमितोऽलिभिरुन्मदैः स्मरसमाधिसमाधिकरोषिताम् ॥४५॥

पद्यमिदं मल्लिनाथो नादत्ते । नि०सा०संस्करणे तु पाठान्तरत्वेनाशुद्धतया निर्दिष्टम् । तदिदम्—

'अभिनयान् परिचेतुमिवोद्यता मलयमारुतकम्पितपल्लवा ।
अमदयत् सहकारलता मनः सकलिकाकलिकामजितामपि ॥

इत्यनेन दर्पणानुसारमेकत्रिंशेन मल्लिनाथानुसारं च त्रयस्त्रिंशेन पद्येनाधरीकृतार्थत्वात् पुनरुक्तप्रायमेव । न च वसन्तसर्वस्वमभिमन्यमानोऽपि सहकारं कालिदासो बकुलादिपुच्छलग्नं चिकीर्षेत् । ततः कस्यचिदाधुनिकस्यैवैतत् पाण्डित्यमिति भाति ।

अतः परं क्षेपकतया स्वीकृत्य व्याख्याताः षड् श्लोका दर्पणे लभ्यन्ते । तथा हि—

'रसयति स्मरसातिशयात् सुधाभ्रमकरन्मकरन्दमलिव्रजः ।
सह निजाङ्गनयाभिसमुच्छ्वसन् कुसुमकोमलकोषनिषण्णया ॥ ४६ ॥

विहरति स्म रतिस्मरसुन्दरं तरुतलेष्वधिपुष्पसुगन्धिषु ।
मिथुनमाशुगचञ्चलमञ्जरीव्यजनवीजनवीतरतिश्रमम् ॥ ४७ ॥

विशदचन्द्रकरं सुखमारुतं कुसुमितद्रुममुन्मदकोकिलम् ।
तदुपभोगरसं हिमवर्षिणोऽत्ययमृतोरमृतोपमतां ययौ ॥ ४८ ॥

तिलकमस्तकहर्म्यकृतास्पदैः कुसुममध्वनुषङ्गसुगन्धिभिः ।
कलमगीयत भृङ्गविलासिनां स्मरयुतैरयुतैरबलासखैः ॥ ४९ ॥

गमयितुं प्रभुरेष सुखेन मां न महतीं बत पान्थवधूजनः ।
इति दयात इवाभवदायता न रजनी रजनीशवती मधौ ॥ ५० ॥

अनलसान्यभृताऽनलसान्मनः कमलधूलिभृता मरुतेरिता ।
कुसुमभारनताध्वगयोषितामसमशोकमशोकलता मनः ॥ ५१ ॥'

अत्र ३, ५, ६ चेति श्लोका निर्णयसागरसंस्करणे पाठान्तरत्वेन दर्शिताः । मल्लिनाथस्त्वेषामनभिज्ञः । शेषा दर्पणोपात्तप्रतीकानुसारमस्माभिर्योजिताः । तत्र प्रथमे पद्ये टीकाप्रतीकानुरोधाद् द्वितीयार्धस्य प्रथमार्धतया कल्पनाया असंभवाद्, योजनायाश्चान्यथाऽसंभवात् प्रकरणमनपेक्ष्यापि यमकं पूर्वार्द्ध एव योजितम् । पद्यमिदं कुमारसंभवस्य 'द्वन्द्वानि भावं क्रियया विवव्रु'रिति संदर्भच्छाययात्रापादितम् । न ह्यस्य तथाविधं किञ्चिदत्र प्रयोजनमस्ति । कुमारसंभवे वसन्तवर्णनाद् रतिप्रवणतोदय एवाभिप्रेतः । तदर्थमेव तत्र तिरश्चामपि ते ते भावाः ससंरम्भं प्रतिपादिताः । अत्र केवलं मृगयावसरौपयिकत्वमात्रं ततोऽभिप्रेतम्, अतो नात्र तादृशां भावानां प्रतिपादनं नितरामावश्यकम् । तृतीये पद्ये 'अत्यय' शब्दे नपुंसकलिङ्गता कोषविरुद्धा । सर्वत्रैवास्य पुंपठिततयैवोपलम्भात् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

५०–पद्ये पाठान्तरतया निम्नलिखितं पद्यं दर्शितमस्ति—

'उपययौ तनुतां मधुखण्डिता हिमकरोदयपाण्डुमुखच्छविः ।
गमयितुं प्रियसंजनितां व्यथामसहया सह यामवती स्त्रिया ॥' इति

मल्लिनाथस्यैतदेव प्राधान्येनाभिमतम् । तत्रोत्तरार्धपाठस्त्वीदृशः—

'सदृशमिष्टसमागमनिर्वृतिं वनितयाऽनितया रजनीवधूः ।' इति

तदत्र क्षेपकत्वं पाठान्तरवत्त्वं चेति विप्रतिषिद्धम् । ततोऽत्रोभयोरेव प्रक्षिप्तत्वमन्यतरस्य मूलत्वं वा नियतम् । तत्त्वेऽप्युत्तरार्धद्वयमध्ये कस्यचिदेकस्यैव मूलत्वे कतरस्य प्रक्षिप्तत्वं मान्यमिति निश्चेयम् । तदित्थं प्रश्नत्रये 'उपहिते'त्यादेर्हेमाद्रिमल्लिनाथोभयविदिततया मल्लिनाथे च प्रधानभावेन पठितया तदितरस्यैव प्रक्षिप्तत्वं सुलभम् । मीमांस्यमाने चानयोरन्तरङ्गे प्रथमे भावप्रसादाधिक्येऽपि द्वितीयवच्चर्वणा-सौभगस्याभावान् मूलतां विश्वसितुं न क्षमामहे । द्वितीये तु—

'निद्रावशेन भवताप्यनवेक्ष्यमाणा पर्युत्सुकत्वमबला निशि खण्डितेव ।
लक्ष्मीर्विनोदयति येन दिगन्तलम्बी सोऽपि त्वदाननरुचिं विजहाति चन्द्रः ॥'

इत्यादिषु दृष्टचरस्य भावसौकुमार्यस्य स्फुटमुपलब्धेस्तां प्रत्येतुमुद्युक्ता अपि रजन्या मधुखण्डितात्वे हेतुं न विद्मः । न हि दिवा प्रवृत्तो मधुर्नक्तमात्मानमुपसंहरति, येनास्य विरहे यामवत्या विमनायितात्वं प्रियसमागमनिर्वृतिनैराश्येन सर्वथैव भग्नेच्छात्वं वा मन्यते । किं च खण्डिता दिनकरस्योदये तादृशं वैवर्ण्यमश्नुते, न तु हिमकरस्य । हिमकरोदये सति प्रियसमागमाभावे विरहोत्कण्ठितात्वमस्या उचितम्, न तु खण्डितात्वम् । तदानीमस्या आशाबन्धस्यात्यन्तमुच्छेदाभावात् । पूर्वोक्तपद्येऽपि प्रियसादृश्यवता चन्द्रेण विनोदवर्णनात् पूर्वमुत्कण्ठितात्वस्य तस्याप्यस्तमनात् प्रियनैराश्येनैव खण्डितात्वस्य चानुभूतत्वात् । न च खण्डितायां तानवं वर्ण्यते । रूपनिन्दाया आत्मग्लानिप्रतिबिम्बरूपायाः, प्रियविषयामर्षस्यैव च तत्र वर्णनं कविभिराद्रियते । यत्र च खण्डितात्वं वर्ण्यते तत्र नायिकान्तरव्यतिकरो नायकस्यावश्यमु-पादीयते । नास्ति चात्र तथाविधं किञ्चित् । तदित्थमत्र खण्डितात्वमेव रजन्या असिद्धं तदा तदनुरूपस्य 'सदृशे'त्यादेरुत्तरार्धवाक्यार्थस्याप्यकुतोमुखीनत्वमापतितम् । किं चास्यैव मूलपाठत्वाभ्युपगमे 'अनितये'-त्यत्र क्तान्ताद् एतेर्नञा निर्मितम् अनितेति पदं रसवासनामत्यूह्य यमकैकपरतां कवेर्द्योतयते, द्योतयते च यमकस्य पृथग्यत्ननिर्वर्त्यताम् । ततश्चास्य रसभङ्गदोषो दुष्परिहर एव । वस्तुतोऽत्र सुरतद्वारा विगलित-दर्पतैव खण्डितात्वम् । न त्वन्यासक्तेन प्रियेण भग्नाशता । सुरतमृदिताया एव नायिकायास्तन्निम्नः कविषु प्रसिद्धः । अस्मिंश्च पक्षे पूर्वोक्तापत्तिविगमात् लब्धप्रतिष्ठे 'गमयितु'मित्यादेरेवोत्तरार्धस्य योजना कर्तुं युज्यते, तत एव प्रियेत्यादेरसहात्वस्य च स्त्रीविशेषणस्य संगतिः, सुरतमृदितात्वस्य रजन्या-मारोपे मुखशब्दाल्लब्धयोरारम्भाननार्थयोरप्यभेदाध्यवसाये 'हिमकरोदयेन पाण्डुरारम्भच्छविरेवाननच्छ-विर्यस्या' इत्यर्थलाभे 'हिमेत्यादे'र्नायिकासाधारणस्य रजनीविशेषणस्याप्युपपत्तिः, अपुष्टस्य च वधूशब्दार्थस्य विरतिः । सहोक्त्या च तादृशरसभङ्गदोषोऽप्युपशाम्यति । अतो भावमहिमानमनुरुन्धानाः पाठान्तरत्वेन दर्शितमेव पद्यं मूलतयोरीकुर्मः । मल्लिनाथादृतस्य च उत्तरार्धस्य पूर्वार्धमन्यदेव किंचित् १२–शतकीयासु प्रतिषु विमृग्यम् ।

नवमसर्गान्ते च श्लोकद्वयं पाठान्तरत्वेन दर्शितमस्ति । तथा हि—

'तदर्थमर्थज्ञ ! गते गतत्रपः किमेष ते वध्यजनोऽनुतिष्ठतु ।
स वह्निसंस्कारमयाचतात्मनः सदारसूनोर्विदधे च तं नृपः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समेयिवान् रघुवृषभोऽथ सैनिकैः स्वमन्दिरं शिथिलधृतिर्निवर्तितः ।
मनोगतं गुरुमृषिशापमुद्वहन् क्षयानलं जलधिरिवान्तकं पदम् ॥ '

इति। व्याख्या त्वनयोर्नास्ति! इत्थमत्र सर्वाधिकपाठान्तरवतोऽस्य नवमस्य सर्गस्य सर्वाण्यपि पाठान्तराणि सम्यगनुशीलितानि । साम्प्रतं सर्गान्तरेष्वपि यत्र क्वचन प्राप्यानि तानि समासेन प्रस्तावयामः । तत्र दशमे सर्गे—' एकः कारणतस्तां तामवस्थां प्रतिपद्यसे ।

नानात्वं रागसंयोगात् स्फटिकस्येव ते स्मृतम् ॥ '

इति पद्यं क्षेपकतया दर्शितमस्ति । मल्लिनाथे तु नास्ति । नि० सा० प्रतौ तु पादटिप्पन्यां दर्शितं दृश्यते । दर्पणोऽत्र स्मृतमितिस्थाने ' स्थितमि 'ति पाठान्तरमपि दर्शयति एतच्च—

' रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते ।
देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः ॥ '

इति पद्याद् गतार्थतया प्रक्षिप्तमेव । किं च रागस्फटिकयोर्विश्वब्रह्मणोश्च सादृश्यं तथा न संघटते यथा माधुर्यादिरसपयसोस्तयोश्च । ब्रह्मण्युपाधिभूतमप्येतद् विश्वं तत्र तथा प्रश्लिष्टं यथाऽभिन्नतयैव प्रतिभासमानं कथञ्चिदेवाबाद्यैः शमदमादिप्रतिपत्तिसनाथैस्तर्कणाशतैः पृथक्तयाऽसत्यतया च स्थिरीक्रियते । नैवास्य लाक्षारञ्जयोरिव गाढतरा प्रश्लिष्टता रागस्फटिकाभ्यां प्रतिनिधातुं शम्यते । तदर्थं रसपयसोरेव सादृश्यं क्षमतां बिभर्ति । अतः पूर्वपद्यस्य प्रक्षिप्तत्वं युक्तियुक्तमेव ।

एकादशे सर्गे—

कौशिकेन स किल क्षितीश्वरो राममध्वरविघातशान्तये ।
काकपक्षधरमेत्य याचितस्तेजसां न हि वयः समीक्ष्यते ॥

इति प्रथमस्यैव पद्यस्य टीकान्ते पाठान्तरतया पद्यमिदं दर्शितमस्ति--

' सोऽधिगम्य किल गाधिसूनुना राममध्वरविघातशान्तये ।
काकपक्षधरमेत्य याचितस्तेजसां न हि वयः समीक्ष्यते ॥ '

इदं च कविकण्ठाभरणदर्शितक्रमेण पद्यनिर्माणाभ्यासे व्यापृतस्य कस्यचिद् रूपान्तरकरणचापलं दृश्यते ।

सप्तमस्य पद्यस्य व्याख्या कख-प्रतिभ्यां ज-प्रतौ भिन्ना दृश्यते । तत्र कख-प्रत्योः पाठान्तरत्वेन दर्शितं पद्यं ज-प्रतौ मूलत्वेन व्याख्यातम्, मूलत्वेन व्याख्यातं च पद्यं पाठान्तरत्वेन । तत्र मूलनिर्णयाय द्वितयमप्यनूद्यते—

कख-प्रतिस्था व्याख्या—' रेजतुरिति । महौजसः कौशिकस्य पदवीमनुद्रुतौ रामलक्ष्मणौ सुतरामतिशयेन रेजतुः । रुच किंत्तिङित्याम् । उत्तरां दिशि(शं) प्रस्थितस्य विवस्वतो रवेः पदवीमनुद्रुतौ मधुमाधवौ चैत्रवैशाखाविवेतितेजस्वितोक्तिः । वसन्ते हि सूर्यगतिवशात् स्वचिह्नान्वितौ तौ प्रवर्तेते । पाठान्तरम्—

मातृवर्गचरणस्पृशौ मुनेस्तौ प्रपद्य पदवीं महौजसः ।
रेजतुर्गतिवशप्रवर्तिनौ भास्करस्य मधुमाधवाविव ॥७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ज-प्रतौ पुनः—

"श्लो० मातृवर्गेति ॥७॥ टी० तौ रामलक्ष्मणौ महौजसो मुनेः कौशिकस्य पदवीं मार्गं प्रपद्य रेजतुः। किंविधौ तौ? मातृवर्गस्य चरणौ स्पृशतः तौ। कौ इव! मधुमाधवाविव चैत्रवैशाखाविव। यथा मधुमाधवौ चैत्रवैशाखौ भास्करस्य सूर्यस्य पदवीं प्रपद्य रे(रा)जेते। किं भूतस्य भास्करस्य? महत् ओजो यस्य तस्य। रेजतुरिति पाठान्तरम्। महौजसः०००००अनुद्रुतौ अनुगतौ ०००००० वर्तते।" [०००इति बिन्दवः कख-प्रतिपाठभिन्नपाठाय दत्ताज्ञेयाः]

अनयो'र्मातृवर्गे'त्यादि पद्यमेव मल्लिनाथो व्याख्याति। तत्र वशप्रवर्त्तिनाविति 'वशात् प्रवर्त्तिनौ'—इति व्यस्ततयाऽभिमतमितिभेदः। एतदेव च समुचितं प्रतिभाति, रेजतुरिति प्रतीकमादाय दत्ताद् व्याख्यानाद् अविकलस्य पद्यस्य निर्मातुमसंभवात्। न हि 'महौजसः कौशिकस्य पदवीमनुद्रुतौ रामलक्ष्मणौ सुतरां रेजतुः, उत्तरां प्रस्थितस्य विवस्वतो मधुमाधवाविवे'ति ततो निष्क्रान्तेनान्वयवाक्येन रथोद्धता योजयितुं शक्यते। विवस्वतः स्थाने रवेः द्वयोस्त्व ह्रस्वनिपातयोः संघटनयैव सा कथञ्चिदित्थं योजयितुं शक्यते—

रेजतुश्च सुतरामनुद्रुतौ कौशिकस्य पदवीं महौजसः।
प्रस्थितस्य मधुमाधवौ रवेरुत्तरामिव हि रामलक्ष्मणौ ॥'

सा चेयं क्रमेलकविसंष्ठुला महाकविप्रतिमां नार्हति स्प्रष्टुम्। कख-प्रत्योः पाटस्य विपर्ययकारणं तादृशादर्शप्रतिरेव स्यात्।

त्रयोदशस्यसर्गस्य सितासितचित्रणान्ते—

'तमिस्रया शुक्लनिशेव भिन्ना कुन्दस्रगिन्दीवरमालयेव।
कृत्तिर्हरेः कृष्णमृगत्वचेव भूतिः स्मरारेरिव कण्ठभासा ॥

पद्यकमिदं पाठान्तरनाम्ना प्रदत्तमस्ति। मल्लिनाथे त्वेतन्नास्ति।

चतुर्दशसर्गस्य—

भर्तुः प्रणाशादथ शोचनीयं दशान्तरं तत्र समं प्रपन्ने।
अपश्यतां दाशरथी जनन्यौ छेदादिवोपघ्नतरोर्व्रतत्यौ ॥

इत्यस्य प्रथमस्यैव पद्यस्यान्ते पद्यमिदं पाठान्तरत्वेन दत्तं दृश्यते—

'प्रोष्यागतौ तत्र ततः प्रयासादपश्यतां दाशरथी जनन्यौ।
कुमुद्वती-शीतमरीचिलेखे दिवेव रूपान्तरदुर्विभाव्ये ॥'

तदत्र दशरथस्य शरीरनाशाद् दिवातनस्येन्दुबिम्बस्य चात्यन्ताविलोपात् तयोरौपम्यमनौचित्यहेतु। नचात्रेन्दुबिम्बं केनापि शब्देनोपात्तमस्ति, यदभावे तदनुरक्तयोस्तदेकाश्रययोर्वा कुमुद्वतीचन्द्रलेखयो रूपान्तरत्वरूपो दशाविपर्ययोऽत्रोपनिबध्येत। किं च दम्पत्योः सम्बन्धस्तरुव्रतत्योरेव सम्बन्धेनोपमीयते। स्वयं कालिदास एवाष्टमे सर्गे—

'अथवा मम भाग्यविप्लवादशनिः कल्पित एष वेधसा।
यदनेन तरुर्न पातितः क्षपिता तद्विटपाश्रिता लता ॥

इति तरुलतयोर्व्यतिकरेणैव दाम्पत्यमुपमाति। शाकुन्तले च प्रथमेऽङ्के वृक्षसेकप्रस्तावे सोऽयमर्थो नितरां स्फुटः। यथा—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

'शकुन्तला—एष वातेरितपल्लवाङ्गुलीभिस्त्वरयतीव मां केसरवृक्षकः। यावदेनं संभावयामि [इति परिक्रामति]

प्रियंवदा—हला शकुन्तले! अत्रैव मुहूर्त्तं तिष्ठ। यावत्त्वयोपगतया लतासनाथ इव केसरवृक्षकः प्रतिभाति।

शकुन्तला—अतः खलु त्वं प्रियंवदासि।

प्रियंवदा—हला शकुन्तले इयं स्वयम्वरवधूः बालसहकारस्य त्वया कृतनामधेया वनज्योत्स्नेति नवमालिका।

शकुन्तला—हला रमणीये खलु काले एतस्य लता-पादपमिथुनस्य व्यतिकरः संवृत्तः। नवकुसुम-यौवना वनज्योत्स्ना बद्धपल्लवतयोपभोगक्षमः सहकारः। [इति पश्यन्ती तिष्ठति]

प्रियंवदा—[सस्मितम्] अनसूये। जानासि किंनिमित्तं शकुन्तला वनज्योत्स्नामतिमात्रं प्रेक्षत इति।

अनसूया—न खलु विभावयामि, कथय।

प्रियंवदा—यथा वनज्योत्स्नाऽनुरूपेण पादपेन संगता, अपि नामैवमहमप्यात्मनोऽनुरूपं वरं लभेयेति।'

पुनश्च चतुर्थेऽङ्के भगवतः कण्वस्योक्तौ—

संकल्पितं प्रथममेव मया त्वदर्थे भर्तारमात्मसदृशं सुकृतैर्गतासि।
चूतेन संश्रितवती नवमालिकेयमस्यामहं त्वयि च संप्रति वीतचिन्तः॥

अस्यामभिप्राय एष स्फुटः एव। मालविकाग्निमित्रेऽपि—

विसृज सुन्दरि! सङ्गमसाध्वसं ननु चिरात् प्रभृति प्रणयोन्मुखे।
परिगृहाण गते सहकारतां त्वमतिमुक्तलताचरितं मयि॥

इत्यनयोर्दाम्पत्यप्रतीकतया कालिदासेनोरीकृतिः स्फुटतरैव। ततः प्रकृतेऽप्यसावुपमामिमां नार्हति नोपादातुम्।

वस्तुतः करुणाप्रकरणे कालिदासो दाम्पत्यप्रतीकतयेमामेवोपमां सर्वत्रोपनिबध्नातीति कुमार-संभवादपि प्रतीयते। तत्रापि विलपन्ती रतिर्माधवं बोधयति—

'विधिना कृतमर्धवैशसं ननु मां कामवधे विमुञ्चता।
अनघापि हि संश्रिता द्रुमे गजभग्ने पतनाय वल्लरी॥ इति

शशिना पुनर्योगाय शर्वर्याः सहगमनाय च कौमुद्या उपमा कालिदासप्रिया। तथा हि—

'शशिनं पुनरेति शर्वरी दयिता द्वन्द्वचरं पतत्त्रिणम्।
इति तौ विरहान्तरक्षमौ कथमत्यन्तगता न मां दहेः॥

इति रघावजविलापे शशिशर्वर्योर्भूयोमिलनमुपनिबध्नाति,

'शशिना सह याति कौमुदी सह मेघेन तडित्प्रलीयते।
प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि॥'

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इति कुमारे रतिविलापे,

'तं स्वसा नागराजस्य कुमुदस्य कुमुद्वती ।
अन्वगात् कुमुदानन्दं शशाङ्कमिव कौमुदी ।।

इति च रघौ सप्तदशे सर्गे तिथिवृत्तान्ते शशिकौमुद्योः सहगमनम् ।

यद्यपि शशाङ्कलेखाया अपि दिवाधूसराया उपमा यत्र तत्र कालिदास उपनिबबन्ध यथा—

'शशाङ्कलेखामिव पश्यतो दिवा सचेतसः कस्य मनो न दूयते ।। '
इति [५।४८ कुमारे]

कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ।।
[५।७१ कुमारे]

'इति मदनवधूरुपप्लवान्तं व्यसनकृशा परिपालयाम्बभूव ।
शशिन इव दिवातनस्य लेखा किरणपरिक्षयधूसरा प्रदोषम् ।।
[४।४६ कुमारे]

'किमत्र चित्रं यदि विशाखे शशाङ्कलेखामनुवर्तेते [शाकु०]

तथापि नात्र कुत्रापि दम्पत्योरात्यन्तिको विरहस्तया प्रसाध्यते । एवमेव कुमुद्वतीचन्द्रयोरपि पुनर्योगायैवोपनिवेशस्तत्र तत्र संदर्भे दृश्यते । न तु करुणमूर्त्तयेऽत्यन्तविरहाय । किं च शशाङ्कलेखा-कुमुद्वत्योरुद्धृतैः प्रमाणैर्युवतीजनेनैवौपम्यं कवेर्विवक्षितम्, राममातरौ तु वृद्धे । तयोस्ताभ्यामिदं हार्दिकं न भवति । अतो मल्लिनाथादृतमेव पाठं मूलतया मन्महे । दर्पणे च तस्यैव तथा प्रतिष्ठा । पाठान्तरभूतं तु पद्यं कस्यचित् कालिदासहृदयमविदुषो वराकस्य बालिशभावः ।

पञ्चदशस्य सर्गस्य त्रयस्त्रिंशत्तमम्—

'रामस्य मधुरं वृत्तं गायन्तौ मातुरग्रतः ।
तद्वियोगव्यथां किञ्चिच्छिथिलीचक्रतुः सुतौ ।।

इति पद्यं दर्पणे नास्ति ।

साम्प्रतं **सञ्जीविनी–दर्पणयोः संवादविसंवादौ** लेशेनोपस्थापयामः । संवादः—

सञ्जीविनी	दर्पणः
(१) वधलज्जितः कथमस्त्रग्रहणपरः स्यामिति चेत् तत्राह–[५।५९ अवतरणिका]	'वधलज्जितः कथं ग्रहणपरः स्यामिति चेत् तत्राह' [५।५९ अ०]
(२) 'उभयपक्षविनीतनिद्रा' अत्र समासविषय उभशब्दस्थाने उभयशब्दप्रयोग एव 'साधुरित्यनुसंधेयम्'—इति नित्यग्रहणस्येदं प्रयोजनं वृत्तिविषय उभशब्दस्य प्रयोगो मा भूत् । उभयशब्दस्यैव यथा स्यात् । उभयपुत्र इत्यादिर्भवति इति ।' [५।७३]	'उभयपक्षेति सर्वादीनि सर्वनामानीत्यत्र कैयटः–उभादुदात्तो नित्यमिति नित्यग्रहणस्येदं प्रयोजनं वृत्तिविषये उभशब्दस्य प्रयोगो मा भूत् । उभयशब्दस्यैव यथा स्यात् । तेनोभयपुत्र इत्यादिर्भवतीति । कैयटविवरणे उभादुदात्तो नित्यमित्यत्रास्वरितत्वाद्वेत्येतन्नानुवर्तते —इति [५।७३]

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सञ्जीविनी	दर्पणः
(३) करस्थलीलारविन्दवत् त्वयाहं भ्रमयितव्य इति नृपाभिप्रायः। हस्तघूर्णकोऽयमपलक्षणक इतीन्दुमत्यभिप्रायः [६।१३]	'करस्थो लीलारविन्दवत् त्वयाहं भ्रमयितव्य इति नृपाभिप्रायः। हस्तघूर्णकोऽयमलक्षण इतीन्दुमत्यभिप्रायः [६।१३]'
(४) प्रावारोत्क्षेपच्छलेन 'अहं त्वां परिरप्स्य' इति नृपाभिप्रायः। गोपनीयं किञ्चिदङ्गेऽस्ति, ततोऽयं प्रावृणुत इतीन्दुमत्यभिप्रायः, [६।१४]।	'प्रावारोत्क्षेपणच्छलेन-'अहं त्वामेवं परिरप्स्य' इति नृपाभिप्रायः। गोपनीयं किञ्चिदङ्गेऽस्ति ततोऽयं प्रावृणुत' इतीन्दुमत्यभिप्रायः [६।१४]'
(५) पादाङ्गुलीनामाकुञ्चनेन त्वं मत्समीपमागच्छेति नृपाभिप्रायः, भूमिविलेखकोऽयमपलक्षणक इतीन्दुमत्याशयः। भूमिविलेखनं तु लक्ष्मीविनाशहेतुः। [६।१५]	'आकुञ्चनेन त्वं मत्समीपमागच्छेति नृपाशयः भूमिलेखकवद् हेमपीठलेखकोऽयमपलक्षण इतीन्दुमत्याशयः। भूमिलेखनं हि लक्ष्मीविनाश हेतुः। तथा लेखानिर्माणमुर्व्याम् [००० ६।१५]'
(६) त्वया वामाङ्गे निवेशितया सह एवं वार्तां करिष्य इति नृपाभिप्रायः। परं दृष्ट्वा पराङ्मुखोऽयं न कार्यकर्ता—इतीन्दुत्यभिप्रायः। [६।१६]	'त्वया वामाङ्गनिवेशितयाहमेवं वार्तां करिष्य इति नृपाकूतम्। परं दृष्ट्वा पराङ्मुखोऽयं न कार्यकर्ता इतीन्दुमत्यभिप्रायः [६।१६]'
(७) 'अहं तव नितम्बे एवं नखव्रणादीन दास्यामीति नृपाशयः, तृणच्छेदकवत् पत्रपाटकोऽयमपलक्षणक' इतीन्दुमत्याशयः। [६।१७]	'अहं तव नितम्ब एवं नखव्रणादीन् दास्य इति नृपाभिप्रायः। तृणच्छेदकवत् पत्रपाटकोऽयमपलक्षण इतीन्दुमत्याशयः [६।१७]'
(८) अहं त्वया सहैवं रंस्य इति नृपाभिप्रायः। अक्षचातुर्ये कापुरुषोऽयमितीन्दुमत्यभिप्रायः। 'अक्षैर्मा दीव्य' इति श्रुतिनिषेधात्[६।१८]	'अहं त्वया सहैवं रंस्ये-इति नृपाभिप्रायः। अक्षचातुर्यात् का पुरुष इतीन्दुमत्यभिप्रायः। अक्षैर्मादीव्य इति श्रुतिनिषेधात् [६।१८]
(९) किरीटवन्मम शिरसि स्थितामपि त्वां भारं न मन्य इति नृपाभिप्रायः। शिरसिन्यस्तहस्तोऽयमपलक्षण इतीन्दुमत्यभिप्रायः [६।१९]	'किरीटवन्मम शिरसि स्थितामपि त्वां भारं न मंस्य इति नृपाभिप्रायः। शिरसि न्यस्तहस्तोऽयमलक्षण इतीन्दुमत्यभिप्रायः [६।१९]
(१०) मथुरायां गङ्गाऽभावं सूचयत्यपिशब्दः। मथुरा-लवणासुरवधकाले शत्रुघ्नेन निर्मास्यत इति वक्ष्यति [१५।२८] तत्कथमधुना मथुरासंभव इति चिन्त्यम्। मथुरा मधुरापुरीति शब्दभेदः। यद्वा सान्या [६।४९]	'मथुरायां गङ्गाऽभावं सूचयत्यपिशब्दः। कालिन्दीतीरे मथुरा लवणासुरवधकाले शत्रुघ्नेन निर्मास्यत इति वक्ष्यति [१५।२९] तत्कथमधुना मथुरासंभव इति चिन्त्यम्। मथुरा मधुरापुरीति शब्दभेदप्रकाशो यद्वा साऽन्या [६।४८]
(११) उरगाख्यस्य पुरस्य पाण्ड्यदेशे कान्यकुब्जतीरवर्त्तिनागपुरस्य नाथमेत्य [६।५९]	'उरगाख्यस्य पुरस्य नागपुरस्य नाथमेत्य [६।५९]

हेमाद्रिमल्लिनाथावन्योन्यापरिचितौ। तथाप्यनयोरिमां भूमिमापन्नोऽक्षरसंवादो नूनं विस्मयास्पदम्। एतदप्यस्माकं संप्रदायकल्पनां द्रढयति। साहित्यविद्यायामभिनवगुप्तपादेभ्यः प्राप्तदीक्षस्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षेमेन्द्रस्य–'पठेत् समस्तान् किल कालिदासकृतप्रबन्धान्'—इति कवित्वोपयोगी प्रणयो हि शास्त्रार्थदुर्दिनेष्वपि कालिदासस्य काव्यानां सांप्रदायिकं रहस्यं रक्षितुं प्राभवदिति मन्महे। नो चेत् महामेधसोऽप्येते कल्पनान्तरं किमिति नाचिकीर्षन्। ते हि गुरुशिष्यसंप्रदायागता एव वाक्यावलीः कण्ठीकृत्योदाहरन्। न हीमे परिणतप्रज्ञाः पदावलीदरिद्रा यतोऽन्यतमस्य तास्चोरयेयुः। वासवदत्ता–कादम्बर्योः, रघुवंश–मृच्छकटिकयोरन्येष्वपि चैवम्विधेषु प्राचीनेषु काव्येषु स्थितिरियं तद्विदामपरोक्षैव। वस्तुतो विद्वत्समाजे प्रचलितानाभाणकप्रख्यान् भावान् परस्वममन्यमाना एवैते जगृहुः। टीकाकृतोरपि चैषैव पदवी विद्वद्भिः स्वीकार्या। साम्प्रतं हेमाद्रिमल्लिनाथयोर्विसंवादानपि प्रस्तुमः—

उद्धृतैः प्रमाणैः सिद्धमेवैतद् यद् दर्पणकृतो व्याख्यापद्धतिरन्वयमुखी नास्ति। स हि विशेष्यमात्रेण वाक्यार्थयोजनां कृत्वा विशेषणानि किंशब्दसाह्येन पश्चाद् विवृणोति। मल्लिनाथस्त्वान्वयमुखेनैव सर्वं व्याख्याति। द्वयोरप्यनयोः पद्धत्योरन्वयमुख्यां व्याख्यानसौकर्यमवश्यमनुभूयते, तच्च लघुत्रयीं, बृहत्त्रयीं शास्त्रान्तराणि च व्याचिकीर्षोर्मल्लिनाथसूरेर्नूनं समुचितमेव। बालास्तु तत्र नाधिकं प्रगल्भन्ते। दर्पणपद्धत्यां तु नैषा स्थितिः। सा हि सुगमा, शोभना, प्रायेण निखिलैरेव टीकान्तरकृद्भिरुपगता चास्ति। मल्लिनाथो विस्तरभीरुतया नामूलं लिख्यते किञ्चिदिति यत् प्रतिजज्ञे, तत्र तस्यात्ममतिरेव प्रमाणभूता। सा च दर्पणेऽनुशीलिते नूनमनेकत्र न्याय्यादपि विषयात् पराङ्मुखी दृश्यते। एतच्चात्र निदर्शनैः स्पष्टीक्रियते।

तृतीयस्य सर्गस्य 'लिपेर्यथावद् ग्रहणे'ति पद्ये मल्लिनाथो लिपिपदं—'लिपेः पञ्चाशद् वर्णात्मिकाया मातृकायाः' इयतैव व्याचख्यौ। के नु ते वर्णाः, कुतस्ते प्रारभ्यन्ते, कुत्र च पर्यवस्यन्तीति जिज्ञासायां शिक्षाग्रन्था एव व्युत्पित्सुशरणम्। दर्पणकृत् तु—'लिपेः अकारादिक्षकारान्तानामक्षराणामि'ति तद् विशदयति। येन व्याख्यातृकालिको मातृकेतिहासोऽप्याध्यक्ष्यमुपयाति। किं च मल्लिनाथोऽस्मिनेव पद्ये चूडाकर्मणः कृते वयःप्रभृतिमात्रं निर्दिशति। अस्मिँश्च व्याख्याने कौटल्यवचनमप्येवमुद्धृतमस्ति—'वृत्तचूलकर्मा लिपिं संख्यानं चोपयुञ्जीते'ति। मल्लिनाथोऽप्यन्यत्र कौटल्यमुद्धरति। अत्रानुद्धरन्नसौ चूडाकर्मलिपिविज्ञानयोः पारम्परिकं क्रमं निर्देष्टुं न प्रभवतीति नूनमुपालम्भपात्रम्।

'उमावृषाङ्कौ शरजन्मना यथे'त्यादि तृतीयसर्गीये पद्ये मल्लिनाथः पद्यान्तरस्मृतमपि व्यक्तिविवेकमत्र विस्मरति। दर्पणे न केवलो व्यक्तिविवेकः, यावत् साहित्यमीमांसापि स्मर्यते। व्यक्तिविवेके हि दोषज्ञग्रामणीस्तत्कविः श्रीमान् राजानको महिमाचार्यो द्वितीयं विमर्शमनेनैव पद्येन परिच्छिनत्ति। स हि तत्र—'ता एता दोषजातयो महाकवीनामपि दुर्लक्षाः। यथा—'उमावृषाङ्कौ' [पूर्णं पद्यम्] इत्यत्र यथातथाशब्दाभ्यामेव मागधीनृपयोः उमावृषाङ्कसाम्यं शचीपुरन्दरसाम्यं च, सुतस्य च शरजन्मजयन्तसादृश्यमवगमितमिति यत् तयोस्तस्य च पुनस्तत्सादृश्यवचनं तत् पुनरुक्तमेव। तथा–उपमानयोर्यो निर्देशक्रमः प्रक्रान्तः स उपमेययोः क्रमे भेदं नीत इति निर्देशप्रक्रमभेदो दोषः। तत एव च तत्समावित्यत्र अवाच्यवचनदोषोऽपि तावत् स्फुट एव, उपमानयोग्यत्वानुपपत्तेः। किं च तथाशब्दस्य यद् वचनं सोऽवाच्यवचनं दोषः। तद्व्यतिरेकेणाप्यर्थयोर्विपर्यासमात्रेण तदर्थावगतिसिद्धेः। तस्मादेवमत्र पाठः श्रेयान्—

'सुजन्मना तेन सुतेन तावुभौ ननन्दतुः सा च, विशांपतिश्च स' इति।

एवं महता संरम्भेण पद्यमिदं मीमांसते। दर्पणकृदत्र मीमांसामिमामेवं स्मरति—'अत्रोपमाबलादेव गौरीशचीसाम्ये लब्धे तत्सदृशेन तत्समावित्यर्थः पुनरुक्तप्राय एवेति व्यक्तिविवेककृत्।' इति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

'तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्राय न तृप्तिमाययौ।
करीव सिक्तं पृषतैः पयोमुचां घनव्यपाये वनराजिपल्वलम्॥

इति पद्ये मल्लिनाथो 'मृत्सुरभि'पदं 'मृदा सुगन्धि' इति व्याख्याय, अन्ते गर्भिणीनां मृद्भक्षणं लोकप्रसिद्धमेवेति भावमदर्शयत्। हेमाद्रिस्तु 'मृदा सुरभि' इति व्याख्याय 'यद्वा-'सार्वभौमप्रसूताया मुखं मृत्सुरभि स्मृतमि'ति' इति प्रमाणपुरस्सरं कल्पान्तरमपि ददाति। एवमेव—'दिवं मरुत्वानिवे'ति ततोऽनन्तरीये पद्ये 'तथाविधेऽभिलाषे' इति पदद्वये पूर्वं मल्लिनाथो 'मृद्रूपे' इति 'भूविकारे' इति च व्याख्याति, द्वितीयं च 'अभिलष्यते इत्यभिलाषो भोग्यवस्तु' इति। हेमाद्रिरपि 'मृद्भक्षणरूपे, भूमिजपदार्थाभ्यवहारे'—इति पूर्वं व्याख्याति। तदत्र राजमहिष्या मृत्तिकाभक्षणप्रवृत्तिर्न संभवतीति मल्लिनाथोऽपि 'तथाविधमितिपदं भूविकारतया व्याकृत्य मनुते। न च तत्र स सार्वभौमस्य गर्भावस्थायां गर्भिण्या मुखस्य निसर्गनिर्वृत्तां मृद्गन्धितां केनचित् प्रमाणेन साधयति। किं च महाकविप्रदत्तं सादृश्य-मप्यत्रामुमेवार्थं साधयति। प्रथमया वर्षया यो गन्धो भूमावुदेति नासौ बाह्येन केनचित् व्यतिकरेण जन्यते। सोऽस्याः प्राकृतो गुणः। एवं हि भूमौ यथाऽन्तःस्थितः सुरभिर्वर्षारम्भे नवाम्बुसेकादुद्भूय बहिः प्रसरति, गजादिभिश्चानुभूयते, तथैव प्रथमगर्भे राजमहिष्या अस्याः सुदक्षिणाया अपि शारीर एव सुरभिर्निरपत्यतानिदाघमतीत्य प्राप्ते प्रथमसन्तानावसरवर्षारम्भे प्रजार्थव्रतकर्षिताङ्गेन सम्राजाऽनुभूयते। तदित्थं मृद्भक्षणपेक्षया पार्थिवपदार्थभक्षणमेवात्र राजमहिष्यामुपपद्यते।

पञ्चमसर्गस्य 'नीवारपाकादि कडङ्गरीयैः' इति पद्यव्याख्यायां पाकशब्दं मल्लिनाथः 'पच्यत इति पाकः फलम्, धान्यमिति यावदि'ति व्याख्याति। हेमाद्रिस्तु तत्र संरम्भमाश्रयते। तथाहि-'नीवारस्य पाकः पचनं फलं वा [०००]। तस्य पाकमूले पील्वादिकर्णादिभ्यः [कुणब्जाहचौ-५।२।२४]-इत्यत्र पीलोः पाकः पीलुकुणः फलमिति दर्शनात्। पाकः शिशौ जरानिष्ठापचने क्लेदनेषु चेति विश्वः। यद्वा-नीवारेषु तृणधान्येषु पाकः अल्पा अणुत्वात् ते आदिर्यस्य तत्। अथवा—'प्रशस्ता नीवारा नीवारपाकः, ते आदिर्यस्य तत्। पाकाः प्रशस्ताः-पवित्रत्वात्। प्रशंसावचनैश्चे [२।१।६६] ति समासः। पक्वा नीवारा नीवारपाकाः। पाकशब्दोऽल्पार्थः प्रशंसार्थश्च। तथा-'त्रयः पाकयज्ञा' इत्यत्र आश्वलायन-गृह्यनारायणीयवृत्तौ-'पाकयज्ञा अल्पयज्ञाः प्रशस्तयज्ञाश्च। आल्पप्रशंसयोरुभयोः पाकशब्दः। योऽस्माकं पाकतर इत्यत्राल्पत्वे पाकशब्दः। तं पाकेन मनसाऽपश्यमिति, यो मां पाकेन मनसेत्यत्र प्रशंसायामिति-विवेचयति।

मल्लिनाथः 'पुत्रं लभस्वात्मगुणानुरूपमि'ति ५।३४ पद्यस्य 'आत्मगुणानुरूपमि'ति पदेऽनुरूपशब्दसमासमुपैक्षिष्ट। स हि-'त्वया तुल्यगुण'मिति पर्यायेणैवातुष्यत्। दर्पणकृत्त्वत्र शाब्दीं व्युत्पत्तिमप्येवमुल्लिखति-'अनुरूपमि'ति 'अव्ययं विभक्ति [२।१।६]-इत्यादिना अव्ययीभावे क्लीबता स्यात्। अथ-'कुगति प्रादयः [२।२।१८] इत्यनुगतो रूपमनुरूप इति तत्पुरुषे कृतेऽपि परवल्लिङ्गता द्वन्द्वतत्पुरुषयोरि [२।४।२६] ति स एव दोष इति चेत्, न, द्विगुप्राप्तापन्नालं गति-पूर्वसमासेषु निषेधो वक्तव्य [प्रतिषेधो वाच्यः = वा० १५४५] इति परवल्लिङ्गतानिषेधात् निष्कौशाम्बिरिव पुँल्लिङ्गता भवति।' प्रयोगान्तरैश्चामुं पुष्णाति-'तथाच कुमारसंभवे-आत्मानुरूपां विधिनोपयेमे [१ सर्गः] इति, मेघदूते च-मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपमिति। रूपं स्वभावे सौन्दर्यं इति विश्वः।' इति।

'ब्राह्मे मुहूर्ते किल तस्य देवी कुमारकल्पं सुषुवे कुमारम्'

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

—इति ५।३६ पद्ये मल्लिनाथो—'ब्राह्मे तस्येदम् [पा० ४।३।१२०] इत्यण्। ब्रह्मदेवताकेऽभिजिन्नामके मुहूर्ते' इत्येव केवलं व्याचष्टे हेमाद्रिस्त्वत्र प्रमाणान्यप्युपन्यस्यति। तथाहि—"ब्रह्मा देवता यस्य तद् ब्राह्मम्। तस्मिन् ब्राह्मे मुहूर्ते। अष्टमो मुहूर्तो ब्राह्मः। ननु ब्राह्मे मुहूर्ते चोत्थाय चिन्तयेदात्मनो हितमिति रात्रेः पश्चिमयामे रूढिः। 'पूर्वरात्रौ महारात्रस्ततश्चापररात्रकः। ब्राह्मयोऽथेतिक्रमाद्यामा' इति यादवप्रकाशः। तत्र हि ब्राह्मणो देवस्य अध्ययनप्रवृत्तिं निमित्तीकृत्य ब्रह्मशब्दः प्रयुक्तः। नाडिकाद्वयं हि मुहूर्त्तः, तस्य यामवाचकत्वं दोषः। स च मुहूर्त्तो ब्रह्माधिदेवतश्च न भवतीति तन्न। ते च मुहूर्ता ज्योतिषरत्नमालायाम्—'रुद्रा हि मित्र-पितरो वसुवारिविश्वेवंध्या (देवा) विधिः शतमखः पुरुहूतवह्नी। नक्तञ्चरश्च वरुणार्यमयोनयश्च प्रोक्ता दिने दश च पञ्च तथा मुहूर्ताः। निशा मुहूर्ता गिरिजाजपादाहिर्बुध्न्यपूषाश्वियमाग्नयश्च। विधातृचन्द्रादितिजीवविष्णुतिग्मद्युतित्वष्टृसमीरणाश्चेति। ब्राह्मयो मुहूर्तोऽभिजिदष्टमो यस्तस्मिन्नपाच्यीं ककुभं विहाय। प्रशस्यते यानमशेषदिक्षु सर्वाणि कार्याणि च यान्ति सिद्धिमिति। यद्यपि च दिवा च निशि च ब्राह्ममुहूर्तसद्भावस्तथाप्यत्र दिवैव प्रासोष्टेति मन्तव्यम्। 'नक्तं बुधो भौमशशाङ्कमन्दा गुर्वर्कशुक्रा दिनशक्तयः स्युरिति श्रीपतिपद्धत्युक्तेः प्रकाशकग्रहसूर्यस्य शुभग्रहगुरुशुक्रयोश्च दिवा बलीयस्त्वात्। बलिषु श्रेष्ठग्रहेषु महाभाग्यता स्यात्। नारदीयसंहितायां च मध्यन्दिनगते भानौ मुहूर्तोऽभिजिदाह्वयः। नाशयत्यखिलान् दोषान् पिनाकी त्रिपुरं यथा॥" एतेन सावित्रीवेलायामेवोषसि कुमारजन्म कथं न मान्यमिति शममुपयाति जिज्ञासा। किं च व्युत्पित्सोः शास्त्रान्तरप्रमाणान्यपि विज्ञातानि भवन्ति। न चैतान्यनौपयिकानीतिवाच्यम्, कवेस्तादृशमुहूर्तोल्लेखसंरम्भस्योपेक्षापत्तेः। अत्रैव च पद्ये 'कुमारकल्पमि'ति पदं मल्लिनाथः—'ईषदसमाप्तं कुमारं कुमारकल्पं स्कन्दसदृशम्' इति केवलं व्याख्याति। हेमाद्रिस्तु तत्र योजनान्तरमप्येवमुपन्यस्यति—'कौ भुवि मारकल्प' इति वेति।

मल्लिनाथः—५।४१ पद्यस्य 'वन्येतराः' पदे 'वन्या वने भवा इतरे येषां ते वन्येतरा अवन्या इत्यर्थः। न बहुव्रीहौ [१।१।२९] इति सर्वनामसंज्ञानिषेधः, तत्पुरुषे सर्वनामसंज्ञा दुर्वारैव—इति विश्लेषयति। तन्मते श्लोकपाठ एवम्—

'तस्योपकार्यारचितोपचारा वन्येतरा जानपदोपदाभिः।
मार्गे निवासा मनुजेन्द्रसूनोर्बभूवुरुद्यानविहारकल्पाः॥

इति तथाचासौ निवासपदार्थे विशेष्यतयाऽभ्युपेयाय। हेमाद्रिस्तु उपकार्यापदार्थे विशेष्यतयाऽभ्युपेत्य 'मार्गेनिवासा' इति चैकं पदमाम्नायैवमपीदं पठति—

'तस्योपकार्या रचितोपचारा वन्येतरा जानपदोपदाभिः।
मार्गे-निवासा मनुजेन्द्रसूनोर्बभूवुरुद्यानविहारकल्पाः॥

'वन्येतरा'—इति पदं चैवं व्याख्याति—'वन्येभ्य इतरा' त्रिलिङ्गम्। निवासपदार्थस्य विशेष्यता, पक्षे च 'अस्मिन् पक्षे निवासशब्दस्य पुल्लिङ्गत्वात् वन्येतरे इति भाव्यम्। वन्यान् निवासान् इतरयन्ति। ण्यन्तात् पचाद्यच्। इतरयन्तीति सुब्धातुः-, यद्वा-वन्या इतरे येषां निवासानामिति बहुव्रीहिः न बहुव्रीहाविति सर्वनामत्वाभावात्। वन्येतरा इति स्यात्।' वन्ध्येतरा इति च तत्र पाठान्तरमपि दर्शयति।

मल्लिनाथः—विस्रस्तमंसादपरो विलासी'ति ६।१४ पद्ये विलासिपदं विलसनशीलो विलासी—वौ कषलसकत्थस्रंभः [३।२।१४३] इति घिनुण् प्रत्ययः'-इति विवृणुते। हेमाद्रिस्तु-'विलसनशीलो

Ganesh Varni Digambar Jain Institute, Narja, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विलासी, लस् श्लेषणक्रीडनयोः, वौ कषलसेति घिनुण् ।' इति मल्लिनाथोपात्तमर्थं प्रदर्श्यार्थान्तरमप्येवमुपच्छन्दयति–'यद्वा–'धीरसंचारिणी दृष्टिर्गतिर्गोवृषभाञ्चिता । स्मितपूर्वमथालापो विलास इति कीर्तित' इति भरतः । 'विलासी कामुकः कामी स्त्रीपरो लम्पट' इति शब्दार्णव ' इति । यद्यपि कुमारसंभवस्य ४।५ पद्यव्याख्याने मल्लिनाथोऽपि धीरेत्यादि प्रमाणं विलासिपदार्थायोपन्यस्यति ।

मल्लिनाथः ६।६ पद्ये–'कल्पद्रुमाणामिव पारिजात ' इत्यस्यांशविशेषस्य कल्पद्रुमाणां मध्ये पारिजात इव, सुरद्रुमविशेष इव । 'पञ्चैते देवतरवो मन्दारः पारिजातकः । संतानः कल्पवृक्षश्च पुंसि वा हरिचन्दनमित्यमरः ।' अत्र कल्पद्रुमशब्दः पञ्चान्यतमविशेषवचनोऽपि कल्पयन्ति मनोरथानिति व्युत्पत्त्या सुरद्रुममात्रोपलक्षकतया प्रयुक्त इत्यनुसन्धेयम् । कल्पा इति द्रुमाः कल्पद्रुमा इति विग्रहः । ' एतावतीमेव व्याख्यां बहुमनुते हेमाद्रिस्त्वत्र–'कृपू सामर्थ्ये, कल्पयति मनोरथं कल्पः, स चासौ द्रुमश्च, तेषां मध्ये पारमस्यास्तीति पारी, 'पारिण्यब्धौ जातः पारिजातः । पञ्चानां मध्ये एकस्य कल्पद्रुमशब्दवाचकत्वं प्रतीयते तथापि प्रवृत्तिनिमित्तस्य संकल्पार्थस्य पूरणे पञ्चानामपि साधारण्यात् कल्पद्रुमाणामिति बहुवचनम् । तथा माघकाव्ये 'कल्पद्रुमैः सह विचित्रफलैर्विरेजुः [५।१६] तेषु पारिजात उत्कृष्ट इति पारिजातग्रहणात् सिद्धम् । ' इति विशदं विवेचयति । किं चासौ १०।११ पद्येऽपि 'पारिण्यब्धौ जातमिति व्युत्पत्त्यैव पारिजातशब्दं साधयति ।

८।६८ पद्ये–'मदिराक्षि ? मदाननार्पितमिति वाक्यांशे संबोधनभूतं मदिराक्षीतिपदं मल्लिनाथो माद्यत्यनयेति मदिरा लोकप्रसिद्धा, तथापि 'नार्यो मदिरलोचना ' इत्यादि प्रयोगदर्शनात् माद्यत्याभ्यामिति मदिरे अक्षिणी यस्यास्तत्संबुद्धिः,–इति व्याचष्टे । हेमाद्रिस्तु–प्रागुक्तविलासिपदमिवेदमपि पदं पारिभाषिकतयैवं व्याचष्टे 'मदिराभिधम् अक्षि दर्पि यस्याः सा, तत्संबोधनम् । तथा संगीतकल्किायाम् 'स्निग्धार्द्रमुकुलीकृता लंभिता मदिरा तथा । पञ्चैवात्र समाख्याताः शौर्यादित्येन दृष्टयः । सौष्ठवेन परित्यक्ता स्मेरापाङ्गमनोहरा । वेपमानान्तरा दृष्टिर्मदिरा परिकीर्तिते 'ति । माद्यन्त्याभ्यामिति मदिरे अक्षिणी यस्याः सा । 'इषि मदि' [१।५१] इत्यौणदिकः किरच् प्रत्ययः । बहुव्रीहौ सक्थ्यक्ष्णोरिति ङीप् । ' इति । शाकुन्तलेऽपि ४।१६ पद्ये [निर्णयसा० संस्करणे] 'मदिरेक्षणे ' इति पदस्य व्याख्याने राघवभट्टः परिभाषामिमामुद्दद्यो तथाहि–'मदिरा दृष्टिः, तस्या ईक्षणमिवेक्षणमवलोकनं यस्यास्तत्सम्बुद्धिः । सप्तम्युपमानपूर्वपदस्य ' इति समासः । मदिरादृष्टिलक्षणमादिभरते आघूर्णमानमध्या या क्षामा चाञ्चिततारका । दृष्टिर्विकसितापाङ्गा मदिरा तरुणे मदे । इति । "

१९।१५ पद्ये मल्लिनाथः–'अमरालकेश्वरौ '–इति पदम् अमराणाम् अलकायाश्चेश्वरौ इन्द्रकुबेराविति व्याचष्टे । हेमाद्रिस्तु–'अमराणामलकायाश्चेश्वराविन्द्रकुबेराविति व्याख्याय व्याख्यानान्तरमप्येवं ददाति–'संज्ञायामेकदेशव्यवहारात् भीमसेनो भीमः, सत्यभामा भामेतिवत् अमराशब्देन अमरावती कैश्चिदुच्यते । यद्वा अमरा यत्र सन्तीत्यमरा, अर्शआदिभ्योऽच् । तथाऽमरशेषे 'अमरा स्त्र्यमरावत्याम् ' । विश्वश्च 'दूर्वाऽमरावती स्थूणा गुडूचीष्वमरा मतेति । अमराया अलकायाश्च स्त्रीलिङ्गनिर्देशात् स्त्रीत्वं व्यज्यते । तेनेन्द्रकुबेरयोरेकस्त्रीत्वमस्य त्वनेकस्त्रीत्वमतस्तयोर्दुर्लभमिति भावः ।'

१९ । १ पद्ये—'नैमिषं वशी 'त्यत्र नैमिषशब्दव्याख्याने हेमाद्रिर्मल्लिनाथं दूरमतिशेते । तथा हि —'नैमिषं नैमिषारण्यम् । नैमिशमिति शान्तं पाठान्तरम् । श्रीभागवतप्रथमस्कन्धे श्रीधरीटीकायां ब्रह्मणा विसृष्टस्य चक्रस्य नेमिः शीर्यते कुण्ठीभवति तन्नेमिशम्, नेमिशमेव नैमिशम् । तथा वायवीये—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एतन्मनोमयं चक्रं मया सृष्टं मया विसृज्यते। यत्रास्य शीर्यते नेमिः स देशस्तपसः श्रुतः। इत्युक्त्वा सूर्यसंकाशं चक्रं दृष्ट्वा मनोमयम्। प्रणिपत्य महादेवं विससर्ज पितामहः। तेऽपि हृष्टतरा विप्राः प्रणम्य जगतां प्रभुम्। प्रययुस्तत्र चक्रस्य यत्र नेमिर्व्यशीर्यत। तद् वनं तेन विख्यातं नैमिशं मुनिपूजितम्। इति। नैमिषमिति षान्तपाठे— वाराहपुराणोक्तं द्रष्टव्यम्। तथाहि—'गौरमुखं प्रति भगवद्वचनम् 'एवं कृत्वा ततो देवो मुनिं गौरमुखं तथा। उवाच निमिषेणेदं निहतं दानवं बलम्। अरण्ये मेऽस्त्रमस्त्वेतन्नैमिषारण्यसंज्ञितम्। भविष्यति यथार्थं वै ब्राह्मणानां विशेषणम्। इति। यद्वा—निमिषो विष्णुः, अर (?) लुप्तदृष्टत्वात् तस्य क्षेत्रम्। तथैव शौनकादिवचनम्—'क्षेत्रेऽस्मिन् वैष्णवे यमिति॥'

क्वचिच्च मल्लिनाथेन हेमाद्रेर्विवादोऽपि दृश्यते। ८।६ पद्ये 'पैतृक'मितिपदे—'पितुरागतं पैतृकम्। 'पितुर्यच्चे' '[४।३.७९]तिठञ्, उगन्तत्वाच्च ठस्य कः' इति हेमाद्रिर्व्युत्पादयति। मल्लिनाथस्तु तत्र 'ऋतष्ठञ्' [४।३।७८] इति ठञ्प्रत्यय' इति। परत्वात् पितुर्यच्चेत्यनेनैवात्र ठञा भाव्यम्, अथापि तस्य यत्प्रत्ययमात्रविधानाय प्रवृत्तत्वात् ठञर्थं पूर्वसूत्रापेक्षित्वाच्च तेनैव ठञुपपत्तिर्ज्यायसी। चकारग्रहणमत्र पूर्वसूत्रेण विहितस्तु प्रत्ययो भवत्येव, यदपि भवतीत्यर्थान्तरसमुच्चयायैव जातं, न तु पूर्वविरोधाय। दर्पणकारस्य व्याकरणव्यवस्थाः क्वचन शोच्या अपि। तथाहि—

रथी निषङ्गी कवची धनुष्मान् दृप्तः स राजन्यकमेकवीरः [७।५६]

अत्र 'एकवीर'—शब्दस्य समासे विविधा व्युत्पत्तयो दृश्यन्ते। तत्र हेमाद्रिः—एकश्चासौ वीरश्चेति—पूर्वापर—प्रथम—जघन्य [समान—मध्य—मध्यमवीराश्च २।१।५८] इति कर्मधारयः। राजदन्तादित्वात् परनिपातः—पूर्वकालैके [२।१।४९]ति समास इति केचित्, तन्न, विप्रतिपिद्धत्वात्।' इति व्युत्पादयति। विशेषणं विशेष्येण बहुलमित्यनेनैव कर्मधारये विहिते—'पूर्वापरेत्यादिना' पुनस्तद्विधानं पूर्वादिशब्दानां पूर्वनिपातार्थम्—इति तु सिद्धान्तकौमुदीकारः। ननु पूर्वेत्यादौ सूत्रे एकशब्दस्यानुपादानात् कथमत्र पूर्वनिपातप्राप्तिः, प्रत्युत 'पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन' [२।१।४९] इति सूत्रे 'एक'शब्दोपादानात् तस्य 'वीरैक' इति परनिपातापत्तिरेवेति चेत्—राजदन्तादिषु परमि[२।२।३१]ति वीरशब्दस्य परनिपातात् तथा इत्युक्तक्रमेण दर्पणकारः, विशेषणं विशेष्येण बहुलमिति सूत्रे बहुलग्रहणसामर्थ्यात् तथेति च भट्टोजिदीक्षितः [सिद्धान्तकौमुद्याम्]। तत्र राजदन्तादिगणे 'एकवीर' प्रयोगस्याभावाद् दर्पणकृतो व्यवस्थानुपादेयैव।

क्वचिच्च मल्लिनाथं दूरमतिशेते। तथाहि—

'मोक्ष्यध्वे सुरबन्दीनां वेणीबन्धानदूषितान्।
शापयन्त्रितपौलस्त्यबलात्कारकचग्रहैः॥

इति १०।४८ पद्ये शापयन्त्रितेति पदस्य व्याख्यायां मल्लिनाथः—'शापेन नलकूबरशापेन यन्त्रिताः प्रतिबद्धाः पौलस्त्यस्य रावणस्य बलात्कारेण ये कचग्रहाः केशाकर्षाः तैः अदूषितान् अनुपहतान् स्वर्बन्दीनां हृतस्वर्गाङ्गनानां वेणीबन्धान् मोक्ष्यध्वे।' इति ब्रूते। हेमाद्रिश्च—'शापेन यन्त्रितस्य नियमितस्य पौलस्त्यस्य रावणस्य बलात्कारेण कचग्रहैः केशाकर्षणैः, अदूषितानि'—ति। स्पष्टमेव मल्लिनाथो यन्त्रितत्वं कचग्रहविशेषणतया नयति, हेमाद्रिश्च रावणविशेषणतया। मल्लिनाथमते शापेन कचग्रहाणामेव यन्त्रितत्वे बन्दीषु रावणकृतसंभोगान्तरसंभावना समुदेति। तथा च सति प्रतीकान्तरेषु

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दुष्टेषु वेणीनामदुष्टत्वं स्वर्बन्दीनामङ्गीकारेऽकिञ्चित्करमेव । किं च नलकूबरशापोऽननुरक्तपरस्त्रीगमनमात्र-विषयः, न तु तत्कचग्रहैकविषयः । एवं च रावणोऽननुरक्तस्वर्बालाशरीरपरामर्शे व्युपेक्षितशापोऽपि कचग्रहे कथं न तथेति प्रश्नः किमुत्तरः स्यात् । किं च शापः कर्त्रे दीयते, न तु कर्मणे । ततश्च कचग्रहेण शापयन्त्रणाया योजनं सहृदयानभिमतम् । कचग्रहश्चात्र पुरुषगतः सुरतानुभावः । हेमाद्रिमते–'रावणस्य यन्त्रितत्वे–'रावणः सुराङ्गना बलादहार्षीत् । अतस्तासां तदङ्गसंस्पर्शः सीतावदेव दोषाय न भवति । यच्च दोषाय भवति तत् स्वेच्छासुरतं तादृशशापभिया सोऽयमसुरेश्वरो नाकार्षीदि'ति स्वर्बन्दीनामदूषितत्व-सिद्धौ तासां वेणीमोक्षो याज्ञसेनीवेणीमोक्षतुल्य एव प्रवृत्तिविषयः सिध्यति । तथा च हेमाद्रिमते भावौ-चित्यमपि सुरक्षितं तिष्ठति ।

न चैवं मल्लिनाथो हेमाद्रिणा गतार्थो भवति । तत्रापि महतीनामाकूतीनामुन्मीलनदर्शनात् । तथा हि—

'तां प्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्रदूत्यः ।
प्रवालशोभा इव पादपानां शृङ्गारचेष्टा विविधा बभूवुः ॥'

इत्यत्र पद्ये—शृङ्गारचेष्टापदं हेमाद्रिः—

'चेष्टा भवति पुंनार्योर्या रत्युत्थातिरक्तयोः ।
संभोगो विप्रलम्भश्च शृङ्गारो द्विविधो मतः ॥'—

इति प्रमाणमेकमुपन्यस्य 'नयनवदनेत्यादि भरतवाक्य[नाट्यशास्त्रे ६।४९]मेकमुद्धरति । मल्लिनाथ-स्तत्र—'अत्र शृङ्गारलक्षणं सुधाकरे—

'विभावैरनुभावैश्च स्वोचितैर्व्यभिचारिभिः ।
नीता सदस्यरस्यत्वं रतिः शृङ्गार उच्यते ॥'

रतिरिच्छाविशेषः । तच्चोक्तं तत्रैव—'यूनोरन्योन्यविषयस्थायिनीच्छा रतिः स्मृते'ति । चेष्टाशब्देन तदनुभावविशेषा उच्यन्ते । तेऽपि तत्रैवोक्ताः—

भावं मनोगतं साक्षात् स्वहेतुं व्यञ्जयन्ति ये ।
तेऽनुभावा इति ख्याता भ्रूविक्षेपस्मितादयः ।
ते चतुर्धा चित्तगात्रवाग्बुद्ध्यारम्भसंभवाः ॥

इति तत्र गात्रारम्भसंभवाँश्चेष्टाशब्दोक्याननुभावान् 'कश्चित् [६।१३–१९] इत्यादिभिः श्लोकै र्वक्ष्यति । शृङ्गाराभासश्चायम्, एकत्रैव प्रतिपादनात् । तदुक्तम्—

एकत्रैवानुरागश्चेत्तिर्यक्शब्दगतोऽपि वा ।
योषितां बहुसक्तिश्चेद् रसाभासस्त्रिधा मतः ॥

इति शृङ्गारस्य साङ्गं सप्रमाणमुपन्यस्यति । एवमेव—

'चूर्णबभ्रु लुलितस्रगाकुलं छिन्नमेखलमलक्तकाङ्कितम् ।
उत्थितस्य शयनं विलासिनस्तस्य विभ्रमरतान्यपावृणोत् ॥ १९।२५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्यत्र हेमाद्रिः केवलम्—'अग्निवर्णस्य शयनं॰॰विपरीतरतादीनि अपावृणोत्॰॰॰कुङ्कुमादिचूर्णैः— इति व्याख्याति । मल्लिनाथस्तत्र संरम्भमीयिवान् कियद्व्याख्यातीति ,मुद्रितेष्वेव पुस्तकेष्ववधार्य निश्चिन्वन्तु । दूरमेतत् तिष्ठतु—

'तस्य निर्दयरतिश्रमालसाः कण्ठसूत्रमपदिश्य योषितः ।
अध्यशेरत बृहद्भुजान्तरं पीवरस्तनविलुप्तचन्दनम् ॥

इति १९ । ३२ पद्ये कण्ठसूत्रमिति पारिभाषिकमपि पदं हेमाद्रिरुपैक्षत । स तत्र 'अपदिश्ये'त्यत्र 'अपविध्ये'ति पाठमाम्नाय कण्ठसूत्रम् अपविध्य त्यक्त्वा आश्लिष्य वा, अन्यत्र गमिष्यतीति शङ्कया (अध्यशेरत)' इति टीकते । मल्लिनाथस्तु तत्र मर्मोद्भेदयति । स हि तत्र कण्ठसूत्रलक्षणमेवं प्रयच्छति— 'कण्ठसूत्रमालिङ्गनविशेषः 'कण्ठसूत्रलक्षणं तु—'

यत्कुर्वते वक्षसि वल्लभस्य स्तनाभिघातं निबिडोपगूढम् ।
परिश्रमार्थं शनकैर्विदग्धास्तत्कण्ठसूत्रं प्रवदन्ति सन्तः ॥'

इदमेव रतिरहस्ये स्तनालिङ्गनमित्युक्तम् । तथा हि—

'उरसि कमितुरुच्चैरादिशन्ती वराङ्गी स्तनयुगमुपधत्ते यत् स्तनालिङ्गनं तत् ॥ इति ।"

—तदित्थं महाविदुषोरनयोष्टीके परस्परमुपकुर्वाणे महाकवेर्हार्दमुपन्यस्यतः । नानयोरन्यतरस्य प्रथमावरत्वकल्पनाऽस्मदभिमता । द्वावप्येतौ कालिदासभारतीसुरभेर्वत्सभूतौ । यावदप्यभिप्रायामृतमेतावाविष्कारयतस्तावतोऽधिकतरस्यावाप्तये सूक्तिमिमां प्रमाणीकुर्मः—

'पश्येयमेकस्य कवेः कृतिं चेत् सारस्वतं कोषमवैमि रिक्तम् ॥
अन्तः प्रविश्यायमुदीक्षितश्चेत् कोणे प्रविष्टा कविकोटिरेषा ॥'*

[शिवलीलार्णवः १ । १८]

---

* १ हेमाद्रेः स्थितिकालः P. K. गोडे महोदयैः १५शती स्थिरीकृतः, वेलण्करमहोदयैश्च १३ शती । सर्वमप्येतदानुमानिकमेवास्ति । प्रथमस्य सर्गस्य दर्पणे मङ्गलोत्तरे प्राप्ते प्रश्नमिमं पश्चान्निर्णेष्यामः ।

२ अमदाबादीयस्य ला० द० भा० सं० विद्यामन्दिरस्यैव प्रतिः मुनिश्रीपुण्यविजयैः प्रेषितास्तीति तत्रत्यैरध्यक्षैः श्रीमद्भिः दलसुखभाईमालवणियामहोदयैः सकृपं सूचितोऽस्मि ।

३ केरलविश्वविद्यालयस्य ग्रन्थागारे प्रथमसर्गस्यापि दर्पणोऽस्तीति साम्प्रतं तदध्यक्षैः राघवन्पिल्लईमहोदयैः सानुक्रोशं सूचितम् ।

—लेखकः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भामह-संमत-काव्यस्वरूपानुसंधानम्

श्रीरामनिहालशर्मा

भामहः खलु सर्वेष्वलङ्काराचार्येषूपलब्धग्रन्थेष्वाद्य इति पुराविदां मतिः। स च अलङ्कारशास्त्रस्य जनकपदे निषिक्तः[1]। अतः काव्यशास्त्रीयं कमपि विषयमवलम्ब्य समीक्षमाणस्य स एव प्रथमं भरतादनन्तरं द्रष्टव्यो भवति। अत एव भामहकृतकाव्यलक्षणस्य सर्वेऽप्युल्लेखं कुर्वन्ति। किन्तु भामहालङ्कारग्रन्थे केषाञ्चिद् विषयाणामस्फुटवर्णितत्वात् तेषां निर्धारणे काठिन्यानुभवः स्वतःसिद्धः। अत एव पूर्वापरसंबन्धं सम्यगनालोच्य काव्यलक्षणस्वभावोक्तिकविशिक्षादिविषयाणां स्वरूपनिर्णयो दुष्कर एव। तथा हि केचित् "शब्दार्थौ सहितौ काव्यम्[2]" इत्येव भामहसंमतकाव्यलक्षणमस्तीत्याहुः—

"शब्दार्थौ सहितौ काव्यमिति कृत्वा च लक्षणम्।
कृतः काव्यपरामर्शी शब्दोऽयं भामहादिभिः।"[3]

तच्च न विचारसहम्। तद्धि वाक्यं नैव काव्यलक्षणत्वेनाभीष्टमित्यस्माकं पक्षः।

नन्वेतादृशाः सूक्ष्मेक्षणवन्तोऽपि शास्त्रकाराः कथं तावन्मूलमेवोपेक्षेरन्, अन्यैराचार्यैश्च काव्यलक्षणमेव सर्वप्रथमं विचार्यते, तस्मात् 'शब्दार्थावित्यादि वाक्यमेव काव्यलक्षणम्।' इति चेत् तस्मिन्नेव वाक्ये काव्यलक्षणत्वेन स्वीकृते 'सहितौ' इति पदस्य कोऽर्थ इति विचार्यताम्।

आधुनिका इव रुय्यककालिका अपि केचिद् भामहस्य तत्प्रसिद्धं वाक्यं काव्यलक्षणतयामन्यन्त। तत एव तद्दूषयितुं प्रवृत्तेन साहित्यमीमांसाकारेण रुय्यकेणोक्तम्—अपरे पुनराचार्या एवं विदुः—शब्दार्थयोः सहभावेनावस्थानं साहित्यं यत् तयोः काव्यमिति संज्ञया तेन तु सिद्धत्वाच्छब्दार्थयोः संबन्धस्य न कथञ्चित् साहित्यविरहः। उक्तं हि कुन्तकेन "शब्दार्थौ साहितावेव प्रतीतौ स्फुरतः सदा। सहिताविति तावेव किमपूर्वं विधीयते॥[4]" इति। अत एव शब्दार्थयोः साहित्यं विशिष्टमेव स्यादिति स्वीकर्तव्यम्, अन्यथा अनिष्टमपि काव्यं काव्यकक्षायामापतेत्। अत एव साहित्यं सहस्थानमात्रार्थकं नाभिप्रेतमत्र।[5]

---

१. पूर्वेभ्यो भामहादिभ्यः सादरं विहिताञ्जलिः—विद्यानाथः 'Father of the Alankarashastra' Vedantan Aiyangar : An Appreciation, P. i, Kavyalankara edited by D. T. Tatacharya.

२. काव्यालं० १।१६

३. हिन्दी वक्रोक्तिजी०—दिल्लीविश्व० आचार्य, विश्वेश्वरकृतपद्यम्, पृ. २६

४. तत्रैव १।१६

५. रुय्यककृत साहि० मी० त्रिवेन्द्रम् संस्कृतग्रन्थमाला १९३४, पृ. १३.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अत्रेदमवधेयम्। भामहस्य 'शब्दार्थौ' अविशिष्टौ एव, तत् तस्य न काव्यलक्षणत्वम्। चारुत्वविशिष्टमेव शब्दार्थसाहित्यं भामहस्य संमतम्। किन्तु तस्मिन् प्रसिद्धे साहित्यप्रतिपादने वाक्ये न किमपि विशेषणमुपात्तमस्ति। अतो न तत् काव्यलक्षणमिति पर्यवसितोऽर्थः, अपि तु साहचर्यमात्रसूचकं तत्। शब्दार्थसाहित्यं काव्यस्य विशेषो गुणः। "शब्दप्राधान्यमाश्रित्य तत्र शास्त्रं पृथग् विदुः। अर्थतत्त्वेन युक्तं तु वदन्त्याख्यानमेतयोः" ॥ (भट्टनायक) इति वचनेन वाङ्मयस्यान्यप्रभेदात् काव्यस्यान्यत्व-प्रतिपादकं शब्दार्थसाहित्यमेवेति विदुषां मतम्। कालिदासस्यापि वचनमत्र संगच्छते—

वागर्थाविव संपृक्तौ...जगतः पितरौ।[१] अपि च भामहादनन्तरं अन्यस्य महाकवेर्वाणी—"शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते।[२] इति। ननु काव्यलक्षणवाक्यवत् सिद्धान्तितमपि काव्य-लक्षणत्वेन तद्वाक्यं न स्वीक्रियते चेत्तर्हि का गतिरस्य विद्वद्भिरनेकैस्तथाकथितस्य वाक्यस्येति प्रश्ने समुपस्थिते समाधानमप्येतद् भवति।

वस्तुतः काव्यस्वरूपविषये प्राचीनकालादेव मतभेद आसीदिति भामहालंकारेऽपि शब्दार्थालंकार-प्राधान्यविचारप्रसंगे तस्य संकेतो दृश्यते। काव्यस्वरूपस्य त्रिधा प्रस्थानानि सन्ति—

शब्दप्राधान्यप्रस्थानम्, अर्थप्राधान्यप्रस्थानम्, शब्दार्थ-साहित्यप्रस्थानञ्च। तदेव विशदीकृत्य प्रकारान्तरेणान्ये समुपस्थापयन्ति—

"अलंकारशास्त्रस्य पञ्चप्रस्थानानि सन्ति। तानि च-१—शब्दार्थ-साहित्य-प्रस्थानम्, २—शब्दप्राधान्यप्रस्थानम् ३—केवलरसप्रस्थानम्, ४—ध्वनिप्रस्थानम् ५—ध्वनिध्वंसप्रस्थानम्"[३]

भामहो हि द्विविधं मतमुपन्यस्तवान्। तत्रैकं शब्दप्राधान्यवादः, अपरमर्थप्राधान्यवादः। मतद्वयपरम्परा चेयमतीव दृढासीदिति महाकाव्यावलोकनेव प्रतीयते।[४] मतद्वयमेतत् केषामिति स्पष्ट-निर्देशो न कृतस्तेन। तत्पूर्वं ये मेधाव्यादय आसन् तेषामेव केषाञ्चिद् नूनं तत् भवेत्। येषां केषां वा भवतु मतं तत्, निश्चितं त्वेदमस्त्येव यत् प्राचीनान् ग्रन्थान् दृष्ट्वा मतानि च विचार्यैव स्वकाव्यालंकारो आचार्येण रचितः। उक्तं हि तेनैव—

इति निगदितास्तास्ता वाचामलंकृतयो मया
बहुविधकृतीर्दृष्ट्वान्येषां स्वयं परितर्क्य च[५] ॥ इति।

भामहस्य चेयं प्रवृत्तिर्यद् ये केचन मुख्याः सिद्धान्ताः पूर्वं प्रचलिता आसन् तेषां विवेचनं विज्ञापनं वावश्यं क्रियते। अत एव काव्यशास्त्रेतिहासनिर्धारणे तस्योपयोग आधुनिकैरालोचकैः क्रियते।

---

१. रघु० १।१
२. शिशुपालवधे माघः।
३. Philosophy of Poetry—Dr. N. N. Choudhuri p. 8.
४. भारविः किराते—स्तुवन्ति गुर्वीमभिधेयसंपदं विशुद्धिमुक्तेरपरे विपश्चितः। १४।५; रघुवंशे १।१.
५. काव्या० ५।६९;

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सौन्दर्यसम्पादनार्थं तावदलंकार उपयुज्यते । अलंकारपदं हि सौन्दर्यपर्यायतयापि प्रयुक्तमलंकार-ग्रन्थेषु । वामनस्य ' सौन्दर्यमलंकारः ' सूत्रं प्रसिद्धमेव । वामनो हि भामहस्यैव मतमुध्दृतवानिति तु न कश्चित् कथयति । भामहो हि सुन्दरपदस्य स्थाने चारुपदस्यैव प्रयोगं बहुशः करोति । अतस्तन्मतेऽपि सौन्दर्यापरपर्यायोऽलंकारशब्दोऽस्त्येवः—

......चारुता.........अलंकृतिः । १ । ३६

भामहः खलु सुन्दरसौन्दर्यशब्दयोः प्रयोगं नैव क्वचित् कृतवान् एतावतैव न तत्र दृष्टियोगं कश्चिदाधुनिकः करोतीत्यहो उपेक्षोपजीव्यस्य मुख्यस्य ! भामहस्तु सुन्दरसौन्दर्यशब्दप्रयोगमकृत्वा कान्तचारुवक्रशोभाविभूषाशब्दान् प्रयुक्तवानिति का क्षतिः ? कान्तादिष्वपि चारुशब्द एवास्य प्रियः । सर्वत्र च चारुताशब्दः काव्यसौन्दर्यार्थे वर्तते ।[१]

सा चारुता काव्यशरीरभूते शब्देऽर्थे वा कुत्र भवति, शब्दार्थालंकारयोः कतरः खलु काव्यान्तरङ्गभूत इति विचारमार्गे द्विविधं मतमुपन्यस्यति । तत्र केषाञ्चिन्मतेन मुख्यतया शब्दे भवति । शब्दस्य चारुतया काव्यत्वं निष्पद्यते । अन्ये त्वर्थमात्रस्य चारुत्वे काव्यत्वं पश्यन्ति ।

अयं भावः । अर्थप्राधान्यवादिनामयमाशयो यद् रूपकादिरर्थालंकारवर्ग एव काव्यस्यान्तरङ्गभूतः । तथा हि——ललनावदनं कान्तं सदपि निरलंकारं न शोभते । काव्यमपि अर्थालंकारमन्तरा तथैव । चारोः किं वा प्रयोजनं तावदलंकारेणेति न वाच्यम्, स्वतश्चारु वस्तु हि अलंकृतं सच्चारुतरं प्रतिभातीति भामहसम्मतम् । अर्थप्राधान्यविषये तदिदं कुन्तकोऽप्याह——केषाञ्चिद् वाच्यमेव रचनावैचित्र्यचमत्कारि काव्यमिति ।[२]

मतान्तरञ्च शब्दप्राधान्यवादः । शब्दप्राधान्यवादिनां तु रूपकादिरलंकारवर्गो बाह्यः । अतस्ते सुबन्तानां तिङन्तानाञ्च शब्दशास्त्रसंस्काराभिव्यञ्जकतया व्युत्पत्तिं रचनालंकृतिमिच्छन्ति । तदेव कुन्तकः शब्दान्तरेण (पूर्वपक्षतया) स्थापयति——केषाञ्चिन्मतं कविकौशलकल्पितकमनीयातिशयः शब्दः केवलं काव्यमिति ।[३]

भामहाचार्य उभयमपि मतं न सहते । उभयमपि वा समन्वितमेव सहते । तथा हि संस्काराभावे शब्दो दुष्टो भवति । दुष्टो हि नाम शब्दो न प्रयोक्तव्यः । अत एव च्युतसंस्कृतिर्दोषः । तथा च तद्दोषाभावमात्ररूपा सुप्तिङ्व्युत्पत्तिर्नाम नालंकारमतामर्हति । न हि तत्र वाच्यवैचित्र्यकणिका काचिद् भवति । शब्दप्राधान्यस्यार्थप्राधान्यस्य चोदाहरणे तु भामहो नैव दत्तवान् । कुन्तकस्तु तथा कृत्वा भामहालंकारस्यैव तिस्रः कारिकाः प्रमाणत्वेनोपन्यस्तवान्[४] । तस्मात् स्थितमेतत्——न शब्दस्यैव रमणीयताविशिष्टस्य केवलस्य काव्यत्वं नाप्यर्थस्य तथाभूतस्येति । ताश्चेमाः कारिकाः भामहस्य—

---

१. भामहालंकारे शंकररामशास्त्रिसंपादिते १।३६, ५९; २।७, ९६; ३।४९, ५१; ६।४२
२. वक्रोक्ति० १।७ वृत्तिः ।
३. तत्रैव ।
४. तत्रैव ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रूपकादिरलंकारस्तस्यान्यैर्बहुधोदितः ।
न कान्तमपि निर्भूषं विभाति वनितामुखम् ॥
रूपकादिमलंकारं बाह्यमाचक्षते परे ।
सुपां तिङाञ्च व्युत्पत्तिं वाचां वाञ्छन्त्यलंकृतिम् ॥
तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी[1] ।
शब्दाभिधेयालंकारभेदादिष्टं द्वयं तु नः[2] ॥

अस्यायमभिप्रायः । अलंकारः शब्द अर्थश्चेत्युभयत्राप्यस्माकमिष्टः । शब्दालंकारोऽपि न सुप्तिङ्व्युत्पत्तिलक्षणः, अपि त्वनुप्रासादिरूप एव । अमुमेवार्थं गर्भीकृतं संसूचयन्नाह—

नानार्थवन्तोऽनुप्रासा न चाप्यसदृशाक्षराः ।
युक्त्यानया मध्यमया जायन्ते चारवो गिरः[3] ॥

एवञ्च द्वावपि न पृथग्भूतावस्माकमिष्टौ, अपि तु सहितावेवेति समुद्घोषितम्—"शब्दार्थौ सहितौ काव्यम्[4] ।"

अत्र सहितशब्दस्य हितसहितत्वमर्थं मन्यमानाः केचिद् विचारका न युक्तमभिदधति । कालिदासस्य 'वागर्थाविव संपृक्तौ' इतिवदत्रापि द्वयोः साहित्यमेवाभिप्रेतम् । 'सहितौ' इत्यस्य पदस्य 'सम्मिलितौ' इत्यर्थं ब्रुवाणेन कुन्तकेन स्फुटमेवाभिहितं तत् । तस्माद् वाचको वाच्यश्चेति 'द्वावपि सम्मिलितौ काव्यत्वापादकौ' इति स्थितम् । एवमवस्थापिते कदाचिदेकस्य मनाङ्मात्रन्यूनतायां सत्यां काव्यव्यवहारो न प्रवर्तेतेत्याह 'सहितौ' इति । अमुमेवार्थं समर्थयन्नन्यत्रापि प्रतिपादयति—"सत्यपि रसवत्त्वे काव्यस्य शब्दसौष्ठवाभावे पदसौकर्याभावे च न पेशलत्वमिति[5]"। भामहस्यैतदेव मतं शब्दार्थसाहित्यप्रस्थाननाम्ना प्रसिद्धमस्ति । अलंकारशास्त्रेऽस्यैव मतमादरातिशयमधिजगाम । अन्यमतावलम्बिनस्तु अल्पीयांस एव ।

एतावता सिद्धमेतद् यत् शब्दप्राधान्यार्थप्राधान्यवादिनां मतं निराकर्तुमेव तयो साहित्यमभिहितम् । एवञ्च तद् खण्डनात्मकमेव वचनम्, न तु काव्यलक्षणात्मकम् । न च एवं तर्हि शब्दार्थौ काव्यमिति किमिति नोक्तम्, 'सहितौ' इति पदं कुतोऽपेक्षितम् इति वाच्यम् । 'सहितौ' इति पदं विना हि द्वयोः पृथग्भावमतिः स्याद्, या नाभिमता । अतः 'सहितौ' इति विधेयपदमपेक्षितमेव ।

एतेन सहितावित्यस्यान्यथाव्याख्यापि निरस्ता । अन्यथा व्याख्यातॄणामयमाशयः—शब्दार्थसाहित्यं स्वतो रमणीयं भवति, रमणीयविशेषणञ्च पृथग्रूपेण नापेक्ष्यते । एवञ्च पाश्चात्यसमीक्षकश्रीक्रोचे इत्यस्यापि मतं 'सफलाभिव्यञ्जनैव सौन्दर्यमिति' संगच्छते । भारतीयकाव्ये कुन्तकदृष्टिरेतदेव

---

१. काव्यालंकारे १।१३-१५
२. तत्रैव १।१५
३. तत्रैव २।७
४. तत्रैव २।१६
५. तत्रैव-'अहृद्यमसुनिर्भेदं रसवत्त्वेऽप्यपेशलम् ।' ५।६२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सूक्ष्मतत्वमुन्मीलयति—

विशिष्टमेव साहित्यमभिप्रेतम् । कीदृशम्—वक्रताविचित्रगुणालंकार संपदां परस्परस्पर्धाधिरोहः । अन्यथा तद्विदाह्लादकारित्वहानिः । कुन्तकोऽन्यत्राप्येवं विवेचितवान्[1] ।

भामहमते तु साहित्यपदस्य नैतावान् अर्थोऽभीष्टः, अपि तु अन्यूनानतिरिक्तत्वस्थितिरेव । तादृशी च स्थितिर्मनोहारिणीति केवलसहितशब्देन न सिध्यति । वस्तुतः शब्दार्थसाहित्यसिद्धान्तघोषणायाः पृष्ठभूमिकायां तयोरेकतरस्य प्राधान्यवादप्रसिद्धिरासीदिति ज्ञेयम् । सा च पूर्वोक्तप्रकारेण कालिदासभारविमाघवचनेषु प्रतिफलिता दृश्यत एव । कुन्तकमते "तदेवंविधं विशिष्टमेव शब्दार्थयोर्लक्षणमुपादेयम् । तेन नेयार्थापार्थादयो दूरोत्सारितत्वात् पृथङ् न वक्तव्याः[2] ।" इत्याद्युक्त्या सहितावित्यस्य 'वक्रताविशिष्टौ' इत्यर्थोऽभिप्रेतः । अत एव कुन्तकस्य काव्यलक्षणम्—

शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि ।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि[3] ।।

भामहपक्षे नैतादृशी स्थितिः । अनेन खलु एकतरप्राधान्यनिषेधार्थमेवोक्तम् । "शब्दाभिधेयालंकारभेदादिष्टं द्वयं तु नः" इति । अतः 'शब्दार्थौ सहितौ' इति काव्यलक्षणमेवेति न वक्तुं युक्तम् । शब्दाभिधेयेत्यादिकारिकायामुभयसाहित्यानभिधानात् ।

तस्मात् स्थितमेतत् शब्दार्थौ सहितौ न काव्यलक्षणमिति । द्वितीयश्च निष्कर्षः 'सहितौ' इति विशेषणमनिवार्यमिति । तृतीयश्च निष्कर्षः एकतरस्य न प्राधान्यमिति ।

अथायमपरः प्रश्नः समुदेति यदाचार्यप्रवरेण काव्यालंकारानवगमयितुं प्रवृत्तेन काव्यलक्षणं कुतो न कृतमिति । शास्त्रकारस्य दोष एवायम् ।

वयमत्र ब्रूमः । काव्यालंकारे खलु काव्यस्वरूपं व्याख्यातमेव, तच्चाग्रे प्रतिपादयिष्यते । स्वविवेच्य एव मुख्येऽवधेयेऽनवहितः स्यात्तादृशो ग्रन्थकार इति को हि नाम विमर्शशीलो विश्वसेत् । किन्तु अव्याप्त्यादिदोषत्रयशून्यं लक्षणं नैव कृतमित्यत्र न कश्चिद् विप्रतिपद्येत सुधीः । तादृशलक्षणाकरणं तु नात्र ग्रन्थकारस्य दोषाय कल्प्येत । तद्धि सहेतुकमेव । यतः कैश्चित् प्राचीनैः काव्यालंकारस्य[4] प्रतिपाद्यविषयेषु या दृष्टिरङ्गीकृता तदनुरोधादेव काव्यलक्षणतद्विवेचनयोः नैवावधानं तथा भामहवामनयोर्लभते, यथा साहित्यदर्पणादिषु । सा च कविशिक्षादृष्टिरासीत् । तदनुसारेण च सामान्यस्वरूपप्रति-

---

१. साहित्यमनयोः शोभाशालितां प्रति काप्यसौ ।
अन्यूनातिरिक्तत्वमनोहारिण्यवस्थितिः ।।
—हिन्दीवक्रोक्तिजीवितभूमिकायामाचार्यनगेन्द्रः पृ. ८.

२. हिन्दीवक्रोक्तिजी. पृ. ५०

३. तत्रैव १ । ७

४. काव्यालंकारशब्दोऽत्र काव्यशास्त्रवाचकः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पादनमपि पर्याप्तमस्ति। भामहकाव्यालंकारप्रयुक्तशब्दविशेषपर्यालोचनेन एतन्नाप्रतीतं विवेचकानाम्।[1]

अन्यच्च। दण्डिनः प्रवृत्तिः विशेषतः काव्यतत्त्वानां विशदस्वरूपस्थापने दृश्यते, भामहस्य तु सा तत्र वर्तमानापि शास्त्रान्तरतुल्यकक्षायां काव्यस्य काव्यशास्त्रस्य च समुपस्थापने अत एवाह—

अधनस्येव दातृत्वं क्लीबस्येवास्त्रकौशलम्।
अज्ञस्येव प्रगल्भत्वमकवेः शास्त्रवेदनम्॥

× × ×

रहिता सत्कवित्वेन कीदृशी वाग्विदग्धता॥[2]

भामहस्यैव पन्थानं तावदनुसृत्य कृता काव्यतच्छास्त्रप्रतिष्ठा वेदाङ्गत्वादिना राजशेखरेण। कविशिक्षकाणामाचार्याणां प्रवृत्तिरेवेयमासीत् काव्यगौरवख्यापनद्वारा भविष्णुकवीनुत्साहयितुम्।

पूर्वोक्तप्रकारेण दर्शितेषु[3] भामहस्य कविशिक्षावचनेषु काव्यस्येष्टस्वरूपप्रतिपादकानि बहूनि वाक्यानि सन्ति। तैश्च तत्स्वरूपनिर्धारणं न दुष्करम्।

भामहमतेन दोषाणां त्याज्यताऽनिवार्या। काव्यालंकारे काव्यस्य अदोषताविषये सर्वप्रथममुपदेशः कृतः। अन्यत्रापि च भूयोभूयः दोषत्याज्यतोक्ता।

सर्वथा पदमप्येकं न निगाद्यमवद्यवत्।
विलक्षमणा हि काव्येन दुःसुतेनैव निन्द्यते॥ १।११॥

नाकवित्वमधर्माय व्याधये दण्डनाय वा।
कुकवित्वं पुनः साक्षान्मृतिमाहुर्मनीषिणः॥ १।१२॥

नेयार्थं क्लिष्टमन्यार्थमवाचकमयुक्तिमत्।
गूढशब्दाभिधानं च कवयो न प्रयुञ्जते॥१।३७॥

सुधियामपि नैवेदमुपकाराय कल्पते॥१।४५॥

..................दुष्टं च नेष्यते॥ ४।२॥

---

१. कवयो न प्रयुञ्जते १।५८; योज्यं काव्येष्ववहितधिया १।५९; सुमेधसः...... न......प्रयुञ्जते। २।१; प्रयोगः......पुष्यति २।६२ धीखेदायैव विस्तरः २।९५; प्रयोगः......३।१५; अलंकारविधिः......मयोदितः......अनेन... वाग्......अलंकृता......विभाति ३।५८; रचनाविधिः ४।२६; साधु नार्वाचीननिबन्धनम् ५।६०; यत्नः कार्यः काव्यं विवित्सता ६।४; वक्रवाक्कविसाधुप्रयोगविवेकोऽयमुच्यते। ४।२३। एवंविधा अन्यत्रापि बहवो विध्यर्थका उपदेशार्थकाश्च शब्दाः प्रयुक्ताः सन्ति। दृश्यताम् ५।३३, ४०, ५७, ६१; ६।२२, २४, २७, ३१, ३४, ३६, ३७, ३८, ४०, ४१, ४६, ४९, ५०, ५९, ६४।

२. भामहे १।३, ४।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एवं अन्यत्रापि द्रष्टव्यम्[1] । दण्डिनाप्येतत् समर्थितम्—

तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथंचन ।
स्याद् वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम् ।। १।७।।

अतएव "शब्दार्थौ सहितौ" इति मूलवाक्ये काव्यलक्षणतया गृह्यमाणे अदोषाविति विशेषणस्य दानं नूनं अनुमन्येताचार्यः ।

आचार्येण तावत् दोषविवेचनानन्तरं गुणाः प्रतिपादिता सन्ति । किन्तु ते खलु गुणनाम्ना नैव कथिताः[2] । वस्तुतो गुणनाम्नाऽकीर्तनाद् भामहस्यात्र मती रीताविव प्रवृत्ता प्रतीयते । अत्र माधुर्यादयः (गुणाः) केवलं शब्दाश्रिताः सन्ति । अर्वाचीनैरानन्दवर्धनादिभिरिवानेन गुणा रसधर्मत्वेन न प्रोक्ताः । माधुर्यादिनिरूपणं च मतान्तरानुवृत्तिरेव वर्तते । सा च "प्रयुञ्जते, केचित्, वाञ्छन्तः" एभिः पदैः स्फुटं प्रतीयते[3] । मतमेतत्स्वीकृतमेवेति निषेधाभावाद् ज्ञायते । एवं सत्यपि माधुर्यादयः काव्यत्वाधायक-विशिष्ट-तत्त्वतया नाभिप्रेता इव लक्ष्यन्ते आचार्यमते । अतः-उपरितने काव्यलक्षणे सगुणाविति विशेषणस्य दानं नूनं नानुमोदेताचार्यः ।

रीतिविषयेऽपि भामहस्य मतं स्फुटमेव । रीतिशब्दस्य प्रयोगोऽस्मिन् ग्रन्थे नास्ति, केवलं गौडीयवैदर्भशब्दौ काव्यविशेषणरूपेण प्रयुक्तौ । वस्तुतो गौडीयादिमार्गोल्लेखः परेषां मतस्य दूषणीयत्वमेव दर्शयितुं कृतः । मतं ह्येतत्केषामिति न कुत्राप्युक्तम्[4] ।

तन्मतदूषणे च भामहस्यायमाशयः—दोषपरिवर्जितं सालङ्कारञ्च गौडीयमपि साधीयः; अन्यथा वैदर्भमित्यपि न साधीयः । अपि च, निर्दोषं सालङ्कारमेव वैदर्भं युक्तम्; अन्यथा—

अपुष्टार्थमवक्रोक्ति प्रसन्नमृजु कोमलम् ।
भिन्नं गेयमिवेदं तु केवलं श्रुतिपेशलम् ।।

केवलं नितान्तादिश्रुतिपेशलशब्दैर्गिरां चारुता न जायते । ततो वैदर्भादिमाधुर्यादिभिन्नं सहृदयहृदयाह्लादि किमपि तत्त्वान्तरमेवात्रान्वेषणीयम् ।

भामहमते च तत्—

वक्रोक्तिः—भामहे हि भूयो भूयो वक्रोक्तेरेव काव्यत्वापादकत्वं दर्शयति । अतोऽत्र तत्स्वरूपं तन्मतेन विचारणीयतामर्हति । यद्यपि स न कुत्रापि तल्लक्षणं विवेचितवान् । तथापीतस्ततो व्यस्तैर्वचनैः तदभिमततत्स्वरूपनिर्धारणं न दुःशकम् ।

---

१. भामहे १।२०, ३५, ५९, ३४; ५।६७;
२. भामहस्य गुणविषयकं मतमन्यत्र विद्वद्भिः सम्यगालोचितपूर्वमेव । दृश्यताम्—
Pathak Commemoration Volnme : Bhamaha's View on Guna, PP. 353-358
३. भामहे २।१-२
४. भामहे १।३१-३६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भामहोक्तवक्रोक्तिनिरूपकवचनसंग्रहस्तद्विवेचनञ्च विद्वद्भिः कृतमेव[1]। एतन्मते निखिलानि काव्यसौन्दर्याधायकानि तत्त्वानि वक्रोक्तितत्त्वेऽन्तर्भवन्ति । न चार्वाचीनैर्वक्रोक्तिनामकोऽलंकार-विशेषः स्वीकृत इति कथं तस्यैतादृशं स्वरूपमुच्यत इति वाच्यम्। यतो भामहालंकारे नास्ति कश्चिद् वक्रोक्तिनामकः पृथगलंकारविशेषः । एवञ्च प्राचीनकाले योऽलंकारपदस्य व्यापकोऽर्थः स एव वक्रोक्ति-पदस्यापि अभिप्रेतः । अलंकाराणामलंकारता वक्रोक्त्यैव सम्पद्यते, वक्रोक्त्यैव च चारुता जायते—इति भामहस्य मतम्[2]। तां विना काव्यं न प्रसरति, प्रसृतं वोपहसनीयं भवति । उपहसनीयं च काव्यं कवेः साक्षान्मरणमेव ।

अतएव चारुता काव्यस्य जीवितभूता । भामहो यद्यपि चारुतामात्मरूपेण न प्रख्यापयति तथापि पर्यालोचनेन सा तथैव तदभिप्रेता इति ज्ञायते ।

भामहेन कृतं स्वभावोक्तिप्रतिपादनं परकीयमतानुवाद एव । तथा हि—

स्वभावोक्तिरलंकार इति केचित् प्रचक्षते ।
अर्थस्य तदवस्थत्वं स्वभावोऽभिहितो यथा ॥[3]

अत्रकेचिदितिपदादानेन प्रतीयते यत् स्वभावोक्तिं पृथगलंकाररूपेण न स्वीकरोति भामह इति केचित् कथयन्ति । सुनिपुणं परीक्ष्यमाणे तु नैव तन्मतं युक्तम् प्रतिभाति ।[4]

यदि हि स्वभावोक्तिरलंकारो भामहस्य नाभिप्रेतस्तर्ह्यवश्यमेव स्ववैमत्यं ब्रूयात् । अन्यत्र हि हेतुसूक्ष्मलेशप्रसंगे महता संरंभेण स्वविमतिं दर्शयता तेषामलङ्कारत्वखण्डनं तेन कृतमेव । आचार्य-सुशीलकुमारडेमहोदयस्तन्मतानुसारिणश्च स्वभावोक्तिविषये 'एवंभूता स्वभावोक्तिः (स्वभावकथनं) दण्ड्याराधिता, भामहस्य संमिमतेति तन्मतेन ।

---

1. Bhandarkar Commemoration Volume: Predhvani Schools by Shri Sovani.

२. न नितान्तादिमात्रेण जायते चारुता गिराम् ।
वक्राभिधेयशब्दोक्तिरिष्टा वाचामलंकृतिः ॥ काव्या० १।३६॥

सैषा सर्वैव वक्रोक्तिरनयार्थो विभाव्यते ।
यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया विना ॥ २।८५

हेतुः सूक्ष्मोऽथ लेशोऽथ नालंकारतया मतः ।
समुदायाभिधानस्य वक्रोक्त्यनभिधानतः ॥ २।८६

वाचां वक्रार्थशब्दोक्तिरलंकाराय कल्पते ॥५।६६

३. तत्रैव २।९३

4. Definition of Poetry: D. T. Tatacharya, Thesis for M. O. L., Madras University.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वभावोक्तेरलंकारत्वं नैव भवति। अपि च कुन्तलः[1] स्वभावोक्त्यलंकारविषये भामहमतमेवानुसरति।" इत्याहुः। तच्च नातिसमीचीनं। भामहालंकारे हि कुत्र स्वभावोक्तिखण्डनं कृतमिति निखिलेऽपि ग्रन्थेऽनुशीलिते बोद्धुं न पारयामः।[2] स्वभावोक्त्यलंकारकारिकायाम्[3] अन्यमतोद्धरणवाचकं केचिदिति पदमेव भामहस्य वैमत्यसूचकमिति नैव वक्तुं युक्तम्, केचिदिति पदस्य निषेधार्थेऽवाचकत्वात्।

वस्तुतः केचिदादिशब्दप्रयोगो नानावक्तृकतामेव ज्ञापयितुं कृतः (१), न तु वैमत्यं प्रकटयितुम्। तथा च भामहः स्वग्रन्थान्ते स्वस्य बहुग्रन्थावलोकनशीलत्वमुक्तवानेव[3]। न च, तर्हि आशीरलंकारोऽपि भामहस्यासंमत इति वाच्यम्। प्रमाणाभावात्, वक्ष्यमाणभामहपद्धतिविरोधाच्च। अतः स्वभावोक्तिप्रसङ्गेऽपि केचिदितिपदेन तदङ्गीकृतत्वं सिद्धम्। भामहालंकारादिषु सोदाहरणलक्षणसंगतिप्रक्रिया दृश्यत एव।[4] यत्र च सा न दृश्यते, तत्र निगदव्याख्यातत्वादेव तथा। यत्र तु कस्यचिन्मतस्य विरोधोऽभीष्टः, तत्र विरोधप्रदर्शनेऽभिनिवेशविशेषो भामहस्य सुतरां दृश्यते।

एतावता सिध्यति यद्भामहमतेनापि स्वभावोक्तिरलंकार एव वर्तते। एवञ्चाचार्यडेमहोदयेन कुन्तकस्य स्वभावोक्त्यनङ्गीकारे यद्भामहानुसारित्वमुक्तं तदपि दूषितम्। अथ च कुन्तकोऽपि स्वभावोक्तिखण्डनमारभमाणः पूर्वपरम्परामेव दर्शयति—"ननु च किमिदं प्रसिद्धार्थविरुद्धं प्रतिज्ञायते यद्वक्रोक्तिरेवालंकारो नान्यः कश्चिदिति। यतश्चिरन्तनैरपरं स्वभावोक्तिलक्षणमलंकरणमाम्नातम्।"[5] अत्र प्रयुक्तेन चिरन्तनाभिधानेन भामहोऽस्याभिप्रेत इति प्रतिभाति। आचार्यडेमहोदयप्रतिपादितं स्वभावोक्तिविषये कुन्तकस्य भामहानुसारित्वं कुतः सिध्यतीति नैव प्रतीयते। आचार्यसोवानी प्रतिपादयति[6] यत् कुन्तको भामहस्वीकृतान् यथासंख्याद्यलंकारान् नैवानुमन्यते। एवं हि कुन्तककृतो भामहविरोधः बहुषु स्थलेषु दृश्यते। अतो वक्रोक्तिविषये तदनुसारित्वं कुन्तकस्य दृष्ट्वा स्वभावोक्तिविषयेऽपि स एव न्यायो न ज्यायान्। वस्तुतस्तु स्वभावोक्तेरलंकारत्वं वस्तुनः सौन्दर्ये निहितम्।

गोरपत्यं बलीवर्दः तृणान्यत्ति मुखेन सः।

अथवा

गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः।[7]
इत्येवमादि किं काव्यं वार्तामेनां प्रचक्षते॥

A केचित् इति पदस्य 'अल्पसंख्याकतयाननुसरणीयत्व'रूपेण निषेधव्यञ्जकत्वं तु विवादातीतम्।=Editor.

१. Introduction to वक्रोक्तिजीवित edited by Dr. De, P.XIV. हिन्दी आलोचनाः उद्भव और विकास—भगवत्स्वरूपमिश्रस्य पी. एच. डी. शोधप्रबन्धः पृ. ८५.

२. प्रस्तुतनिबन्धस्य पाद टिप्पणक्रमाङ्कः...११.

३. भामहालंकारे २।९४; दृश्यन्ताम् १।४०; २।४९; एवमन्येऽपि.

४. यथा २।१९, ३७, ३८, ८६, ८७;

५. वक्रोक्ति० १।१० वृत्तिः।

६. Bhandarkar Commemoration Vol. P. 396.

७. भामहालंकारे २।८७.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्यत्र वस्तुसौन्दर्यं नास्ति। स्वभावोक्त्युदाहरणे[1] तु वस्तुसौन्दर्यवशादेव स्वभावोक्त्यलंकारो वर्तते। अत्र च रसिकप्रतीतिरेव प्रमाणम्। भामहस्य स्वभावोक्तिस्तु अन्यतोऽपि निश्चीयते—

युक्तं वक्रस्वभावोक्त्या सर्वमेवैतदिष्यते।[2]

अत्रत्यं स्वभावशब्दमुपेक्ष्य 'वक्रोक्तिमात्रं तस्यार्थः, इति कस्यचिदुक्तिर्नः युक्ता। स्वभावोक्त्यर्थग्रहणं यदि तस्य न क्रियेत तर्हि तत्र स्वभावशब्दस्य का संगतिः ?

अथान्यदपि भामह–संमत–काव्यलक्षणद्वयकं चिन्तनीयम्।

अग्राम्यशब्दमर्थ्यञ्च सालंकारं सदाश्रयम्।[3]
अलंकारवदग्राम्यमर्थ्यं न्याय्यमनाकुलम्।[4]

एते खलु वाक्ये शब्दमात्रादेव भिद्येते। एताभ्यां च काव्यस्वरूपमेव स्पष्टं भवति। उभयत्रापि ग्राम्यदोषस्य त्याज्यता, अलंकारस्य च ग्राह्यता प्रतिपादिता। अन्यच्च सालंकारमेव काव्यमिति 'काव्यालंकारः' इति ग्रन्थनाम्नैव स्फुटीभवति[5]। आचार्यसोवानीमहोदयस्तु[6] गुणालंकारयोः काव्यालंकरणदृष्ट्या न कश्चिद् भेदो भामहेन कृत इति प्रतिपादितवान्। वस्तुतो भरतमतानुसरणं एव भामहोऽत्र कृतवान्, किन्तु न परम्परापालनमात्रबुध्या; अपि तु सुविचार्यैव। सर्वाणि हि सौन्दर्य-निष्पादकानि तत्त्वान्यलंकारतत्त्वेऽन्तर्भवन्ति। प्रत्ययादीनामपि सुष्ठुप्रयोगोऽलंकार इत्याह—'एवंणिचः प्रयोगस्तु सर्वत्रालंकृतिः परा'।[7] एवं च चारुता एवालंकार इत्यर्थो निष्पन्नः। चारुता च वक्रोक्त्या दोषराहित्येन च सम्पद्यते। अतएव 'अदोषौ सालंकारौ सहितौ शब्दार्थौ काव्यमि'ति तावत् काव्यलक्षणम् आचार्यवरभामहस्याभिप्रेतं—इति स्थितम्।

---

१. तत्रैव २।९४.
२. तत्रैव १।३९.
३. तत्रैव १।१९.
४. तत्रैव १।३५.
५. काव्यालंकार इत्येष यथाबुद्धि विधास्यते। १।१.
६. Bhandarkar Commemoration Volume, p. 305.
७. भामाहलंकारे ६।४६.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्याद्वादमञ्जरिविधूननम्

श्रीराजेन्द्रचौधरी

ब्राह्मीमाद्यां गुरून्नत्वा मया "राजेन्द्र" शर्म्मणा।
स्याद्वादमञ्जर्याक्षेपा निरस्यन्ते स्वतुष्टये ॥१॥

अयि विविधानवद्यविद्याविद्योतितान्तःकरणसारग्रहणरसिकाः! सुरभारतीसमुपासकाः? विपश्चिद्वरेण्याः! गुणैकपक्षपातिनो विद्वान्सः?

विदितमेवात्र भवतां यदद्यत्वेऽपि निखिले विश्वस्मिन् रागादिदोषजन्यमलिनान्तःकरणानामल्पज्ञानाम्प्राणिनामुद्धारायानुपलब्धिर्विकल्पकादिसमाधिभावापन्नात्मतत्त्वजिज्ञासूनां समदर्शिनाम्मुमुक्षूणाञ्जीवानामात्मतत्त्वबोधाय च दर्शनस्य कीदृङ्महत्त्वमुपयोगित्वञ्च वर्तत इति नाविदितङ्कैश्चित्।

परञ्च तत्र दर्शनपदार्थज्ञानमन्तरा कथन्ते सफला भविष्यन्ति, इति तेषां सञ्ज्ञानायैव परमकारुणिको मुनिः दर्शनशास्त्राणि प्रणिनाय। यद्यप्यत्र दर्शनपदेन दृश्यतेऽनेनेति व्युत्पत्त्या लौकिकालौकिकोभयविधप्रत्यक्षकारकाणि बाह्याभ्यन्तराणीन्द्रियाणि भवितुमर्हन्ति, तथापि दृश्यते ज्ञायत आत्मानेनेति व्युत्पत्त्या ज्ञानसामान्यार्थकाद्दृशिधातोः करणल्युटा निष्पन्नदर्शनपदेन चेतनवस्तुविषयविचारपरमागमात्मकं शास्त्रमेव बुद्ध्यते गृह्यते च। तानि शास्त्राणि प्रसिद्धानीमानि बोद्धव्यानि—

"कपिलस्य कणादस्य गौतमस्य पतञ्जलेः।
व्यासस्य जैमिनेश्चापि शास्त्राण्याहुःषडेव हि" ॥

इति षडास्तिकानि दर्शनानि द्विविधेषु दर्शनेषूपलभ्यन्ते। सौत्रान्तिकवैभाषिकयोगाचारमाध्यमिकेति भेदसिद्धबौद्धेन सह चार्वाकजैनदर्शनाभ्यां सहितन्नास्तिकदर्शनषट्कमिति सम्मिल्य द्वादशदर्शनानि सन्ति। पूर्णप्रज्ञाद्यवान्तरभेदाच्च षोडशविधान्यपि दर्शनानि भवन्ति। तत्रास्तिकेष्वपि शाङ्करवेदान्तादीन्यभेदग्राहीणि श्रौतानि, तर्केण मूलतत्त्वान्वेषकाणि तार्किकादीनि च भेदग्राहीण्युपलभ्यन्त इत्यभेदभेदोभयग्राहीणि दर्शनशास्त्राणि क्रमशः सन्ति। सम्प्रति जैनदर्शनविषये किञ्चिन्निदर्श्यते। यद्यप्यत्रास्ति "परलोक" इति मतिर्यस्यासावास्तिकः, "नास्ति परलोक" इति मतिर्यस्य स नास्तिकः इति तयोर्विग्रहो भवितुमर्हति। तथा च "जैनदर्शनेन" परलोकस्वीकारात्कथन्नास्तिकदर्शनेऽन्तर्भावस्तस्येति शङ्कोदेति, तथापि "नास्तिको वेदनिन्दकः" इति लक्षणानुसारादेव तस्य नास्तिकत्वं समुपपद्यते—इति न विवादः। यद्यपि जैनबौद्धदर्शनयोरनेकत्र साम्यमुपलभ्यते, तथाप्यनात्मवादीनि बौद्धदर्शनानि, वैदिकदर्शनवज्जैनदर्शनञ्चात्मवादीति तयोर्भेदः स्पष्ट एव। एतन्मते बाह्यवस्तुन आत्मनश्च द्रव्यत्वं सिद्धम्। निश्चितमेकं सिद्धान्तमवलम्ब्यैव प्रायः सर्वाणि दर्शनानि प्रसिद्धान्येकान्तवादीनि। परं तत्र जैनदर्शनञ्च न सर्वथैकांन्तवादि अपितु, अनेकान्तवादित्वेन प्रसिद्धम्। एतन्मते वस्तुमात्रं सापेक्षन्नित्यानित्योभयात्मकं सामान्यविशेषोभयात्मकञ्चास्ति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनेकान्तवादोऽयन्तर्कशास्त्रे "सप्तभङ्गीनय स्याद्वादेति" नाम्ना च प्रसिद्धः। अनेकान्तवादे-सुवर्णस्य कङ्कणरुचकादिविविधभेदसिद्धपरिवर्तनीयविभिन्नधर्मविशिष्टत्वमवस्थाविशेषेऽचापरिवर्तनीयधर्मविशिष्टत्वन्द्रव्यत्वञ्चाङ्गीक्रियतेऽत एकस्मिन्पदार्थे उभयस्वरूपस्य सत्वादनेकान्तवादः सिद्ध्यति। एतन्मते द्रव्यवृत्तिस्थिरधर्मस्य गुणत्वम्परिवर्तनीयधर्मस्य च पर्यायत्वम्भवतीति तस्य महती विशेषता। विचारोऽयन्नान्यत्र कुत्रचिदुपलभ्यते—यतो द्रव्यात्मकपर्यायात्मकोभयदृष्ट्याऽनेकान्तवादस्य स्थापनमत्रैवोपलभ्यते। एतन्मते जीवश्चैतन्यमयः। ज्ञानमेव तस्य लक्षणम्। स च जीवो निसर्गतोऽनन्तज्ञानविशिष्टः। तस्य कर्मावरणद्वारैव चैतन्यमावृतम्। परञ्च सम्यक्चारित्र्यसेवनात्सः शुद्धस्वरूपमाप्नोति। प्रत्यक्षपरोक्षयोर्भेदेन जीवस्य द्वैविध्यमङ्गीक्रियतेऽत्र। तत्रात्मसापेक्षज्ञानम्प्रत्यक्षम्। मनः सापेक्षज्ञानञ्च परोक्षम्। अत्र यस्य ज्ञानस्योपलब्धौ स्वयमात्मा कारणीभूतोऽन्यदीयसहयोगमन्तरैव भवति तदेव प्रत्यक्षमत उक्तप्रत्यक्षलक्षणं सम्यक्। यस्य च बाह्येन्द्रियेण मनसा वा ज्ञानन्तत्परोक्षमाचक्षते। अवधिमनःपर्यायकेवलभेदाच्च प्रत्यक्षन्त्रिविधम्बोध्यमत्र। तत्र दूरस्थपदार्थज्ञानमवधिज्ञानाख्यम्। परकीयविचार—ज्ञानार्थम्मनः पर्यायज्ञानम्। यदा चावरणीयकर्मक्षयानन्तरमात्मा शुद्धसर्वज्ञत्वमवाप्नोति तदा केवलज्ञानमाख्यायते। केचिच्च—मतिश्रुतभेदात्परोक्षज्ञानमपि द्विविधमामनन्ति। आचार्यहेमचन्द्रकृतप्रमाणमीमांसानुसारेण ज्ञायते यत् "स्मृतिप्रत्यभिज्ञानतर्कानुमानागमभेदाच्च" पञ्चविधम्परोक्षज्ञानम्। सामान्यतया प्रत्यक्षानुमानागमाख्यानि त्रीणि प्रमाणानि सन्ति जैनदर्शनसम्मतानि। दर्शनस्यास्य सिद्धान्तो यत्पदार्थमात्रमनन्तधर्मात्मकम्भवति। किन्तु तज्ज्ञानं केवलज्ञानिनामेव भवति, नान्येषां केषाञ्चिज्जनानाम्भवितुमर्हति। जीवातिरिक्तस्तु पुद्गलशब्देनोच्यते। ततः पुद्गलशब्दात्—पूरयन्ति गलन्ति चेति विग्रहवशात्प्रचयादिना शरीरनिष्पादकः पदार्थविशेष एव गृह्यते। एतस्याणुसंघातभेदाच्च द्वौ भेदौ स्तः। संघातेनानेनैव शरीरादयः समस्ताः सृष्टयः सञ्जायन्ते। पौद्गलिके पदार्थेऽस्मिन् "रूपरसगन्धस्पर्शाख्या" श्चत्वारो गुणास्तिष्ठन्ति। "स्पर्शरसगन्धवर्णवन्तः पुद्गलाः" इति तत्त्वार्थसूत्रान्निश्चीयते।

साधारणतया ज्ञानस्य दुर्णयनयप्रमाणभेदात्त्रैविध्यम्बोध्यम्। अत्र विभिन्नधर्मान्तर्गतेषु धर्मस्यैकस्य ज्ञानन्नयपदवाच्यम्। यद्यप्यवान्तरभेदान्नयस्यानेकविधत्वमुपलभ्यते, तथापि मुख्यरूपेण द्रव्यार्थिकपर्यायार्थिकभेदाद्द्विविधो नयो बोध्यः। तत्राद्यस्य त्रैविध्यमन्तिमस्य च चातुर्विध्यमिति सप्तप्रकाराः "नैगमसंग्रहव्यवहारऋजुशब्दरूढैवंभूताख्याः" नयस्य प्रभवन्ति। तीर्थङ्कराः श्रीमहावीरस्वामिमहाभागाः भगवतीसत्रेऽत्र स्याच्छब्दविशेषणेन "स्यादस्ति," स्यान्नास्ति", "स्यादवक्तव्य"मिति भेदत्रयङ्कृतवन्तः। एतस्यैव मूलभंगस्य परस्परं सम्मिश्रणेन "सप्तभङ्गीनयाख्यः" प्रादूर्भूयते। ते च क्रमशः "स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यम्, स्यादस्ति चावक्तव्यञ्च, स्यान्नास्ति चावक्तव्यञ्च, स्यादस्ति च नास्ति चावक्तव्यञ्चेति" सप्तधा सप्तभङ्गीनयो व्यपदिश्यते।

जैनदर्शनानुसारेण ज्ञायते यदाश्रवो भवहेतुः संवरश्च मोक्षकारणम्। तथा हि—

"आश्रवो भवहेतुः स्यात् संवरो मोक्षकारणम्।
इतीयमार्हतीदृष्टिरन्यदस्याः प्रपञ्चनम्॥"

अत्र "सम्यग्दर्शनसम्यग्ज्ञानसम्यक्चारित्र्य" भेदान्मोक्षस्य त्रीणि साधनानि सन्ति। रत्नत्रयनाम्नाऽपि प्रसिद्धानीमानि। जीवो यद्यपि निसर्गतो मुक्तस्तथापि वासनाजन्यङ्कर्मैव तदावरकमतस्तेनावृतः सः। पौद्गलिकमिदं कर्माख्यायते। इत्यार्हतदर्शनस्य संक्षिप्तः परिचयः प्रादर्शि मया।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एतत्सिद्धान्तानुसारेणैवैकान्तवादिदर्शन-ग्रन्थाक्षेपकैः कलिकालसर्वज्ञैश्श्री "हेमचन्द्र" महाभागैर्निर्मिताया अनेकान्तवादतत्वप्रदर्शिकाया अन्ययोगव्यवच्छेदद्वात्रिंशिकायास्तत्वनटीकास्वरूपं विद्वद्वरेण्याश्श्री "मल्लिषेणसूरि" महाभागाः स्वीयं सुललित-गद्यनिचय-सम्बद्धं "स्याद्वादमञ्जरी" नाम पुस्तकमारचयामासुः ।

तत्र यद्यप्यल्पविषयामतिरहन्तथाप्युडुपेनास्मि सागरमिवात्रार्हतदर्शनार्णवमध्ये वस्तुतो वास्तविकतत्वविवेचनप्रणाल्यात्र प्रायः प्रदर्शितसमस्तदूषणोद्धारायैव कृतप्रयासः ।

अतोऽत्र प्रदर्शित आक्षेपोद्धारः साधीयानसाधीयान्वेति विचारार्थमेव विदुषाम्पुरस्तादमुमहं समर्पयामि ।

तदत्र नीरक्षीरविवेकमुखेन गुणैकपक्षपातिनस्तर्कतत्वविवेकदक्षाः सुधीराः "बालादपि सुभाषितङ्ग्राह्यमिति" रीत्या सकृदपि विषयममुमवलोक्य विचार्य च सूचयिष्यन्ति माञ्चेत्सफलां स्वकृतिमवश्यम्मन्येयमहमिति ।

तदत्र प्रथमम्पराभिप्रेतसिद्धञ्जैनाख्यनास्तिकदर्शनोक्तं सामान्यविशेषादिविषयकङ्खण्डनखण्डमभिलक्ष्य न्यायवैशेषिकशास्त्रोक्तन्तत्तद्विषयकमान्यताप्रदर्शनपूर्वकं स्याद्वादमञ्जर्युक्ताक्षेपम्परिहरामि । अथ " द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाख्येषु सप्तसु पदार्थेषु मध्ये सामान्यविशेषयोर्विषये तार्किकाः वैशेषिकाश्चेत्थमामनन्ति ।

यत्किल " गौरयं गौरयमिति " समानाकारानुगतप्रतीत्या गोत्वाख्या जातिः सिद्ध्यति । तया च जात्या समेषां गोत्वजातिविशिष्टानाङ्गोव्यक्तीनाम्बोध उत्पद्यते । नान्यथा गवां युगपद्बोधः कथमपि भवितुं शक्योऽतो निखिलानान्तत्तद्व्यक्तीनाम्बोधाय जातिरभ्युपेतव्या । सा चात्र—नित्यत्वविशिष्टानेकसमवेतरूपा ग्राह्या । अर्थात्—नित्यत्वविशिष्टा सत्यनेकनिरूपितसमवायसम्बन्धावच्छिन्नवृत्तित्ववती सा विवक्षिता । विशेषणपदाभावेऽत्रानेकसमवेतत्वस्य संयोगादावपि सत्त्वादतिव्याप्तिः स्यादतस्तस्य सार्थकत्वम् । एवमत्रानेकेति पदाभावे गगनपरिमाणादावप्युक्तलक्षणस्य सत्त्वादतिव्याप्तिः स्यादतस्तद्वारणाय तदपि सार्थकम् । एवं समवेतपदाभावेऽत्यन्ताभावेऽप्युक्तलक्षणस्य सत्वादतिव्याप्तिस्तदवस्था स्यादिति तद्वारणायानेकसमवेतेत्यस्य सार्थकत्वम् । तच्चानेकनिरूपितसमवायसम्बन्धावच्छिन्नवृत्तित्वरूपं ग्राह्यम् । तथाचात्यन्ताभावस्य समवायसम्बन्धावच्छिन्नत्वाभावादेवातिव्याप्तेर्निरासो बोध्यः । विशेषपदार्थश्च—"अन्त्यो नित्यद्रव्यवृत्तिः विशेषः परिकीर्तितः" इति न्यायसिद्धान्तमुक्तावल्युक्तप्रमाणेनान्त्यत्वविशिष्टोनित्यद्रव्यवृत्तिश्च स बोध्यः । परमाणुवृत्तिरेवायङ्ग्राह्यः । कावश्यकतैतस्येति चेत्—घटादिपदार्थद्वयोर्मध्ये एकस्माद्घटादपरो घटो भिन्नस्तत्र किम्मानमिति चेत्तद्घटारम्भकीभूतात्कपालस्वरूपादवयवात्तद्घटातिरिक्तघटारम्भकस्य कपालस्वरूपावयवस्य भेदाङ्गीकारात् । तत्रैव किम्मानमिति प्रश्ने तदवयवावयवादपरावयवावयवोभिन्न इत्युत्तरमिति । पुनः पूर्वरीत्या तत्र किम्मानमिति जिज्ञासायाम्परमाणुपर्यन्तमनुधावन्ति विज्ञाः । अर्थात् तद्घटारम्भकात्परमाणोरपरघटारम्भकः परमाणुरतिरिक्तः कल्प्यते । पुनस्तत्र किम्मानमिति चेत्, तत्रोभयपरमाणुवृत्तिरतिरिक्तो विशेषाख्यः पदार्थः पृथक् पृथक कल्प्यते । तथाचायन्नित्यद्रव्यपरमाणुवृत्तिः स्वतो व्यावर्तको विशेषः पदार्थः सिद्धः । अर्थात् सर्वानयं व्यावर्तयति, नत्वस्य कश्चिद्व्यावर्तकोऽन्यः, येनास्यापि व्यावृत्तिर्भवेत् । स्थितावस्यां यदि पुनरयम्प्रश्न उदेति तत्रैव

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

किम्मानमिति, तदानवस्था स्यादप्रामाणिकानन्तकल्पनया। अतोऽयम्प्रश्नोऽकिञ्चित्करः। अपिचास्मिन्स-मुपस्थिते प्रश्ने विशेषेऽपि यदि विशेषान्तरं कल्प्यते तदा विशेषाख्ये विशेषत्वमेव हन्यात्। यतः सर्वव्यावर्तकत्वस्वभावोऽस्य, नत्वत्र कस्यचिद्विशेषान्तरस्यावश्यकता, सत्वे च विशेषान्तरकल्पने विशेषस्य या विशेषता सा विहन्येत्। अतस्तत्र न कोऽप्यन्यो विशेषान्तरः सिद्धयतीति तर्कशास्त्र-सम्मतोऽदर्शि मया।

अत्र न्यायवैशेषिकशास्त्रोक्तयोस्सामान्यविशेषयोः पदार्थान्तरत्वमनवबोधयन्पदार्थ-मात्रस्यैव तदुभयात्मकत्वम्प्रतिपादयञ्जैनाचार्यस्तौखण्डयन्नाह—" स्वतोऽनुवृत्तिव्यतिवृत्तिभाजो भावा न भावान्तरनेयरूपाः। परात्मतत्त्वादतथात्मतत्त्वाद्द्वयं वदन्तोऽकुशलास्खलन्ति (स्या. म. पृ. १०-११, क. ४) अत्रायमर्थः—भावाः पदार्थाः न भावान्तरनेयरूपाः" अर्थात्-भावान्तराभ्याम्-पराभिमता-भ्यान्नेयम्प्रतीतिविषयम्प्रापणीयं रूपं यथासंख्यमनुवृत्तिव्यतिवृत्तिलक्षणं येषान्ते तथोक्ताः। सर्वभावानां स्वभाव एवायं यदनुवृत्तिव्यतिवृत्तिप्रत्ययौ स्वत एव जनयन्ति। तथा हि—

घट एव तावत्पृथुबुध्नोदराद्याकारवान्प्रतीतिविषयीभवन्सन्नन्यानपि तदाकृतिभृतः पदार्थान्घटरूप-तया घटैकशब्दवाच्यतया च प्रत्याययन्सामान्याख्यां लभते। स एव चेतरेभ्यस्सजातीयविजातीयेभ्यो द्रव्यक्षेत्रकालभावैरात्मानं व्यावर्तयन्विशेषव्यपदेशमश्नुते। इति न सामान्यविशेषयोः पृथक्पदार्थान्तरत्व-कल्पनं न्याय्यम् पदार्थधर्मत्वेनैव तयोः प्रतीयमानत्वात्। न च धर्मा धर्मिणः सकाशादत्यन्तं व्यति-रिक्ताः। एकान्तभेदे विशेषणविशेष्यभावानुपपत्तेः।

तदेवं सामान्यविशेषयोस्स्वतस्त्वं यथावदनवबुद्धयमाना अकुशला अतत्वाभिनिविष्टदृष्टयस्ती-र्थान्तरीयाः स्खलन्ति न्यायमार्गाद्भ्रश्यन्ति निरुत्तरीभवन्ति। इति परो व्याजहार। अत्रायं विचार उत्पद्यते—

यत्सामान्यविशेषोभयविषयकः प्रदत्त आक्षेपो न कथमपि विचारार्हः, यतः—परैः पदार्थमात्रस्य सामान्यविशेषोभयात्मकत्वमभिहितम्। अर्थात् किञ्चिदपेक्षया सामान्यात्मकत्वङ्किञ्चिदपेक्षया च विशेषात्मकत्वमामनन्ति ते पदार्थमात्राणाम्। न खलु सामान्यविशेषात्मकयोः पदार्थयोः वास्तविकन्तर्को-क्तल्लक्षणमङ्गीकृतन्तैः। यदि चात्र सामान्यविशेषयोः किल्लँक्षणमिति जिज्ञासा स्यात्तदा तदेवोत्तरं विज्ञजनदृग्गोचरीभूतमायास्यति यच्च सत्तर्कविचारसरणिप्रवीणैस्तार्किप्रवरैरङ्गीकृतम्। पश्यन्तु तावत्—पदार्थान्तर्गताः घटादयो व्यक्तिस्वरूपाः पदार्थाः भवन्त्वनुवृत्तिव्यतिवृत्तिप्रत्ययभाक्त्वेन सामान्यविशेषो-भयात्मकास्तत्र न कश्चिद्विवादः, किन्तु जात्यादयः पदार्थाः नोक्तोभयात्मका अपि तु स्वस्वकार्येऽन्येभ्य-स्सर्वेभ्यो विशेषा एव। जातौ न काप्यपरा जातिः विशेषो वा पदार्थस्तिष्ठति, येन तदुभयात्मकत्वस्य तत्रापादनमावश्यकम्। यदि च सामान्यविशेषयोरपि सामान्यविशेषोभयस्य सत्ता स्वीक्रियते तदा तत्रोभयवृत्ति सामान्येऽपि सामान्यम्पुनस्तत्रापि सामान्यमिति रीत्या सर्वथानवस्थावास्थिता स्यादप्रामाणिकानन्तकल्पनया। अतो न सामान्यादयस्तदुभयात्मका अनैकान्तिकत्वमापन्ना अपि तु सर्वथैकान्तिकत्वेन विशेषत्वमेव भजन्ते ते। अतस्तयोस्तदुभयात्मकत्वस्थापनमनुचितम्। यतः पारिभाषिकन्तर्कशास्त्रसम्मतन्तल्लक्षणं ज्ञात्वैव खण्डन-मपेक्षितम्। नहि तण्डुलंसम्यक्पिष्टं तण्डुलमवजानन्ति केऽपि। यस्य वस्तुनः यादृक्स्वरूपमस्ति तस्य तादृक्स्वरूपं गृहीत्वैव तत्र विचारः कर्तव्यः। परञ्चात्र तथा न जातमतो लक्षणस्वरूपमज्ञात्वा खण्डयितु-म्प्रवृत्ताः जैनाचार्याः स्वयमेवोपहास्यभाजनतामापन्ना इति महती महिषासुरगतिस्समुत्पन्ना। "यच्चोक्त-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मेकान्तभेदे विशेषणविशेष्यभावानुपपत्तेरिति" तन्न समीचीनम्, यतो विशेषणस्येतरव्यावर्तकत्वेन धर्मरूपत्वाद्विशेष्यीभूतपदार्थात् सर्वथैकान्तिकभिन्नत्वमेव। एवं धर्मिरूपस्य विशेष्याख्यपदार्थस्य विशेषणीभूतात्पदार्थात् सर्वथैकान्तिकभिन्नत्वमेव घटते। तत्र विशेषणस्य धर्मरूपत्वाद्विशेष्ये विद्यमानतापेक्षिता। न खलु विशेषणे विशेष्यस्य सत्तापितु विशेष्ये विशेषणमुपतिष्ठते। यच्च विशेष्यन्न तद्विशेषणम्, यच्च विशेषणन्न तद्विशेष्यम्। यथा घट इत्युक्ते घटे घटत्वं विशेषणम्, घटश्च विशेष्यस्तत्र न घटस्य विशेषणत्वन्नवा घटत्वस्य विशेष्यत्वमेव कथमपि केनापि कर्तुं शक्यतेऽतः पदार्थमात्रस्योभयात्मकत्वमपि न सिद्ध्यति न वा विशेषणविशेष्यभावस्यानुपपत्तिरेवेति बोध्यम्।

किञ्च पदार्थेभ्यः सामान्यविशेषयोरेकान्तभिन्नत्वे स्वीक्रियमाण एकवस्तुविषयमनुवृत्तिव्यावृत्तिरूपम्प्रत्ययद्वयन्नोपपद्येत । एकान्ताभेदे चान्यतरस्यासत्त्वप्रसङ्गस्सामान्यविशेषव्यवहाराभावश्च स्यात्। यतः— सामान्यविशेषोभयात्मकत्वेनैव वस्तुनः प्रमाणेन प्रतीतेरिति यदुक्तन्तदपि विचारानर्हम्। यतोऽनुगताकारप्रतीत्यैव सामान्याख्यायाः जातेः, "अन्त्यो नित्यद्रव्यवृत्तिः विशेषः परिकीर्तितः" इति न्यायसिद्धान्तमुक्तावल्युक्तप्रमाणेन विशेषपदार्थस्य चातिरिक्तपदार्थत्वाङ्गीकारात्।

अपि च तयोः कथमनुवृत्तिव्यतिवृत्तिरूपम्प्रत्ययद्वयन्नोपपद्येत यतः प्रमाणमत्र प्रदर्शनीयम्। प्रमाणमन्तरा न कस्यचित्पदार्थस्यावहेलनङ्कर्तुं शक्यते केनापि कदापि। यतः प्रमाणन्नात्रोपदर्शितमतो विज्ञजनविचारानर्होऽयमाक्षेपः।

मम मते तूभयोःपदार्थयोरपि विजातीयपदार्थाद्भिन्नत्वम् स्वापेक्षया चानुवृत्तिप्रत्ययकारित्वमुपपद्यत एवेति न कश्चिद्दोष एकान्तभिन्नत्वकल्पे।

अपि चैकान्ताभेदोऽन्यपदार्थापेक्षयां तयोर्न कथमपि भवितुमर्हति। यतस्तयोस्सर्वथा तदतिरिक्तेभ्यः पदार्थेभ्योतिरिक्तत्वमेवेत्येकान्ताभेदाभावस्तभावे च कथमन्यतरस्यासत्वप्रसङ्गरूपस्य दोषस्य सम्भवः। पश्यन्तु-यश्च घटादिर्न स उक्तविधः विशेषव्यपदेशभाक्, नवोक्तविधसामान्यलक्षणाक्रान्त एवेति कथमेकान्ताभेदकल्पः कल्प्यते भवतेति नोक्तो दोषः।

किञ्च यश्चाक्षेप्यस्सामान्यलक्षणाक्रान्तः पदार्थः न स उक्तविधो विशेषाख्यः पदार्थः, यश्च विशेषात्मकः पदार्थो न स उक्तविधस्सामान्यात्मकः पदार्थ इति सामान्यविशेषाख्यावतिरिक्तौ पदार्थौ सिद्ध्यतः तथा च कथं सामान्यविशेषव्यवहाराभावाख्यो दोषसम्भव इति प्राज्ञैर्विज्ञेयम्।

किञ्च सर्वत्रैव धर्मस्य धर्मिणोऽपेक्षया सर्वथा भिन्नत्वमेवानुभूयते सर्वैस्तान्त्रिकप्रवरैः। यथा ये च धर्मा घटत्वादयस्ते न धर्मिणः, ये च धर्मिस्वरूपाः घटादयस्ते न धर्मा इति तेषामैकान्तिकभिन्नत्वेन तत्र सामान्यविशेषव्यवहाराभावरूपो दोषाभावो बोध्यः।

नच यदि वृत्तिमत्वमेव धर्मस्य लक्षणमिष्टन्तदावयवेषु कपालादिषु समवायेन घटादिपदार्थस्य वृत्तित्वाद्घटादेरपि कथन्न धर्मत्वमिति वाच्यम्, सामान्यस्योक्तधर्मलक्षणाद्विलक्षणीभूतजातिस्वरूपाङ्गीकारात्। यद्यपि घटादयोऽपि वृत्तिमत्वेन धर्मस्वरूपास्सन्ति, तथापि तेषामनित्यत्वेन नित्यत्वविशिष्टायाः जातेस्तत्राभावो बोध्यः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ किन्नामानुवृत्तिव्यतिवृत्तिप्रत्ययकारित्वमिति चेत्, सजातीयस्वानुरूपार्थप्रत्याय(बोध)कत्वमनुवृत्तिप्रत्ययकारित्वम्, विजातीयविभिन्नाकारार्थप्रत्याय(बोध)कत्वं व्यतिवृत्तिप्रत्ययकारित्वम्। यथा घट इत्यत्र सजातीयपृथुबुध्नोदराद्याकृतिविशिष्टार्थप्रत्याय(बोध)कत्वेन सह विजातीयपटादिविभिन्नार्थप्रत्ययराहित्येनोक्तलक्षणस्य सत्वात्सामान्यविशेषोभयात्मकत्वं समुपपद्यते। न तथा न्यायवैशेषिकशास्त्राभिमतसामान्याख्यायाञ्जातौ विशेषाख्ये पदार्थे वोक्तोभयत्वङ्कथमपि निष्पादयितुं शक्यमिति बालभाषित इवायमाक्षेपः। नचात्र सामान्यविशेषौ पदार्थावपि स्व स्वात्मना प्रत्याययन्तौ परात्मना च व्यावर्तयन्तौ कथन्नोभयात्मकाविति वाच्यम्, पदार्थयोरुक्तोभयांस्तर्कशास्त्रप्रदर्शितपथेन पारिभाषिकविशेषलक्षणलक्षितत्वस्यैवाङ्गीकारेणोक्तोभयविधत्वाभावात्। यदि च परापरोभयान्तर्गतस्यापरसामान्यस्य सामान्यात्मकत्वम्परसामान्यस्य च व्यापकत्वाद्विशेषात्मकत्वमभ्युपगम्येत तदा का क्षतिरिति चेत्, तत्र व्याप्यव्यापकोभयविभागेनोक्तोभयविधत्वानङ्गीकाराद्व्याप्यव्यापकविभागस्य भङ्गः स्यात्। घटत्वादिसामान्ये परमाणुवृत्तिविशेषे वा सामान्यविशेषोभययात्मकत्वन्न कैरप्यङ्गीक्रियते, मानाभावात्। तत्र पदार्थमात्रे तदुभयात्मकत्वमाकल्पयितुम्प्रवृत्ताः जैनाचार्यास्स्वयमेवोपहास्यपात्रत्वमापन्ना इति महती सत्तर्कगतिरिति सुधीभिस्सततमविस्मरणीयम्। इति स्याद्वादमञ्जर्युक्तस्य चतुर्थकारिकाप्रदत्ताक्षेपस्य परिहारः समाप्तः।

अथ न्यायादिदर्शनाभिमतमेकान्तन्नित्यानित्योभयपक्षमवलम्ब्य परैः—" आदीपमाव्योमसमस्वभावं, स्याद्वादमुद्रानतिभेदि वस्तु " [स्या. म. पृ. १३, पं. १] इत्यादिना यदुक्तन्तत्परिहरामि। तत्र प्रथमन्तर्कपक्षमुपस्थापयामि। द्रव्यादिसप्तपदार्थान्तर्गताः षड्विधाः भावात्मकाः पदार्थाः सन्ति। तत्र द्रव्यान्तर्गतपृथिव्यादिचतुष्टयान्तर्गताः घटादयो विविधाः पदार्था उत्पादविनाशशालित्वेन द्व्यणुकादितस्स्थूलावयविपर्यन्ताः सर्वथैकान्तिकत्वेनानित्या एव, न नित्याः। एवमाकाशादयः पञ्चविधाः उत्पादविनाशराहित्येन सर्वथा नित्या एव पदार्थाः, नानित्या इति नित्यानित्येषु पदार्थेषु मध्ये ये नित्यास्ते नानित्याः, येचानित्यास्ते न नित्याः, नित्यत्वानित्यत्वयोः परस्परं विरोधात्। अतः सर्वथैकान्तिकाः केचन् विविधा अनित्या एव, केचंस्त्वैकान्तिका सर्वथा नित्या एव पदार्थास्सन्ति तार्किकाणाम्मते।

तत्रार्हतमतानुयायिनस्तु—सर्ववस्तूनां समस्वभावत्वकथनेन द्रव्यार्थिकनयापेक्षया पदार्थमात्रस्य नित्यत्वम्पर्यायार्थिकनयापेक्षया च तस्यानित्यत्वमिति नित्यानित्योभयपक्षमामनन्ति तेऽनेकान्तवादिनः। सर्वथैकान्तिकेऽनित्ये प्रदीपेऽपि तथैव स्वीकुर्वन्त्युभयपक्षन्ते। तथाहि (स्या. म. पृ. १४, पं. १) प्रदीपपर्यायापन्नास्तैजसाः परमाणवस्स्वरसतस्तैलक्षयाद्वाताभिघाताद्वा ज्योतिः पर्यायम्परित्यज्य तमोरूपम्पर्यायान्तरमासादयन्तोऽपि नैकान्तेनानित्याः पुद्गलद्रव्यरूपतयावस्थितत्वात्तेषाम्।

नच तमसः पौद्गलिकत्वमसिद्धम्, चाक्षुषत्वान्यथानुपपत्तेः प्रदीपालोकवत्। न च द्रव्यप्रत्यक्षम्प्रत्यालोकसापेक्षस्य चक्षुषः कारणत्वाङ्गीकारेण तमसो रूपाभावात्कथञ्चाक्षुषत्वमिति वाच्यम्, उलूकादीनामालोकमन्तरेणापि तत्प्रतिभासात्। प्रदीपचन्द्रादयोऽप्यालोकनिरपेक्षा एवातस्तेषाम्प्रत्यक्षे न किमपि बाधकम्। एवन्तमसः प्रत्यक्षेऽप्यालोकनिरपेक्षस्यैव चक्षुषः कारणत्वमभ्युपगन्तव्यमिति सिद्धन्तमसः चाक्षुषत्वम्। नच. रूपाभावात्कथञ्चाक्षुषन्तम इति वाच्यम्, नीलन्तमश्चलतीति प्रतीत्या तस्यापि चाक्षुषत्वे बाधकाभावात्। रूपवत्वेनैव शीतस्पर्शवत्वस्यापि प्रतीतिः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नच तैजसाः परमाणवस्तमस्त्वेन कथम्परिणमन्त इति वाच्यम्, पुद्गलानान्तत्तत्सामग्रीसहकृतानां विसदृशकार्योत्पादकत्वस्यापि दर्शनात्। एतावता प्रदीपस्यापि प्रतिपलन्नवनवपर्यायोत्पादविनाशशालित्वात् प्रदीपत्वान्वयाच्चपेक्षिकनित्यानित्योभयात्मकत्वं सिद्ध्यति। अत्र प्रदर्शिता आक्षेपा न विज्ञजनविचारार्हाः-तमसोऽद्रव्यत्वेनाचाक्षुषत्वात्। अथ तमः कः पदार्थ इति चेदावश्यकप्रौढप्रकाशकतेजोऽभावस्यैव तमस्त्व-मङ्गीकृतन्तार्किकैः। नचात्रान्धकाराभाव एव कथन्न तेज इति वाच्यम्, तेजसः सर्वजनप्रतीतिसिद्ध-विषयस्याभावपदार्थत्वानङ्गीकारात्। तमसश्च "गुणवत्वे सति क्रियावत्व" स्वरूपद्रव्यलक्षणलक्ष्यत्वा-भावाद्भावपदार्थत्वाभावो बोध्यः। रूपवत्ताक्रियावत्ताप्रतीतेश्चालोकापसरणौपाधिकीभ्रान्तिरेव बोध्यात्र।

नच "तमः खलु चलन्नीलम्परापरविभागवत्" प्रतीतेरस्याः को विषय इति वाच्यम्, तस्यापि भ्रमरूपत्वात्। तथा च तमसो द्रव्यत्वाभावः सिद्धः।

"यच्चोक्तं रूपवत्वाच्च स्पर्शवत्वस्यापि प्रतीतिरिति न विचारार्हः" प्रमाणाभावात्। तदायं संगच्छते – यदा च 'यत्र यत्र रूपवत्त्वन्तत्र तत्र स्पर्शवत्त्वम्" इति व्याप्तिः स्यात्, परञ्च तदेव न घटते रूपवत्वस्य सत्वेऽपि स्पर्शवत्वस्य सूर्यचन्द्रादावभावात् इति तमसो द्रव्यत्वन्न सिद्धम्।

यद्वाद्यन्धकारादौ भावत्वन्निषिध्यत इति तदसंगतम्, यतस्त्रानेकधा विवादसम्भवात् तथाहि– "द्रव्यन्तम" इति भाट्टा वेदान्तिनश्च वदन्ति, आरोपितन्नीलरूपमिति श्रीधरः। आलोकज्ञानाभाव इति प्राभाकरैकदेशिनः। आलोकाभाव इति तार्किकादयः। इति विभिन्नेषु विवादेष्वत्र तमसो द्रव्यत्वमशक्यम्, विकल्पानुपपत्तेः। तमोरूपमिदन्द्रव्यम्पृथिव्याद्यन्यतममन्यद्वेति विचारे नाद्यः यत्रान्तर्भावोऽस्य कर्तुं शक्यन्तस्य यावन्तो गुणास्तावद्गुणकत्वप्रसङ्गात्। नापरः पक्षो निर्गुणस्य तस्य द्रव्यत्वासम्भवेन द्रव्यान्तरत्वस्य सुतरामसम्भवात्। ननु तमालश्यामलत्वे नोपलभ्यमानन्तमः कथन्निर्गुणं स्यादिति चेत्तदसारम्, गन्धादिव्याप्तस्य नीलरूपस्य तन्निवृत्तौ निवृत्तेः। नच नीलन्तम इति प्रतीतेः का गतिरिति वाच्यम्, "नीलन्नभः" इति प्रतीतिवत्तस्यापि भ्रमत्वात्। नचारोपितन्तमः कथन्नेति वाच्यम्, अधि-ष्ठानप्रत्ययमन्तरेणारोपाभावात्। अथाप्यचाक्षुषन्तमः कथन्नेति चेन्न, तदनुविधानस्यान्यथासिद्धत्वप्रसंगात्।

नन्वेवमप्यालोकज्ञानाभाव एव तमः कुतो नेति चेन्न, अभावस्य प्रतियोगिग्राहकेन्द्रियग्राह्यत्व-नियमेन मानसत्वप्रसङ्गात्। तस्मादालोकाभाव एव तमः पदार्थो निर्विवादः।

तथा चात्र प्रौढप्रकाशकतेजोऽभावस्यैव तमः पदार्थत्वं सिद्धमिति सर्वं मनसि निधायैव प्रणिनाय सूत्रम्भगवान्कणादः—

"द्रव्यगुणकर्मनिष्पत्तिवैधर्म्याद्भावस्तमः" (क० सू० ५–२–१९) इति प्रमाणेन तमसोऽ-भावत्वसिद्धावेव सर्वसामञ्जस्यसम्भवे तस्यातिरिक्तत्वकल्पने मानाभावो बोध्य। इति स्याद्वादमञ्जर्युक्तस्य पञ्चमकारिकाप्रदत्ताक्षेपस्य परिहारः समाप्तः।

एवम्पदार्थमात्रस्य न नित्यानित्योभयत्वम्। यतो यत्र नित्यत्वन्तत्र नानित्यत्वम्, यत्र चानित्यत्वन्तत्र न नित्यत्वम्। परस्परमनयोर्निसर्गतो विरोधात्। नित्य आकाशादावुत्पादविनाशशालि-त्वरूपानित्यत्वस्याभावादनित्यत्वाभावः। एवन्तद्रहितत्वरूपस्य नित्यत्वस्यानित्ये घटादावभावान्न सर्वत्र

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नित्यानित्योभयत्वम्। आपेक्षिकनित्यानित्योभयत्वस्य सिद्धावपि परमाणौ नानित्यत्वङ्घटादौ च न नित्यत्वम्। यतः एकत्रोभयोः परस्परं विरोधसम्भवात्।

यदि च पदार्थमात्र उक्तोभयत्वमापाद्यते, तदाऽनित्यपदार्थारम्भके परमाणौ नित्ये सच्चित्स्वरूपे ब्रह्मणि च तादृशोभयत्वस्य सत्वेनानित्यत्वापत्तिर्दुर्वारा स्यात्। एवमनित्ये घटादावुभयस्य सत्वेनांशिकनित्यत्वञ्च दुर्वारम्। तथा च तव ब्रह्मानित्यं सन्नित्यम्, घटादयश्चानित्या सन्तोऽपि नित्या इत्यादिबुद्धीनाम्प्रामाण्यमापतेत्। पार्थिवादेः पदार्थस्यावान्तरपरिवर्तनीयधर्मविशेषस्यावस्थाविशेषस्य च यथाऽनित्यत्वम्, तथा स्थिरीभूतस्य पार्थिवद्रव्यस्याप्यनित्यत्वमेव। एवम्परमाण्वादेः परिवर्तनीयावस्थाविशेषादिधर्मविशिष्टत्वेऽपि सर्वथैकान्तिकन्नित्यत्वमेव सङ्गच्छते, पदार्थस्वभावात्। अतो न पदार्थमात्रन्नित्यानित्योभयात्मकङ्कथमपि भवितुमर्हति।

अथार्हताः व्योम्नोऽपि नित्यानित्योभयात्मकत्वमङ्गीकुर्वन्ति। तथा हि—"अवकाशदमाकाशमिति" वचनादवगाहकानाञ्जीवपुद्गलानामवगाहदानोपग्रह एव तल्लक्षणम्। यदा चावगाहका जीवपुद्गलाः प्रयोगतो विस्रसातो वैकस्मान्नभः प्रदेशात्प्रदेशान्तरमुपसर्पन्ति, तदा तस्य व्योम्नस्तैरवगाहकैस्समर्मेकस्मिन्प्रदेशे विभाग उत्तरस्मिंश्च प्रदेशे संयोगः। विरुद्धयोस्तयोस्संयोगविभागयोर्भेदे चावश्यन्धर्मिणो भेदः। तथाचोत्पादव्ययोरैकाधिकरण्यसम्भवे—"अप्रच्युतानुत्पन्नस्थिरैकरूपस्य नित्यलक्षणस्य" तत्राभावादिदन्नित्यलक्षणन्न सम्यगित्युक्तिः न समीचीना, यतः—अवकाशदमाकाशमित्यत्र प्रमाणाभावादाकाशस्येदं स्वरूपन्नैवनिर्वक्तुं शक्यम्। नाप्यवकाशस्वरूप एवाकाशः, कुतः? अवकाशस्य शून्यत्वेनाभावरूपत्वादाकाशस्य च द्रव्यात्मकत्वेन भावत्वात्। तथा च सिद्धयोरनयोर्भावाभावयोः परस्परं विरोधादाकाशो नैवावकाशस्वरूपः। यदावकाशस्वरूप एव नाकाशस्तदावकाशदमाकाशमिति कथङ्कारं स्यात्।

अपि चाकाशस्य संयोगविभागावपि न भवितुमर्हतस्तयोरव्याप्यवृत्तित्वात्। आकाशसंयोगस्य च नित्यत्वेन तस्य विभागो नैव भवितुमर्हति। एवन्तस्य नैवोत्पत्तिर्नचापि तस्य प्रच्युतिरेवातोऽप्रच्युतानुत्पन्नस्थिरैकरूपस्य नित्यलक्षणस्य तत्र सत्वे बाधकाभावात्।

यच्चोक्तम्—"उत्पादव्यययोर्योगेऽपि तस्य न नित्यत्वहानिः" तथाहि—"द्रव्यं पर्यायवियुतं, पर्याया द्रव्यवर्जिताः। क्व कदा केन किं रूपा दृष्टा मानेन केन वा" इत्यादि।

तदपि न विचारसहम्, तथाहि—यद्युत्पादव्यययोस्सत्वे पि न नित्यत्वहानिस्तदा नित्यत्वहानिः कुत्र कदा स्यादिति सर्वथा विचारार्हः।

अपि च पर्यायवियुतस्य परमाणुरूपस्य कारणात्मकस्य द्रव्यस्य कार्याद्भिन्नत्वेनावस्थान्तरपरिणतस्य कार्यात्मकस्य द्रव्यस्य कारणाद्भिन्नत्वेन, पर्यायस्य च द्रव्यात्पृथक्सत्वेन "द्रव्यं पर्यायवियुतं पर्याया द्रव्यवर्जिताः। सर्वदा सर्वत्र विज्ञैः दृष्टा मानेन योगिभिः" इति पथा सर्वत्रैव द्रव्यपर्याययोः भेदो वरीवर्ति। यतोऽवस्थावस्थावतोः महान् भेदस्सर्वजनसिद्धः। अवस्था च द्रव्यवर्तिनी, द्रव्यञ्चविभिन्नावस्थयावस्थितमिति कथन्न तयोर्भेदोऽतो व्योम्नोऽवस्थारहितत्वान्नित्यत्वनित्यत्वोभयन्न कथमपि सङ्घटत इति बोध्यम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नच लोकप्रसिद्धघटाकाशादिव्यवहारबलादाकाशस्याप्यपेक्षिकन्नित्यत्वानित्यत्वोभय कथन्नेति वाच्यम्, तत्र घटाद्युपाधेरनित्यत्वेन तदवच्छिन्नाकाशस्याप्यनित्यत्वकल्पनयाऽदोषात्। (स्या. म. पृ. १६ प. ७) यदपि स्वायम्भुवानाम्मते धर्मिणस्त्रिविधपरिणामानुसारेण वस्तुमात्रन्नित्यानित्योभयात्मकम्प्रतीयते, तदपि न सह्यम्। पूर्वप्रदत्तदूषणानान्दुर्वारत्वात्। यद्यप्येकत्र वस्तुनित्यत्वानिनित्यत्वयोस्सत्वेन पदार्थमात्रन्नित्यानित्योभयस्वरूपम्भवितुमर्हति, तथापि प्रत्येकस्मिन् पृथिव्यादावपि कार्यारम्भकस्य परमाणोरेव नित्यत्वन्नान्यस्य कस्यचित्कार्यादेर्नित्यत्वं स्थापयितुं शक्यन्तस्य सर्वथैवानित्यत्वात्। एवम्परमाण्वादयो नानित्यास्तेषां सर्वदैव नित्यवात्। तथाचोभयात्मकत्वम्पदार्थस्येत्याक्षेपो निरस्तो बोध्यः। (स्या. म. पृ. १९) यश्च क्रमाक्रमाभ्यामेकान्तानित्यपक्षो दूषितः प्रदर्शितस्सोऽपि न समीचीनः—पक्षयोरुभयोः दोषानर्हत्वात्। अत्र सर्वथैकान्तिकानित्यत्वपक्षेऽपि "यो यत्रैव स तत्रैव यो यदैव तदैव सः। न देशकालयोर्व्याप्तिर्भावानामिह विद्यते"। इत्यादि दर्शिताक्षेपस्याकिञ्चित्करत्वमभ्युपगन्तव्यम्। तथा हि अनित्यत्वभावमापन्ना अपि समे पदार्थाः यत्र यदोत्पद्यन्ते यदा च यत्र विनश्यन्ति तत्र सर्वत्रैव सर्वदैव खलु देशकालाभ्यामविनाभावभावितास्सन्त उपलभ्यन्ते, न देशकालैर्विना कुत्रापि कदापि कस्यचिदुत्पत्तिः केनापि स्वीक्रियते जैनाचार्यैरप्यन्यथा न दृष्टा उत्पद्यमानाः भावपदार्थास्तत्कथमयमाक्षेपो विज्ञजनविचारार्हो भवेत्। अपि चैकान्तिकानित्यत्वाभावे घटादीनामनित्यानाम्पदार्थानामपि नित्यत्वेऽङ्गीकृत उत्पादव्ययशीलत्वाभावात्कार्यत्वन्न स्यात्। यदि च तद्दोषशान्त्यर्थमनित्यत्वमेव पदार्थमात्रस्याङ्गीक्रियते तदा कार्यारम्भकाः परमाणवोऽप्यनित्याः स्युरिति भवन्मते तेषाम्प्रलये नाशसम्भवात् तदनन्तरङ्कारणीभूतस्य परमाणोरभावाद्घटादिकार्यं कथं स्यादितिकार्यकारणभावस्यैव विलोपः स्यात्।

अतोऽयमप्याक्षेपः प्रलयङ्गत एव।

यच्च स्याद्वादे तु पूर्वोत्तराकारपरिहारस्वीकारस्थितिलक्षणपरिणामेन भावानामर्थक्रियोपपत्तिरविरुद्धेत्युक्तन्तदपि न सम्यक्, एकत्र धर्मिणि परस्परं विरुद्ध धर्माभावात्। पश्यन्तु पदार्थान्तर्गतस्याकाशादेः परमाणोश्चैकान्तिकन्नित्यत्वङ्घटादीनामवयविनाम्पदार्थानाञ्चैकान्तिकमनित्यत्वमिति तेभ्योऽन्यो न कश्चिदप्येतादृशः पदार्थो यश्च नित्यः सन्ननित्योऽपि भवितुमर्हतीति कथन्नित्यानित्योभयात्मकः पदार्थः कल्पयितुं शक्यः कैरपि। किञ्च

"भागे सिंहो नरो भागे योऽर्थो भागद्वयात्मकः
तमभागं विभागेन नरसिंहम्प्रचक्षते"॥

इत्यत्रापि–कस्मिंश्चिदेकस्मिञ्छरीरे नरसिंहयोरेकैकदेशस्य सत्त्वेऽपि यत्र भागे नरैकदेशो न तत्र सिंहैकदेशः, यत्र च सिंहैकदेशो न तत्र नरैकदेशः, तथाचोक्तोभयोरेकदेशावच्छिन्नत्वाभावादेवेष्टसिद्धिसम्भवे व्यर्थमेव युक्तपदार्थापलापकल्पनमिति नित्यानित्योभयपक्षम्प्रतिपादयञ्जैनाचार्यो विज्ञजनोपहास्यपात्रताम्प्राप्तः।

अथ न्यायाभिमतमीशस्य जगत्कर्तृत्वं व्यवस्थाप्य तत्खण्डनञ्च प्रदर्श्य परिह्रियते—

जगतीतलेऽस्मिन् कार्यमात्रङ्कारणाधीनम्। न हि कारणमन्तरा किमपि कार्यम्भवितुमर्हति। नच तुरीवेमादिस्वरूपकारणेन विना पटाख्यकार्योत्पत्तिर्भवति। एवं कार्योत्पत्तौ तदुत्पादकत्वेन कर्तुरपि कारणत्वमनिवार्यम्। दृश्यते हि लोके यथा कुलालं विना न कथमपि कस्यचिदपि घटस्योत्पत्तिर्नच काष्ठविच्छेदयितारं विना काष्ठस्य विच्छित्तिर्नवा तान्निर्मितं किञ्चिदपि वस्तूत्पद्यते, तथैव प्रतिपलमभिनवमनुपमन्दरीदृश्यमानमिदञ्जगदपि केनाप्यवश्यं निर्मितम्। तस्य चराचरस्थूलजङ्गमात्मकस्य जगतो निर्माता कश्चिदप्यवश्यम्भाव्यो यतस्तेन विना तदनुपपत्तेः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नच तत्कर्तृत्वमस्मदादीनामेव कथन्न भवतीति वाच्यम्, अस्मदादीनामल्पज्ञत्वेन तत्कर्तृत्वानुपपत्तेः। "यः सर्वज्ञः स सर्वविदिति" श्रुत्या सार्वकालिकसार्वत्रिकसर्वविषयकज्ञानवतस्सर्वज्ञपुरुषस्यैव तत्कर्तृत्वं सर्वथा संगच्छते नान्यस्य कस्यापि तत्कर्तृत्वसम्भवः। अतो जगन्निर्मातृत्वेन सर्वशक्तिसंपन्नः सर्वज्ञो जगदीश्वरस्तत्कर्तेति सिद्धः।

यद्यपीशस्योद्भूतरूपाद्यभावाच्चाक्षुषादिग्राह्यप्रत्यक्षन्नैव भवितुमर्हति, नवा मानसप्रत्यक्षमेव, परात्मनः परेण मनसा प्रत्यक्षवारणाय परात्मविजातीयात्ममनः संयोगस्य कारणत्वाङ्गीकारात्। तथाचाप्रत्यक्षत्वे कथमीशस्य जगत्कर्तृत्वमिति न शङ्क्यम्, प्रत्यक्षातिरिक्तानुमानप्रमाणेनैवेशस्य जगत्कर्तृत्वसिद्धेः। अत एव न्यायसिद्धान्तमुक्तावल्यां श्रीविश्वनाथपञ्चाननभट्टाचार्येण सयुक्तिकेन "क्षित्यङ्कुरादिकार्यं कृतिजन्यं कार्यत्वात् घटवदिति" दृष्टान्तमुखेनेशस्य जगन्निर्मातृत्वं व्यवस्थापितम्। नच क्षित्यङ्कुरादिकार्यमकर्तृकं शरीराजन्यत्वादाकाशवदिति विरुद्धानुमानेन सत्प्रतिपक्ष इति वाच्यम्, अप्रयोजकत्वात्। अत्र प्रयोजकत्वञ्च-व्यभिचारशङ्कानिवर्तकानुकूलतर्कवत्वमेव ग्राह्यम्। तद्रहितत्वमप्रयोजकत्वम्बोध्यम्। स्वपक्षे च कार्यत्वकृतिजन्यत्वयोः कार्यकारणभावमूलकानुकूलतर्कस्य सत्वेनैवेष्टसिद्धेः व्यभिचारसन्देहाभावो बोध्यः। तथाहि-कार्यत्वं यदि कृतिजन्यत्वव्यभिचारि स्यात्तदा कृतिजन्यत्वमेव न स्यादित्यनुकूलतर्कस्य सत्वान्न व्यभिचार इति। अत एव बौद्धदर्शनोत्पाटनपाटवप्रवीणाग्रगण्यैस्सर्वतन्त्रस्वतन्त्रै दार्शनिकप्रवरैः श्रीउदयनाचार्यमहोदयैः कुसुमाञ्जल्याङ्कार्यादिनवविधप्रदर्शितहेतुभिस्सर्वज्ञस्य जगदीश्वरस्य सृष्टिकर्तृत्वं व्यवस्थापितम्। तथाहि—

"कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः।
वाक्यात्संख्याविशेषाच्च साध्यो विश्वविदव्ययः"।

न च प्रकृत्यैव कथन्न जगदुत्पत्तिरिति वाच्यम्, प्रकृत्या सर्वदैव जगदुत्पत्तेस्तद्विनाशापतेश्च सम्भवात्। अथ परमेश्वरस्य जगन्निर्माणे प्रवृत्तिः किमर्था? स्वार्था परार्था वा? नाद्यःसम्प्राप्तसमस्तकामस्य तस्य तदनुपपत्तेः। अत एवापरोऽपि पक्षो न प्रवृत्त्यनुपपत्तेः। यदि च करुणयैव प्रवृत्त्युपपत्तिरङ्गीक्रियेत चेत्, तर्हि कथन्न सर्वान्प्राणिनः सुखिनः सृजेदीश्वरो न दुःखशबलान्, करुणाविरोधात्। तस्मादीशस्य जगत्सर्जनन्न युज्यते। यतः—प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते। जगन्च सृजतस्तस्य किन्नाम न कृतम्भवेदिति चेन्न, कारुण्यमवलम्ब्यैवेशस्य जगत्कर्तृत्वोपपत्तेः। अत्र निसर्गतस्सुखमयसर्गस्य प्रसङ्गः कुतो नेति न शङ्क्यम्, सृज्यमानप्राणिकृतसुकृतदुष्कृतकर्मपरिपाकविशेषाद्वैषम्योपपत्तेः।

अथात्रेशस्य जगत्कर्तृत्वमसहमानः परस्तं खण्डयति—(स्या. म. पृ. २१, पं. ३) तथाहि—

"कर्तास्ति कश्चिज्जगतः स चैकः
स सर्वगः स स्ववशः स नित्यः।
इमाः कुहेवाकविडम्बनाः स्यु-
स्तेषान्न येषामनुशासकस्त्वम्॥" इति।

कश्चिदीश्वरः जगतः कर्ता, स्ववशः, नित्यः, सर्वगस्चैकः, अस्ति, इति स्पष्टार्थः। परञ्चेमाः कुहेवाक (कदाग्रह) विडम्बना इत्यादि बहूक्तन्तथाहि—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यत्तावदुक्तम्परैः क्षित्यादयो बुद्धिमत्कर्तृकाः कार्यत्वाद्घटवदित्युक्तन्तदयुक्तम्, व्याप्तेरग्रहणादित्याद्युक्तम्। तदुपरि विचार्यते सर्वज्ञाल्पज्ञयोः कार्यकारणभावविचारप्रसङ्गे किञ्चिदवश्यं वैलक्षण्यम्प्रतीयते, तथाहि—कुलालादयोऽल्पज्ञाः जीवाः शरीरिणस्सन्तः कार्यमारभन्ते, किन्तु सर्वज्ञादर्शमहापुरुषाणाङ्कृते नायन्नियमः, यतस्स्वतन्त्रेच्छस्य ऋषेः नियोगपर्यनुयोगानर्हत्वात्। ये च कर्तुमकर्तुमन्यथा वा कर्तुं सर्वदानुपलममभिनवान्विलक्षणीभूतान्पदार्थाञ्जगत्कायार्नुरूपान् स्रष्टुं सर्वथा समर्थास्तेषाङ्कृतेऽपि यदि कार्यार्थे शरीरधारणस्यावश्यकत्वम्मन्यते, तदा विचार्यतामल्पज्ञत्वसर्वज्ञत्वयोः को भेदः। पश्यन्तु-"तदैक्षत एकोऽहं बहुस्यां प्रजायेय" इति श्रुत्यनुसारेणेश्वराः स्वीयेक्षणमात्रेणैव जगत्कार्याणि कुर्वन्ति। न तत्र शरीरधारणमावश्यकम्। यत्र यदीयशरीरधारणमन्तरा यदीयसङ्कल्पवशान्न सृष्टिरुत्पद्यते तत्र तदीयशरीरधारणमावश्यकम्। यत्र च यदीयसंकल्पेनैव सर्वाणि कार्याणि युगपदेव समुत्पद्यन्ते तत्राप्यस्मदादिवदेव सशरीरिणः कारणत्वमङ्गीक्रियत अहो! महदाश्चर्यम्। दृश्यते हि लोकेऽपि स्वीयं राज्यभारं कस्मैचित्पुरुषाय दत्वापि राजा समुचितं राज्यकार्यन्न चलतीति श्रुत्वा ज्ञात्वा च पुनस्तम्भारं स्वस्योपरि नीत्वा स्वेच्छया तमन्यथैव सम्पादयति। साम्प्रतिके प्रचलिते जनतन्त्रयुगेऽस्मिन् प्रान्तीयराज्यकार्येऽपि प्रायस्तथैव श्रूयते दृश्यते च। यथा प्रान्तीयस्सर्वकारो यत्र स्वशासने वैफल्यमनुभवति, तत्र तत्रत्यान्तदीयविफलतामवलोक्य केन्द्रीयशासनसिंहासनाधिरूढाः राष्ट्रपतिमहोदयास्तत्र स्वशासनेन कार्याणि सर्वाणि सम्पादयन्ति। तानि चान्यथारूपेणापि भवितुमर्हन्ति भवन्ति च, सम्पूर्णाधिकारात्। विचार्यताम्—यद्यल्पज्ञजीवानामीदृशी व्यवस्था सञ्चलति तदा सर्वज्ञानां कृते तु कथैव का। यतस्तेषान्निमेषमात्रेणैव सृष्ट्युत्पत्तिस्थितिनाशसम्भवात्। तथाच सिद्धमीशस्य शरीरधारणमन्तरापि जगत्कर्तृत्वम्। अतस्सृजञ्जगदीश्वरः सशरीरोऽशरीरो वेत्यादयः समस्ताः पूर्वपक्षाः प्रत्यङ्गताः विज्ञजनविचारानर्हत्वात्।

अपि च यच्चोक्तम्—"ईश्वरे-एकत्वन्न घटते, बहूनामेककार्यकरणे वैमत्यसम्भावनेति नायमेकान्तः। (स्या. म. पृ. २५, पं ३) विचारोऽयन्न साधुः। यतोऽनेकत्वे सतीश्वरस्य सर्वेषु कार्येषु वैमत्येनासामञ्जस्यमापतेत्। एकत्वे च स्वेच्छया मनोऽनुकूलं सर्वं कार्यं सिद्ध्यति। कथमेकत्वमीशस्येति न शङ्क्यम्, "द्यावाभूमी जनयन्देव एको विश्वस्य कर्ता भुवनस्य गोप्ता" "यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति", इयादि बहुविधप्रदर्शितासु श्रुतिषु सर्वत्रैवैकवचननिर्देशाच्चैकत्वं सृष्टिकर्तृत्वञ्च समुपपद्यते।

वस्तुतः कस्यचिदेकस्य कार्यस्य बहुविधानां वा कार्याणामनेके कर्तारोऽल्पज्ञा जीवा एव भवन्ति न खल्वनेके सर्वज्ञाः। यदि सर्वशक्तिसम्पन्नास्सर्वज्ञास्सर्वेश्वरा अपि कर्तारो नेके स्युस्तदाल्पज्ञसर्वज्ञयोः को भेदः। अतोऽत्रैतद्विषयकः प्रदत्त आक्षेपो बालभाषित एव प्रतिभाति न विज्ञभाषित इवेति।

किञ्च-यदुक्तम्—"सर्वगतत्वमपि तस्य नोपपन्नम्" तथाहि—तद्धि शरीरात्मना ज्ञानात्मना वा स्यात्। प्रथमपक्षे तदीयेनैव देहेन जगत्त्रयस्य व्याप्तत्वादितरनिर्मेयपदार्थानामाश्रयानवकाशः। द्वितीयपक्षे तु सिद्धसाधनता, अस्माभिरपि निरतिशयज्ञानात्मना परमपुरुषस्य जगत्त्रयक्रोडीकरणाभ्युपगमात्। इत्यादयः प्रदर्शिताः समस्ताः पूर्वपक्षाः विचारानर्हाः, यतो भगवतः परमेश्वरस्य स्वीकृतैर्विराड्रूपशरीरैः जगत्त्रयस्य व्याप्तत्वेऽपीतरपदार्थानामपि त एवाश्रयीभूताः, तथाहि—"विश्वतश्चक्षुरुतविश्वतोमुखो विश्वतः पाणिरुत विश्वतः पात्" इत्यादिबहुविधाभि श्रुतिभिस्तथैव प्रतिपादनात्। अतश्शरीरात्मनापि भगवतस्सर्वगतत्वमुपपद्यत एव। ज्ञानात्मना च सर्वगतत्वं (सर्वज्ञानवत्त्वम्) सर्वथास्त्येवेति तत्र विचारस्या-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वश्यकतैव का। यतो हि यदि ज्ञानात्मनेश्वरस्यापि सर्वगतत्वन्न स्यात् तदा कस्य सर्वगतत्वमुपपादयितुं शक्यम्। भगवतः स्वरूपञ्च—" अणोरणीयान् महतो महीयानेव। तत्र महतामपि महत्, अणोरप्यणुरिति स्पष्टमेव सर्वगतत्वन्तस्येति न कश्चिद्विवादः

अथापि यदि सर्वगतत्वमीशस्य नाङ्गीक्रियेत तदाल्पज्ञसर्वज्ञयोस्समत्वमेव स्यादिति पूर्ववदेव समो दोषः। नच सर्वगतत्वेनेशस्य नरकादिस्थलेऽपि वृत्तौ कथन्नानिष्टमिति वाच्यम्, ईशस्येष्टानिष्टफलाभावात्। अयमिष्टानिष्टफलविचारोऽल्पज्ञानाङ्कृत एव सङ्गच्छते न सर्वज्ञानाङ्कृते। यतस्तेषान्न किमपीष्टमनिष्टं वा। अन्यथाल्पज्ञानवतामिव तेषामपि सदोषत्वं स्यात्। वस्तुतोऽयन्दोषादोषविवेको जीवेभ्य एव, नेश्वराय प्रकल्पते, सर्वविधसामर्थ्यवतान्दोषाभावात्। सत्यपि कथञ्चिदपि दोषे तन्निवारयितुमीश्वरा एव क्षमा प्रभवन्ति, स्वतन्त्रत्वात्। अतस्तेषाङ्कृते नायन्दोषः समवतरति।

अपि च भवन्मतेऽपि यदा ज्ञानात्मनेश्वरो जगत्त्रयं व्याप्नोति तदा शुचिरसस्वादादीनामप्युपलम्भसम्भवान्नरकादिदुःखानुभवप्रसङ्गाच्चानिष्टापत्तिस्तुल्यैवेति प्रश्नस्य यदुत्तरन्तदेवास्मत्पक्षेऽपीति सममेवोत्तरम्, " ययोरेव समो दोषः परिहारस्तयोः समः " इति न्यायात्।

यदुक्तं ज्ञानमप्राप्यकारीति स्वस्थलस्थमेव विषयम्परिच्छिनत्ति न पुनस्तत्र गत्वेतिसर्वथोचितविरुद्धम्। यतः—सविषयकमेव ज्ञानमुत्पद्यते निर्विषयकस्य ज्ञानस्याभावात्। सविषयकत्वे च विषयदेशमनुप्राप्यैव ज्ञानम्भवितुमर्हति नान्यथा। यद्यपि पूर्वञ्चक्षुषादीन्द्रियाणि विषयैस्सह संयुज्यन्ते, पश्चात् विषयसंयुक्तानीन्द्रियाणि मनसा संयुज्यन्ते, इन्द्रियसंयुक्तम्मनः आत्मना संयुज्यते, तदैव तत्तद्विभिन्नविषयकाणि ज्ञानानि समुत्पद्यन्ते, इतीन्द्रियप्रणालिकयैव ज्ञानानि स्वस्थले प्रभवन्ति। तथापि सविषयकत्वेन स्वस्थलस्थत्वेऽपि ज्ञानानां विषयदेशसम्बद्धत्वाङ्गीकारात्। यतस्तेजस्त्वेन ज्ञानस्यात्मनिष्ठत्वात् बहिर्निर्गमनाभावेऽपि सर्वविषयकत्वोपपत्तौ न कश्चिद्विरोधः। तत्र ज्ञानस्य बहिर्निर्गमनन्नावश्यकमपित्वात्मनि संस्तिष्ठन्सर्वान्बाह्यानर्थान् प्रकाशयति ज्ञानमतो नाचैतन्यापत्त्यात्मनोऽजीवत्वप्रसङ्गो दोषः कथमप्युद्भावनीयः। तथाच ज्ञानस्य प्राप्यकारित्वे न किमपि बाधकन्तार्किकदृष्टिपथे समागच्छति—इति प्राज्ञैर्विभावनीयोऽयं विषयः।

यच्चोक्तं—सूर्यस्य किरणाः न गुणस्वरूपाः अपि तु तैजसपुद्गलमयत्वेन द्रव्यत्वविशिष्टाः। यश्च तेषाम्प्रकाशात्मा गुणः स तेभ्यो न जातु पृथग्भवतीति सर्वथा तर्कविचाररहिता स्वकपोलकल्पिता कल्पनैव प्रकटिता। यतो किरणा न द्रव्यत्वावच्छिन्ना अपि तु प्रकाशात्मकगुणत्वावच्छिन्ना एव। तथाच गुणेभ्यो गुणिनस्सर्वथा पृथगेव मन्यन्ते कर्कशतर्करससाररसिकैस्तार्किकप्रवरैः।

अत्रायं विचारो जागर्ति—किं गुणेभ्यो गुणिनः पृथगपृथग्वा? आद्ये स्वीकृतम्भवता मम मतम्। अन्त्ये यदि गुणगुणिनोरैक्यमङ्गीक्रियते तदा रूपरूपिणोरप्येकत्वेन यथा रूपिणि द्रव्ये रूपात्मको गुणस्तिष्ठति तथैव रूपात्मके गुणेऽपि रूपीद्रव्यं कथन्न तिष्ठेत्। नच कैरपि तान्त्रिकैः गुणे द्रव्यस्यास्तित्वं स्वीक्रियते इति भवतापि कथमङ्गीकर्तव्यम्।

अपि चैक्यं तयोराधाराधेयभावोऽपि न कथमपि भवितुमर्हति। यतः कः कस्याधारः कः कस्याधेयश्चेत्यस्य निर्वक्तुमशक्यत्वात्। अतो यथा सूर्यस्य किरणा गुणस्वरूपा अपि सूर्यान्निष्क्रम्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भुवनम्भासयन्त्येवं ज्ञानमप्यात्मनः सकाशाद्बहिर्निर्गत्य प्रमेयम्परिच्छिनत्तीति निर्विवादो मार्गः। तथाच सिद्धं ज्ञानस्य बहिर्निगमनपक्षेऽपि न कश्चिद्दोषः समापततीति।

अपि च सर्वज्ञत्वे तस्य किम्प्रमाणमिति न शङ्क्यम्, सर्वज्ञत्वबोधकप्रमाणस्य सत्वात्। तथाहि—"यः सर्वज्ञः स सर्ववित्" इति श्रुत्यैव तस्य सर्वज्ञत्वबोधे बाधकाभावात्। यतो हि सर्वज्ञत्वमन्तरा तस्य सार्वदिकं सार्वकालिकं सार्वत्रिकञ्च सर्वविषयकज्ञानवत्वं कथं सिद्ध्येत्। अल्पज्ञत्वे च जागतिककार्ये वैलक्षण्यं वैचित्र्यञ्च कथं स्यादित्यपि विचारणीयम्। यदा वयमल्पज्ञा जीवा कदा कुत्र किमस्तीदमपि न जानीमस्तदा सार्वत्रिकपदार्थज्ञानाभावे कथं जगद्रचयितुं समर्था भवेम। अतो जगद्रचनाकार्यमस्मदादिभिरशक्यमिति सर्वज्ञस्य सर्वशक्तिमत ईश्वरस्यैव तत्कर्तृत्वं सूपपन्नमतस्सर्वज्ञत्वसिद्धौ तस्याविवाद एव बोध्यः।

अत्र सर्वज्ञत्वविषये यदाक्षिप्तम्परैः यत् केन प्रमाणेन सार्वज्ञ्यं गृहीतम्, प्रत्यक्षेण परोक्षेण वा? न तावत्प्रत्यक्षेण तस्येन्द्रियार्थसन्निकर्षोत्पन्नतयातीन्द्रियग्रहणासामर्थ्यात्। नापि परोक्षेणेत्यादयः समस्ताः समुदिताः पूर्वपक्षाः स्ते सर्वे तर्कविहीनाः वागाडम्बराक्रान्ता एव। यतो यथेश्वरप्रत्यक्षे इन्द्रियार्थसन्निकर्षस्यापेक्षा न भवति, अपि तु तत्सन्निकर्षं विनैव तस्य प्रत्यक्षं सञ्जायते तथैवात्रेन्द्रियार्थसन्निकर्षं विनैव कार्यकारणभावमुखेनैवेशस्य सार्वज्ञ्यं सिद्ध्यति। तथाहि—चराचरात्मकानि सर्वाणि कार्याणि सर्वज्ञकृतिसाध्यानि अस्मदादिजीवभिन्नसर्वज्ञपुरुषरचितकार्यत्वात्। इयञ्जगद्विचित्रता तत्सार्वज्ञ्यं विना नोपपन्नातो जगद्वैचित्र्यान्यथानुपपत्त्या तस्य सर्वज्ञत्वं सिद्ध्यति।

नच स्थावरजङ्गमात्मभेदाज्जगतो द्वैविध्ये प्राणिकृतस्वोपात्तशुभाशुभकर्मपरिपाकवशेनैव जङ्गमानां वैचित्र्ये सिद्धेऽचेतनानां स्थावराणान्तु तदुपभोगयोग्यतासाधनत्वेनानादिकालादेव तद्वैचित्र्ये सिद्धे सर्वज्ञत्वमीशस्य कथन्नानुपपन्नमिति वाच्यम्, जङ्गमानां स्वोपात्तशुभाशुभकर्मानुसाराद्विचित्रफलप्रदातृत्वेन, स्थावराणाञ्चाचेतनानान्तदुपभोगयोग्यतासाधननिर्माणेऽनादिकालादेव तद्वैचित्र्यसम्पादनकर्तृत्वेन चेशस्य सर्वज्ञत्वाङ्गीकारात्।

अथागमप्रमाणेन कथमीशस्य सर्वज्ञत्वसिद्धिः पूर्वापरविरुद्धवचनोपेतत्वात् तथाहि—"मा हिंस्यात् सर्वभूतानी"त्युक्त्वा—

"षट्शतानि नियुज्यन्ते, पशूनां मध्यमेऽहनि।
अश्वमेधस्य वचनान्न्यूनानि पशुभिस्त्रिभिः।
एवमग्नीषोमीयम्पशुमालभेत" इत्यादि।

एवमनृतन्न ब्रूयादित्यादिवाक्येन प्रथममनृतन्निषिध्यानन्तरन्तत्रैव "न कर्मयुक्तं वचनं हिनस्ति न स्त्रीषु राजन्न विवाहकाले। प्राणात्यये सर्वधनापहारे पञ्चानृतान्याहुरपातकानि।" इत्यादिना परस्परं विरुद्धार्थावगतिः प्रतीयत इति चेन्न, उत्सर्गापवादन्यायेनाविरोधात्। अत्रायम्भावः—वाक्यन्द्विविधम्, उत्सर्गापवादाख्यम्। तत्रोत्सर्गवाक्यस्यापवादवाक्येन सह विरोधो भवति। यथात्रैव—न हिंस्यादिति सामान्यवाक्यपरमुत्सर्गाख्यम्, अग्नीषोमीयमित्यपवादवाक्यम्। अतः पूर्ववाक्येन सहैतस्य विरोधे वैदिकपद्धत्या विहितपशुहिंसातिरिक्तस्थले न हिंस्यादिति वाक्यस्य चारितार्थ्यङ्कल्प्यते "उत्सर्गापवादयोरपवादवाक्यस्य बलीयस्त्वमिति" वचनात्। तथा च वैदिकहिंसायाः सत्कर्मनिष्पादकतया" न दोषत्वम्, यतो यागीयपशोः सत्कर्मविमुक्तत्वेन स्वर्गप्रापणात्। एवमनृतभाषणेऽपि बोध्यम्। यद्यप्यनृतभाषणन्दोषावहम्, तथापि—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रदर्शितोक्तपञ्चानृतस्थलातिरिक्तस्थलेऽनृतभाषणे दोषस्य सत्त्वेनप्रकृतेऽदोषात्। इति सिद्धं सर्वज्ञत्वमीशस्यागमेनापीति परास्तः परः। यच्चोक्तम्—(स्या. म. पृ. २९, प. ८) स्ववशत्वं स्वातन्त्र्यम्, तदपि तस्य न क्षोदक्षमम्। स हि यदि स्वाधीनः सन् विश्वं विधत्ते, अथ परमकारुणिकश्च त्वया वर्ण्यते, तत्कथं सुखिताद्यवस्थाभेदद्वन्द्वस्थपुटितं घटयति भुवनमेकान्तशर्मसम्पत्कान्तमेव तु किन्न निर्मिमीते। इत्यादयः पूर्वपक्षाः विषयबहिर्भूतत्वादुपेक्ष्याः। यतः—स्वाधीनत्वेऽपीशस्य प्राणिकृतशुभाशुभकर्मानुसारेणैव विश्वनिर्मातृत्वसम्भवात्। न खलु प्राप्ते स्वातन्त्र्ये प्राणिकृतकर्मणो न किञ्चिन्महत्वम् नवा तत्रत्यं विधानमुपेक्ष्यैवेशाः यत्कर्तुमिच्छन्ति तदेव कुर्वन्ति। किन्तु स्वयं संविधातारोऽपि विभिन्नजीवीयकर्मानुसारेणैव सर्वाणि कार्याणि सम्पादयन्तीतिविशेषतेयन्तेषाम्।

एतदेव वैलक्षण्यञ्जीवेशयोः यज्जीवः पराधीनोऽप्यहम्भावमन्यः स्वाधीनमात्मानम्मनुते। ईशश्च स्ववशोऽपि जीवीयशुभाशुभकर्मानुसारेणैव जगन्निर्माणार्थं यततेऽतो न कश्चिद्दोषः स्वाधीनत्वपक्षेऽपीशस्य। यदीशस्य स्वाधीनत्वन्नाङ्गीक्रियेत तर्हि पराधीनत्वस्वीकारे कथं सृष्टिः कीदृशी वा सृष्टिरिति विचार्यम्। अपिच यदि सृष्ट्यर्थं जगदीशो नाङ्गीक्रियेत तदा किमर्थं कथं वेशस्य मान्यता। यदि चैतदर्थमीशो नाङ्गीकार्यश्चेत्तदाल्पज्ञेन जीवेन कथं सर्वविधमनुपमञ्जगत्कार्यमिति महदसमञ्जसं स्यादतस्तन्निराकरणायेशस्य स्वाधीनत्वं सर्वथाङ्गीकार्यमेवाकामेनापि भवता येन न किमप्यसामञ्जस्यं वैषम्यं वापतेत्। तथाचात्रापि प्रदर्शित आक्षेपो बालभाषित एव, विज्ञजनविचारानर्हत्वाद्बोध्यः।

अपि च नित्यत्वमपि तस्य स्वगृह एव प्रणिगद्यमानं हृद्यम्। स खलु नित्यत्वेनैकरूपः सन् त्रिभुवनसर्गस्वभावोऽतत्स्वभावो वा। प्रथमविवक्षायाञ्जगन्निर्माणात्कदाचिदपि नोपरमेत। तदुपरमे तत्स्वभावत्वहानिः। एवञ्च सर्गक्रियाया अपर्यवसानादेकस्यापि कार्यस्य न सृष्टिः। इत्यादिना (स्या. म. पृ. २९, प. २०) यदुक्तन्तन्न समीचीनम्, यतो नित्यत्वविशिष्टा अपीश्वराः स्वलीलयैव सर्वाणि जागतिकानि कार्याणि निर्मीय ततो विरमन्ति। कदा विरमन्ति कदा च प्रवर्तन्ते, इत्यत्र तदीयेच्छैव कारणन्नान्यत्किञ्चिदपीति न कश्चिद्दोषः। सर्वोऽयन्दोषादोषविचारोऽल्पज्ञानाङ्कृत एव, न सर्वज्ञानाङ्कृते, यतो हि ते कर्तुमकर्तुमन्यथा वा कर्तुं सर्वथा समर्थाः। यदि च तेषामुपर्यपि दोषविचार आवश्यकः स्यात्-अर्थात्—तेऽपि यदि सदोषास्तदा निर्दोषाः के स्युरिति विभावनीयम्।

अपि च तस्यैकान्तनित्यस्वरूपत्वे सृष्टिवत्संहारोऽपि न घटते। नानारूपकार्यकरणेऽनित्यत्वापत्तेरित्यादि यदुक्तन्तदपि तुच्छम्।

स्वतन्त्रतया कारुण्यवशादेवेशस्य जगत्कार्ये प्रवृत्तेः। नानारूपकार्यकरणेऽप्यनित्यत्वन्न तस्य घटते तर्कविचारशून्यत्वात्। ये च नाना कार्यकर्तारस्तेऽनित्या इत्यत्र प्रमाणाभावाद्विचारोऽयमनर्गलप्रलपित एव। यदा सर्वकार्ये सर्वदा समर्थास्ते तदा "सृष्टिवत्संहारो न घटते" इत्यस्य क्व स्थानम्? नच सन्नपि नित्यः सततमेव कथन्न चेष्टते सृष्ट्यर्थमीश इति वाच्यम्, स्वतन्त्रेच्छस्य सर्वशक्तिमतः परमात्मनो नियोगपर्यनुयोगानर्हत्वात्। स्ववशत्वेन तदीयेच्छायास्तदधीनत्वात्। कर्तुर्यदा चिकीर्षा भवति तदा कार्यार्थे यतते, यत्नस्येच्छाधीनत्वात्। इच्छा च कर्त्रधीनातः स्वीयेच्छया यदा यत्कार्यं चिकीर्षति तदा तत्कार्यं करोति, अतः न तत्र कोऽपि दोषसम्भवः। इति सर्वथा सिद्धमीशस्य जगत्कर्तृत्वमेकत्वादिचेति बोध्यम्। इति स्याद्वादमञ्जर्युक्तस्य षष्ठकारिकया प्रदर्शितस्याक्षेपस्य परिहारः समाप्तः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भुवनम्भासयन्त्येवं ज्ञानमप्यात्मनः सकाशाद्बहिर्निर्गत्य प्रमेयम्परिच्छिनत्तीति निर्विवादो मार्गः। तथाच सिद्धं ज्ञानस्य बहिर्निगमनपक्षेऽपि न कश्चिद्दोषः समापततीति।

अपि च सर्वज्ञत्वे तस्य किम्प्रमाणमिति न शङ्क्यम्, सर्वज्ञत्वबोधकप्रमाणस्य सत्वात्। तथाहि— "यः सर्वज्ञः स सर्ववित्" इति श्रुत्यैव तस्य सर्वज्ञत्वबोधे बाधकाभावात्। यतो हि सर्वज्ञत्वमन्तरा तस्य सार्वदिकं सार्वकालिकं सार्वत्रिकञ्च सर्वविषयकज्ञानवत्वं कथं सिद्धयेत्। अल्पज्ञत्वे च जागतिककार्ये वैलक्षण्यं वैचित्र्यञ्च कथं स्यादित्यपि विचारणीयम्। यदा वयमल्पज्ञा जीवा कदा कुत्र किमस्तीदमपि न जानीमस्तदा सार्वत्रिकपदार्थज्ञानाभावे कथं जगद्रचयितुं समर्था भवेम। अतो जगद्रचनाकार्यमस्मदादिभिरशक्यमिति सर्वज्ञस्य सर्वशक्तिमत ईश्वरस्यैव तत्कर्तृत्वं सूपपन्नमतस्सर्वज्ञत्वसिद्धौ तस्याविवाद एव बोध्यः।

अत्र सर्वज्ञत्वविषये यदाक्षिप्तम्परैः यत् केन प्रमाणेन सार्वज्ञ्यं गृहीतम्, प्रत्यक्षेण परोक्षेण वा? न तावत्प्रत्यक्षेण तस्येन्द्रियार्थसन्निकर्षोत्पन्नतयातीन्द्रियग्रहणासामर्थ्यात्। नापि परोक्षेणेत्यादयः समस्ताः समुदिताः पूर्वपक्षाः स्ते सर्वे तर्कविहीनाः वागाडम्बराक्रान्ता एव। यतो यथेश्वरप्रत्यक्षे इन्द्रियार्थसन्निकर्षस्यापेक्षा न भवति, अपि तु तत्सन्निकर्षं विनैव तस्य प्रत्यक्षं सञ्जायते तथैवात्रेन्द्रियार्थसन्निकर्षं विनैव कार्यकारणभावमुखेनैवेशस्य सार्वज्ञ्यं सिद्धयति। तथाहि—चराचरात्मकानि सर्वाणि कार्याणि सर्वज्ञकृतिसाध्यानि अस्मदादिजीवभिन्नसर्वज्ञपुरुषरचितकार्यत्वात्। इयञ्जगद्विचित्रता तत्सार्वज्ञ्यं विना नोपपन्नातो जगद्वैचित्र्यान्यथानुपपत्त्या तस्य सर्वज्ञत्वं सिद्धयति।

नच स्थावरजङ्गमात्मभेदाज्जगतो द्वैविध्ये प्राणिकृतस्वोपात्तशुभाशुभकर्मपरिपाकवशेनैव जङ्गमानां वैचित्र्ये सिद्धेऽचेतनानां स्थावराणान्तु तदुपभोगयोग्यतासाधनत्वेनानादिकालादेव तद्वैचित्र्ये सिद्धे सर्वज्ञत्वमीशस्य कथन्नानुपपन्नमिति वाच्यम्, जङ्गमानां स्वोपात्तशुभाशुभकर्मानुसाराद्विचित्रफलप्रदातृत्वेन, स्थावराणाञ्चाचेतनानान्तदुपभोगयोग्यतासाधननिर्माणेऽनादिकालादेव तद्वैचित्र्यसम्पादनकर्तृत्वेन चेशस्य सर्वज्ञत्वाङ्गीकारात्।

अथागमप्रमाणेन कथमीशस्य सर्वज्ञत्वसिद्धिः पूर्वापरविरुद्धवचनोपेतत्वात् तथाहि—"मा हिंस्यात् सर्वभूतानी"त्युक्त्वा—

"षट्शतानि नियुज्यन्ते, पशूनां मध्यमेऽहनि।
अश्वमेधस्य वचनान्न्यूनानि पशुभिस्त्रिभिः।
एवमग्नीषोमीयम्पशुमालभेत" इत्यादि।

एवमनृतन्न ब्रूयादित्यादिवाक्येन प्रथममनृतन्निषिध्यानन्तरन्तत्रैव "न कर्मयुक्तं वचनं हिनस्ति न स्त्रीषु राजन्न विवाहकाले। प्राणात्यये सर्वधनापहारे पञ्चानृतान्याहुरपातकानि।" इत्यादिना परस्परं विरुद्धार्थावगतिः प्रतीयत इति चेन्न, उत्सर्गापवादन्यायेनाविरोधात्। अत्रायम्भावः—वाक्यन्द्विविधम्, उत्सर्गापवादाख्यम्। तत्रोत्सर्गवाक्यस्यापवादवाक्येन सह विरोधो भवति। यथात्रैव-न हिंस्यादिति सामान्यवाक्यपरमुत्सर्गाख्यम्, अग्नीषोमीयमित्यपवादवाक्यम्। अतः पूर्ववाक्येन सहैतस्य विरोधे वैदिकपद्धत्या विहितपशुहिंसातिरिक्तस्थले न हिंस्यादिति वाक्यस्य चारितार्थ्यङ्कल्प्यते "उत्सर्गापवादयोरपवादवाक्यस्य बलीयस्त्वमिति" वचनात्। तथा च वैदिकहिंसायाः सत्कर्मनिष्पादकतया" न दोषत्वम्, यतो यागीयपशोः सत्कर्मविमुक्तत्वेन स्वर्गप्रापणात्। एवमनृतभाषणेऽपि बोध्यम्। यद्यप्यनृतभाषणन्दोषावहम्, तथापि—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रदर्शितोक्तपञ्चानृतस्थलातिरिक्तस्थलेऽनृतभाषणे दोषस्य सत्वेनप्रकृतेऽदोषात्। इति सिद्धं सर्वज्ञत्वमीशस्यागमेनापीति परास्तः परः। यच्चोक्तम्–(स्या. म. पृ. २९, प. ८) स्ववशत्वं स्वातन्त्र्यम्, तदपि तस्य न क्षोदक्षमम्। स हि यदि स्वाधीनः सन् विश्वं विधत्ते, अथ परमकारुणिकश्च त्वया वर्ण्यते, तत्कथं सुखिताद्यवस्थाभेदवृन्दस्थपुटितं घटयति भुवनमेकान्तशर्मसम्पत्कान्तमेव तु किन्न निर्मिमीते। इत्यादयः पूर्वपक्षाः विषयबहिर्भूतत्वादुपेक्ष्याः। यतः–स्वाधीनत्वेऽपीशस्य प्राणिकृतशुभाशुभकर्मानुसारेणैव विश्वनिर्मातृत्वसम्भवात्। न खलु प्राप्ते स्वातन्त्र्ये प्राणिकृतकर्मणो न किञ्चिन्महत्वम् नवा तत्रत्यं विधानमुपेक्ष्यैवेशाः यत्कर्तुमिच्छन्ति तदेव कुर्वन्ति। किन्तु स्वयं संविधातारोऽपि विभिन्नजीवीयकर्मानुसारेणैव सर्वाणि कार्याणि सम्पादयन्तीतिविशेषतेयन्तेषाम्।

एतदेव वैलक्षण्यञ्जीवेशयोः यज्जीवः पराधीनोऽप्यहम्भावमन्यः स्वाधीनमात्मानम्मनुते। ईशश्च स्ववशोऽपि जीवीयशुभाशुभकर्मानुसारेणैव जगन्निर्माणार्थं यततेऽतो न कश्चिद्दोषः स्वाधीनत्वपक्षेऽपीशस्य। यदीशस्य स्वाधीनत्वन्नाङ्गीक्रियेत तर्हि पराधीनत्वस्वीकारे कथं सृष्टिः कीदृशी वा सृष्टिरिति विचार्यम्। अपिच यदि सृष्ट्यर्थं जगदीशो नाङ्गीक्रियेत तदा किमर्थं कथं वेशस्य मान्यता। यदि चैतदर्थमीशो नाङ्गीकार्यश्चेत्तदाल्पज्ञेन जीवेन कथं सर्वविधमनुपमञ्जगत्कार्यमिति महदसमञ्जसं स्यादतस्तन्निराकरणायेशस्य स्वाधीनत्वं सर्वथाङ्गीकार्यमेवाकामेनापि भवता येन न किमप्यसामञ्जस्यं वैषम्यं वापतेत्। तथाचात्रापि प्रदर्शित आक्षेपो बालभाषित एव, विज्ञजनविचारानर्हत्वाद्बोध्यः।

अपि च नित्यत्वमपि तस्य स्वगृह एव प्रणिगद्यमानं हृद्यम्। स खलु नित्यत्वेनैकरूपः सन् त्रिभुवनसर्गस्वभावोऽतत्स्वभावो वा। प्रथमविवक्षायाञ्जगन्निर्माणात्कदाचिदपि नोपरमेत। तदुपरमे तत्स्वभावत्वहानिः। एवञ्च सर्गक्रियाया अपर्यवसानादेकस्यापि कार्यस्य न सृष्टिः। इत्यादिना (स्या. म. पृ. २९, प. २०) यदुक्तन्तन्न समीचीनम्, यतो नित्यत्वविशिष्टा अपीश्वराः स्वलीलयैव सर्वाणि जागतिकानि कार्याणि निर्मीय ततो विरमन्ति। कदा विरमन्ति कदा च प्रवर्तन्ते, इत्यत्र तदीयेच्छैव कारणन्नान्यत्किञ्चिदपीति न कश्चिद्दोषः। सर्वोऽप्यन्दोषादोषविचारोऽल्पज्ञानाङ्कृतं एव, न सर्वज्ञानाङ्कृते, यतो हि ते कर्तुमकर्तुमन्यथा वा कर्तुं सर्वथा समर्थाः। यदि च तेषामुपर्यपि दोषविचार आवश्यकः स्यात्–अर्थात्–तेऽपि यदि सदोषास्तदा निर्दोषाः के स्युरिति विभावनीयम्।

अपि च तस्यैकान्तनित्यस्वरूपत्वे सृष्टिवत्संहारोऽपि न घटते। नानारूपकार्यकरणेऽनित्यत्वापत्तेरित्यादि यदुक्तन्तदपि तुच्छम्।

स्वतन्त्रतया कारुण्यवशादेवेशस्य जगत्कार्ये प्रवृत्तेः। नानारूपकार्यकरणेऽप्यनित्यत्वन्न तस्य घटते तर्कविचारशून्यत्वात्। ये च नाना कार्यकर्तारस्तेऽनित्या इत्यत्र प्रमाणाभावाद्विचारोऽयमनर्गलप्रलपित एव। यदा सर्वकार्ये सर्वदा समर्थास्ते तदा "सृष्टिवत्संहारो न घटते" इत्यस्य क्व स्थानम्? नच सन्नपि नित्यः सततमेव कथन्न चेष्टते सृष्ट्यर्थमीश इति वाच्यम्, स्वतन्त्रेच्छस्य सर्वशक्तिमतः परमात्मनो नियोगपर्यनुयोगानर्हत्वात्। स्ववशत्वेन तदीयेच्छायास्तदधीनत्वात्। कर्तुर्यदा चिकीर्षा भवति तदा कार्यार्थं यतते, यत्नस्येच्छाधीनत्वात्। इच्छा च कर्त्रधीनातः स्वीयेच्छया यदा यत्कार्यं चिकीर्षति तदा तत्कार्यं करोति, अतः न तत्र कोऽपि दोषसम्भवः। इति सर्वथा सिद्धमीशस्य जगत्कर्तृत्वमेकत्वादिचेति बोध्यम्। इति स्याद्वादमञ्जर्युक्तस्य षष्ठकारिकया प्रदर्शितस्याक्षेपस्य परिहारः समाप्तः। ....

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ चैतन्यादयो रूपादयश्च धर्मा आत्मादेर्घटादेश्च धर्मिणोऽत्यन्तं व्यतिरिक्ता अपि समवाय सम्बन्धेन सम्बद्धास्सन्तो धर्मधर्मिव्यपदेशमश्नुवते–इति तन्मतं दूषयन्नाह परः—

"न धर्मधर्मित्वमतीवभेदे, वृत्त्यास्ति चेन्न त्रितयञ्चकास्ति" । इति स्याद्वादमञ्जर्युक्तसप्तमकारिकया धर्मधर्मिणोरैक्यमुपदर्शितवान् । तच्च तार्किकाणाम्मते कथमपि न घटते ।

अत्रायं विचारः—तार्किकादि बहूनान्तान्त्रिकाणाम्मते धर्माः धर्मिणोऽत्यन्तमतिरिक्ता एव सन्ति । ये च धर्माः न ते धर्मिणः ये च धर्मिणो न ते धर्माः । यथा घटत्वादयो धर्मा एव न धर्मिणः घटादयश्च धर्मिण एव न खलु धर्मा । पटोयमित्यत्र पटत्वन्तद्गतरूपादयश्चैव धर्माः, न खलु पटो धर्मस्तत्र । यतो धर्माः धर्मिणि तिष्ठन्ति न खलु धर्मिणोऽपि धर्मे निवसन्ति, अत आधेयभूता धर्मा आधारभूताश्च धर्मिणस्सन्ति । तयोर्महान् भेदो वरीवर्ति ।

परञ्च तत्र वाक्पाटवापन्नैः जैनाचार्यैस्तत्खण्ड्यते, तथाहि—यथा त्वन्मते पृथिवीत्वादिसम्बन्धादियम्पृथिवीत्यत्र पृथिवीत्वम्पृथिव्या एव स्वरूपन्न ततोऽतिरिक्तङ्किञ्चित् तेन स्वरूपेणैव समं योऽसावभिसम्बन्धः पृथिव्याः स एव समवाय इत्युच्यते । एवं समवायत्वाभिसम्बन्धात्समवाय इत्यपि किन्न कल्प्यते, यतस्तस्यापि यत्समवायत्वं स्वस्वरूपन्तेन सार्धं सम्बन्धोऽस्त्येव । अन्यथा निःस्वभावत्वाच्छशविषाणवदवस्तुत्वमेव भवेत् । ततो यथा पृथिव्याम्पृथिवीत्वं समवायेन समवेतमेवं समवायेऽपि समवेतं समवायत्वमेवन्तत्रापीत्यनवस्था स्यादतो धर्मधर्मिणोरविष्वग्भाव एव सम्बन्धो नान्यस्समवायादिरिति यदाक्षिप्तम्परैस्तत्तु विषयस्पर्शमकृत्वैव खण्डितन्न वास्तविकन्तथाहि–पृथिवीत्वादयो धर्माः पृथिव्यादौ धर्मिणि समवायेनैव तिष्ठन्ति, नान्येन केनाप्यपरेण सम्बन्धेन स्थातुमर्हन्ति, अयुतसिद्धत्वात् । तथाहि "ययोर्द्वयोः पदार्थयोर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते तावेवायुतसिद्धौ" यथा "पट" इत्यत्र तन्तुं विना पटो नैवावतिष्ठते, तन्तुषु समवेतः पट उत्पद्यते, अयुतसिद्धत्वात् । नापि पटस्तुर्याश्रितोऽयुतसिद्धत्वाभावात् । तुरीवेमादि च तन्निमित्तकारणमेवातस्तत्र न समवेतः पट उत्पद्यते, समवायाभावात् । एवम्पृथिवीत्वमपि पृथिवीं विना न कुत्राप्यवतिष्ठते, किन्तु पृथिव्यामेव समवायेन समवेतमवतिष्ठतेऽयुतसिद्धत्वात् । नैतावता धर्मधर्मिणोरैक्यमपितु सर्वथा तयोर्भिन्नत्वमेव । पृथिवीत्वादयो धर्मपदवाच्याः पृथिव्यादयश्च धर्मिस्वरूपा एवेति तयोर्भेदः स्पष्ट एव ।

यदि च धर्मस्य धर्मिणो व्यतिरिक्तत्वन्न सिद्ध्येत्तदाधाराधेयभावनियमो न स्यात् । अर्थात् कः कस्याधारः कः कस्याधेयश्चेति व्यवस्था न स्यात् ।

न च समवायस्य कथं सिद्धिरिति वाच्यम्, अनुमानादेव तत्सिद्धेः । तथाहि "गुणक्रियादिविशिष्टबुद्धिः विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वात्," दण्डीपुरुष "इति विशिष्टबुद्धिवत्" इत्यनुमानेन संयोगादिबाधात्समवायस्यैव सिद्धिर्भवतीति बोध्यम् ।

न च यथा द्रव्ये समवायसम्बन्धेन गुणादयो वर्तन्ते तथा समवायेऽपि समवायसम्बन्धेन समवायत्वं कथन्न वर्तत इति वाच्यम्, अनवस्थापत्तेः । तथाहि–यदि समवाये समवायत्वं समवायेन वर्तेत्, तदा समवायत्वेऽपि समवायत्वत्वं समवायेन कथन्न स्यात् । एवञ्च पुनस्तत्रापीति रीत्याऽनवस्थापातः स्यात् । अतो द्रव्यगुणकर्मस्वेव सत्ताख्या जातिः समवायेन वर्तते न तु समवायेऽपि समवायत्वादि किञ्चित्समवायेनास्त इत्यदोषः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यदि च सत्तापदेन "अस्तीति सन् सतो भावः सत्तेति गृह्यते, तदा सामान्यादावपीयं सत्ता स्थातुमर्हति, परन्तु नैव योगसिद्धा सत्तात्र विवक्षितापितु द्रव्यादित्रिषु समवेता व्यापकत्वेन पराख्या जातिस्वरूपा तर्कशास्त्रसम्बद्धतल्लक्षणविशिष्टा पारिभाषिकी सत्ताऽत्र विवक्षिता।

अतो "द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते" इति न्यायसिद्धान्तमुक्तवल्युक्तकारिकापि सङ्गच्छते। अस्यामुपस्थितायां स्थितावपि यदि पुनः जातावपि सत्ताख्या जातिः, समवाये वा सत्ताख्या जातिः जैनाचार्यैः स्वीक्रियेत् तदा तेषान्तर्कविचारशून्यानां साहसमात्रमेव वक्तुं शक्यते किमत्राधिककथनेन। तथाच धर्मा धर्मिणोऽतिरिक्ता एवेति सिद्धम्। इति स्याद्वादमञ्जर्युक्तसप्तमकारिकाप्रदत्ताक्षेपपरिहारः।

अथ सत्ताभिधानम्पदार्थान्तरमात्मनश्च व्यतिरिक्तं ज्ञानाख्यं गुणमात्मविशेषगुणोच्छेदस्वरूपाञ्च मुक्तिमज्ञानादङ्गीकृतवतः तार्किकादीनुपहसञ्जैनाचार्यः प्राह—

"सतामपि स्यात्क्वचिदेव सत्ता
चैतन्यमौपाधिकमात्मनोन्यत्॥"

इत्यादिना खण्डितवान्यायाभिमतान् प्रकृतविषयान्। तत्रायमाशयः—सत्ताख्यजातिविषये तार्किकाः वैशेषिकास्चेत्थमामनन्ति—यदियन्द्रव्यगुणकर्मसु समवायेन समवेता सत्ताख्या जातिः द्रव्यादिभ्यो व्यावर्तमाना एव तिष्ठति। न तु द्रव्यादिस्वरूपा। [यतः] सत्ताया जातित्वान्नित्यत्वाच्च; कार्यद्रव्यादेस्चानित्यत्वान्न जातित्वमिति बोध्यम्। सेयं सत्ताख्या जातिः परापरोभयभेदेन द्विविधा बोध्या। तत्र घटत्वापेक्षया पृथिवीत्वस्य परत्वन्तदपेक्षयाघटत्वस्य चापरत्वम्, एवम्पृथिवीत्वापेक्षया द्रव्यत्वस्य परत्वन्तदपेक्षयापृथिवीत्वस्य चापरत्वम्, एवन्द्रव्यत्वापेक्षया द्रव्यादित्रिकवृत्तिसत्तायाः परत्वम्, तदपेक्षया च द्रव्यत्वस्या परत्वमिति बोध्यम्। अत्र व्यापकत्वेन परत्वं व्याप्यत्वेन चापरत्वङ्ग्राह्यम्। एवञ्चेयज्ञातिरतिरिक्तैव न खलु घटादिव्यक्तिस्वरूपेति निश्चीयतेऽतो न तत्र कोऽपि विवादावसरः।

एवम्परमाणुवृत्तिः विशेषाख्योऽतिरिक्तः पदार्थ एव, न तु द्रव्यस्वरूपस्तयोरत्यन्तभेदात्। तत्र जातिः समवायेन द्रव्यादित्रिषु समवेता, विशेषस्च परमाणुस्वरूपे नित्यद्रव्यमात्र एव समवेतः सन्नुपलभ्यत इतीयती विशेषतात्रानयोः। अनवस्थादोषभयादेव सामान्यादौ सत्तायाः जातिरूपायाः अभावो बोध्यः।

एवं ज्ञानेच्छादेरात्मनिष्ठत्वेऽपि नात्मस्वरूपत्वमपि तु तद्भिन्नत्वमेवास्ति, ज्ञानादीनाङ्गुणत्वादात्मनस्च द्रव्यत्वात्तयोरत्यन्तम्भिन्नत्वमेवेष्टम्। यदि चात्मनो ज्ञानादव्यतिरिक्तत्वमिष्यते तदा "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्ग" इति न्यायसूत्रानुसारेण बुद्ध्यादीनामात्मविशेषगुणानामुच्छेदे सत्यपवर्गो जायते, यतस्तेषां क्रमश उत्तरोत्तरापाये सत्येव तदनन्तरापायेनात्यन्तिकदुःखनिवृत्तिरूपस्य मोक्षस्य प्राप्तिर्भवति। तत्रोक्तानामात्मविशेषगुणानामुच्छेदे सत्यात्मनोऽप्युच्छेदः स्यात्, तदव्यतिरिक्तत्वात्। बुद्ध्यादीनान्नवानामात्मविशेषगुणानामुच्छेदस्यैव मोक्षपदार्थत्वाङ्गीकारात्। क्वचिच्चात्यन्तिकदुःखनिवृत्तेरेव मोक्षत्वमामनन्ति तार्किकाः। तदुच्छेद एव महोदयो न कृत्स्नकर्मक्षयलक्षण इति। "न वै सशरीरस्य प्रियाप्रिययोरपहतिरस्ति" "अशरीरं वा वसन्तं प्रियाप्रिये न स्पृशत" इत्यादयो विविधा वेदान्तास्तादृशीमेव मुक्तिमादिशन्ति। अत एव "यावदात्मगुणाः सर्वे नोच्छिन्ना वासनादयः। तावदात्यन्तिकीदुःखव्यावृत्तिर्न विकल्प्यते।''' गुणानामात्मनोध्वंसः सोपवर्गः प्रतिष्ठितः। इत्यादयोऽपि चरितार्थाः भवन्ति। [स्या. म. पृ. ३९ पं. २५]

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अत्र पर आशङ्कते—सर्वपदार्थेषु मध्ये द्रव्यादित्रिष्वेव सत्तासम्बन्धः स्वीक्रियते न तु सामान्यादित्रय इति महतीयं पश्यतोहरता । यतः परिभाव्यतां सत्ताशब्दार्थः, अस्तीति सन, सतो भावः सत्ता अस्तित्वम् । तद्वस्तुस्वरूपन्निर्विशेषमशेषेषु पदार्थेषु त्वयाप्युक्तम् । तत्किमिदमर्धजरतीयम्, यद्द्रव्यादित्रय एव सत्तायोगो नेतरत्र त्रय इति यदवोचदिति तन्न विज्ञजनविचारसहम्, यतोऽनुवृत्तिप्रत्ययाभावादेव सामान्यादौ सत्ताया अभावो बोध्यः । नच घटत्वादिसामान्ये सामान्यमिदं सामान्यमिदमिति प्रतीतेः, विशेषस्याप्यनेकत्वाद्विशेषोऽयं विशेषोऽयमिति प्रतीतेः, समवायस्य च प्रागुक्तयुक्त्यावच्छेदकभेदादयं समवायोऽयं समवाय इति प्रतीतेश्चानुभवात्कथन्नानुवृत्तिप्रत्यय इति वाच्यम्, सामान्यादिषु बाधकस्य सत्वेनानुवृत्तिप्रत्ययाभावस्य तादवस्थ्यात् । तथाहि यदि सामान्येऽपि सामान्यमारोप्यते तदा तत्सामान्यवृत्तिसामान्येऽपि सामान्यमिति पुनस्तत्रापीति रीत्यानवस्थायाः दुर्वारत्वं स्यादप्रामाणिकानन्तकल्पनया । विशेषेषु च यदि सामान्यस्य सत्ताभ्युपेयते तदा तेषां विशेषाणां स्वरूपहानिः प्रसज्येत । यतो विशेषाणामयं स्वभाव एव यत्ते स्वतो व्यावर्तकाः भवन्ति । न तेषाङ्कोऽप्यन्यो व्यावर्तकोऽस्तीति स्वरूपहानेर्दुर्वारत्वम् । एवं समवायेऽपि यदि सत्ता कल्प्यते तदा तद्वृत्यर्थमपि पुनस्तत्र सम्बन्धान्तरो वाच्यः, परञ्च समवाये न कोऽप्यन्यः सम्बन्धान्तरस्तिष्ठति । तस्मात्प्रदर्शितबाधकभयादेव सामान्यादौ सामान्यादेरभावो बोध्यः । नच सामान्ये सत्ताकल्पने यद्यनवस्था तदा द्रव्यादित्रिष्वपि सत्ताकल्पने कथन्नानवस्थेति वाच्यम्, द्रव्यादित्रिष्वप्यनवस्थाकल्पने जातेः क्वचिदपि स्थानाभावेन जातिवादसिद्धान्तस्य भङ्गापातात् ।

अत्रायं विचारः—द्रव्यादित्रिष्वेव जातिः सत्तात्मिका समवेतोपलभ्यते, परन्तु तत्राप्यनवस्था प्रदीयत अहो महदाश्चर्यम् । यतः—तत्र कथमप्यनवस्था न भवितुमर्हति, व्यक्तेरानन्त्यात् । कथञ्चिदापादनेऽपि सामान्यस्य स्थानं क्व स्यात् ? सकलव्यक्तीनाम्बोधार्थमेव जातिवादोऽङ्गीक्रियते, तया च जात्या समेषां व्यक्तीनाम्बोध उत्पद्यते । जातेः बोधार्थं जात्यन्तरस्वीकाराभावात् । यदि जातावपि जातिः स्वीक्रियते, तदा पृच्छामि यत्कस्याञ्जातौ का जातिस्तिष्ठति, यदि गोत्वाख्यायाञ्जातौ गोत्वत्वं सन्तिष्ठते तदा गोत्वत्वादिजातिः कल्पयितुं शक्या । परञ्च तदेव न सम्भवति यतो नित्यत्वे सत्यनेकवृत्तित्वरूपाया सत्तायास्तदानीन्तत्राभावात् । गोत्वस्यैकत्वात् । किञ्च स्वीकृतायामपि गोत्वत्वाख्यायाञ्जातौ किन्नाम गोत्वत्वमिति चेत्, गवेतरासमवेतत्वे सति सकलगोसमवेतत्वमेव तद्बोध्यम् । तथाच महद्गौरवम् । अतोऽत्रत्याक्षेपो विषयस्पर्शमकृत्वैव कृतो धूलिप्रक्षेपः । एवमेव विशेषे समवाये च बोध्यम् । नच विशेषेषु सत्ताभ्युपगमे कथं रूपहानिरिति वाच्यम्, विशेषस्यान्त्यपदार्थत्वेन स्वतो व्यावर्तकत्वात् । तस्य नान्यः कोऽपि व्यावर्तकोऽस्तीति भावः । तत्र विशेषत्वस्यापि जातित्वे विशेषवृत्तेः विशेषत्वस्य स्वरूपहानिप्रसङ्गः स्यादिति भावः । अतो विशेषत्वन्न जातिरित्यर्थः । अपि च नित्यत्वे सत्यनेकसमवेतत्वाभावेन जातिलक्षणालक्ष्यत्वाद्विशेषत्वन्न जातिः कथमपि भवितुमर्हति । एवं समवायत्वमपि न जातिरनवस्थादोषभयात् । अपि च समवायस्यैकत्वेनानेकसमवेतत्वविशिष्टलक्षणाभावान्न जातित्वमित्यर्थः । अतो नाविष्वग्भावलक्षणः सम्बन्धः कथमपि भवितुं शक्यः ।

यच्चोक्तं—द्रव्यादित्रये मुख्यः सत्तासम्बन्धः सामान्यादौ तु गौण इति न तार्किकाणाम्पक्षोऽपि तु स्वकपोलकल्पितकल्पनया वागाडम्बरं कुर्वञ्जैनाचार्यप्रवर उपहास्यपात्रो भवतीति बोध्यम् ।

यद्यपि ज्ञानात्मनोरेकत्वनिषेधविषये पूर्वमेवालोचितम्मया तथापि—आक्षेपकानाम्मते ज्ञानस्वरूप एवात्मेति न ज्ञानतोभिन्न आत्मेति—मतानुसारेण यदुक्तम्परैः (स्या. म. पृ. ४१ प. १०) ज्ञानमपि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यद्येकान्तेनात्मनः सकाशाद्भिन्नमिष्यते तदा तेन चैत्रज्ञानेन मैत्रस्येव नैव विषयपरिच्छेदः स्यादात्मन इति तन्न समीचीनम्, यत्रात्मनि समवायेन समवेतं ज्ञानन्तत्रैव विषयावभाससम्भवात्। समवायस्यैकत्वेऽपि तत्तद्व्यक्तिवृत्तिसमवायानामनेकत्वम्भिन्नत्वञ्च व्यक्तिभेदात्सिद्धमेवेति न सर्वेषां विषयावबोधप्रसङ्गो दोषः।

नच समवायेन ज्ञानात्मनोः सम्बद्धत्वस्वीकारेऽपि स समवायः केन तयोः सम्बद्ध्यते समवायान्तरेण चेत्, पुनस्तत्रापीति रीत्याऽनवस्था स्यात्। स्वेनैव चेत् किन्न ज्ञानात्मनोरपि तथेति वाच्यम्, समवायस्य बोधार्थं समवायसम्बन्धान्तरकल्पने मानाभावात्। समवायस्यैष स्वभावः यदात्मानं ज्ञानात्मानौ च बोधयति। प्रदीपवत्। अर्थात् यथा प्रदीपप्रकाशः स्वात्मानमपरञ्च वस्तुमात्रम्प्रकाशयति, तथैव समवायोऽपि स्वात्मानं ज्ञानात्मानौ च प्रकाशयति। समवायस्वभावश्च समवायस्वरूप एव न ततो भिन्नोऽतो न कोऽपि दोषलेशसम्भव इति।

यदि च ज्ञानात्मनोरैक्यमापाद्यते तदात्मा कर्ता ज्ञानञ्च करणमिति भेदप्रतीतिः कथं स्यात् कर्तृत्वकरणत्वयोस्सर्वथाभिन्नत्वात्। वर्द्धकिवासीवत्। न च वासी हि बाह्यं करणं, ज्ञानञ्चाभ्यन्तरङ्करणमिति तत्कथमनयोः साधर्म्यमिति वाच्यम्, दृष्टान्तदार्ष्टान्तिकयोः केनचिद्धर्मेणैव साधर्म्यस्वीकारात्। न हि सर्वांशेनोभयत्र साधर्म्यमुपलभ्यते, यतः सर्वांशेन साधर्म्ये सत्यैकत्वम्प्रसज्येत। दृष्टं हि लोके दात्रेण लुनातीत्यत्र लावकः कर्ता, तदन्यो वासी च करणमिति स्पष्ट एव भेदः। तथैवाभ्यन्तरकरणेऽपीदृश्येव गतिः। यतो ज्ञानेन ज्ञायते वस्तु, अतो ज्ञानङ्करणं ज्ञाता च कर्तेति तयोः कर्तृकरणयोरत्यन्तभिन्नत्वेऽपि साधर्म्यमुपलभ्यत एव।

न च कर्तृत्वकरणत्वयोः सामानाधिकरण्ये सति का क्षतिरिति वाच्यम्, अन्यदृष्टस्यान्येन स्मरणासम्भवात्। अनुभवस्मरणयोस्सामानाधिकरण्येन कार्यकारणभावे स्वीकृते पूर्वं चक्षुषा साक्षात्कृतानाञ्चक्षुषोऽभावे स्मरणं कथमुपपद्यते। न कथमपि सम्पद्यते।

अतो ज्ञानात्मनोः सर्वथा भिन्नत्वं सिद्धम्। नचाभेद एव कथन्न स्वीक्रियत इति वाच्यम्, सत्यभेदे गुणगुणिभावयोराधाराधेयभावयोश्चानुपपत्तेः। अतो नाभेदः पक्षः साधीयः कथमपि।

अथ ज्ञानेन विवक्षितार्थं ज्ञात्वा ज्ञानग्रहणपरिणामवानात्मा ज्ञानं गृहीत्वार्थं व्यवस्यतीति संवित्तिलक्षणैककार्यसाधकत्वेन ज्ञानात्मनोरभेदः कथन्नेति चेन्न, शुद्धस्यात्मन एव ज्ञातृत्वेन ज्ञाने ज्ञातृत्वाभावात्। यदि ज्ञाने ज्ञातृत्वं स्यात्–तदा ज्ञानात्मनोरुभयोः ज्ञातृत्वेनाभेद एवोपपादयितुं शक्यः। किन्तु स्वयं ज्ञानं जडात्मकमतो ज्ञातृत्वन्तस्य न घटते।

यदि च जडीभूतस्य गुणस्वरूपस्यापि ज्ञानस्य ज्ञातृत्वं स्यात्तदा घटस्यापि ज्ञातृत्वं कथन्न जडत्वस्य साम्यात्। अतो भेद पक्ष एव श्रेयः।

अपि चात्मज्ञानयोरभेदे कर्तृकरणभावोपि न कथमप्युपपादयितुं शक्यते, कर्तृत्वकरणत्वयोरेकत्रैककार्यंप्रति निसर्गतो विरोधात्।

ननु यथा सर्प आत्मानमात्मना वेष्टयतीत्यत्रैकत्र कर्तृकरणभावस्तथात्रापि कथन्नैकत्र एव कर्तृकरणभाव इति चेन्न, बाह्यदृष्टान्तेनाभ्यन्तरिकदार्ष्टान्तिके तुल्यत्वानुपादानात्। सर्पश्चात्र बाह्यः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पदार्थः ज्ञानात्मानौ चाभ्यन्तराविति ज्ञानात्मनोरप्रत्यक्षत्वेन तत्र कर्तृत्वकरणत्वयोः सर्वथा विरोध एव सर्वसम्मतो बोध्यः।

अपि च "सर्पः स्वात्मना स्वात्मानं वेष्टयतीत्यत्रापि न खल्वात्मना आत्मानमुपवेष्टनं सम्भवति, अपितु स्वशरीरेणात्मानमुपवेष्टनमेव भवति, तत्क्रियाया शरीरेणैव निष्पाद्यमानत्वात्, तथाचाचेतनीभूतस्य शरीरस्य करणत्वञ्चेतनस्वरूपस्यात्मनश्च कर्तृत्वमिति महदन्तरन्तयोरिति कथन्तयोरभेदपक्षः संघटेत।

किञ्च शैलखण्डविषयेऽपि दृश्यते यत्कनिष्ठशिलाखण्डो बृहच्छिलाखण्डेनोपविष्टः। अत्रापि—कनिष्ठः शिलाखण्डो बृहच्छिलाखण्डेनावृत एव। नैतावता "स्वात्मना स्वात्मानं वेष्टयतीति" प्रयोगोऽनुपपन्नः।

यच्चोक्तञ्चैतन्यमित्यत्र चेतनस्य भावश्चैतन्यमिति विग्रहे चेतनस्वरूप एव चैतन्यमिति न ततो किञ्चिद्भिन्नञ्चैतन्यमिति तदयुक्तम्, यतश्चैतन्यञ्च चेतनगतो धर्मविशेषः, चेतनश्चात्मा धर्मिस्वरूपः इति तयोर्धर्मधर्मिणोः सर्वथैकान्तिकभेदे कथञ्चेतनस्वरूपञ्चैतन्यम्भवितुमर्हति, धर्मधर्मिणोर्निसर्गतो विरोधात्। एवमेवात्र ज्ञानस्याचेतनत्वादात्मनश्च चेतनत्वात् तयोरभेदो न केनापि जैनाचार्येण पूर्वपक्षिणा वा कर्तुं शक्यते, येनाभेदपक्षव्यवस्थितिः स्यात्।

अपि चाभेदे तयोः ज्ञानवानहमिति प्रत्ययादात्मज्ञानयोः सर्वानुभूतो भेदप्रत्ययः कथमुपलभ्यः। अन्यथा धनवानिति प्रत्ययादपि धनधनवतोरभेदप्रत्ययप्रसङ्गः स्यात्। यदि चात्मनोऽपि जडत्वमेवाङ्गीक्रियते तदा पाषाणात्मनोः को भेद इति विचारणीयः। संशयानुपपत्तित एव ज्ञानस्य च स्वतः प्रमात्वं परिहार्यम्। परञ्चात्मगतचैतन्यान्यथानुपपत्त्या ज्ञानस्योत्कृष्टता विशेषता चापादनीया।

एवमात्मनो द्रव्यत्वं ज्ञानस्य च गुणत्वन्तर्कशास्त्रसम्मतमिति द्रव्यगुणयोरत्यन्तभेदेन ज्ञानात्मनोरैकान्तिकभिन्नत्वमेव सिद्धमिति पूर्वमप्यवोचमहम्।

मुक्तिश्च संविदानन्दरूपैवास्तिकदार्शनिकप्रवरैरङ्गीक्रियते। अर्थात्—बुद्ध्यादिनवानामात्मविशेषगुणानामत्यन्तोच्छेदे सति 'तत्रात्मस्वरूपेणावस्थानस्यैव मोक्षत्वमङ्गीचक्रुस्ते। तथाहि—नवानामात्मविशेषगुणानां सन्तानोऽत्यन्तमुच्छिद्यते सन्तानत्वात्, प्रदीपसन्तानवत्। यो यः सन्तानः स सोऽत्यन्तमुच्छिद्यते, इति व्याप्तिज्ञानादेवात्रोक्तविधो मोक्षः सिद्ध्यति। विषयेऽस्मिन्-वृद्धोक्तिरपीयं सगच्छते।"

"ननु तस्यामवस्थायां कीदृगात्मावशिष्यते। स्वरूपैकप्रतिष्ठानः परित्यक्तोऽखिलैर्गुणैः"।... सुखमात्यन्तिकं यत्र बुद्धिग्राह्यमतीन्द्रियम्"...इत्यादिविविधप्रमाणैरात्यन्तिकदुःखनिवृत्तिपूर्वकं सुखावाप्तिपूर्वकञ्च स्वस्वरूपेणावस्थानमेव मोक्षो नान्यः कश्चिदपरो मोक्ष इति सिद्धम्।

अत्र परः शङ्कते—यदपि न संविदानन्दमयी च मुक्तिरिति व्यवस्थापनायानुमानमवादिसन्तानत्वादिति तत्राभिधीयते—

ननु किमिदं सन्तानत्वं स्वतन्त्रमपरापरपदार्थोत्पत्तिमात्रं वा, एकाश्रयापरापरोत्पत्तिर्वेति पक्षत्रयेऽपि विविधन्दूषणन्दत्तम्, तथाहि प्रथमे पक्षे सव्यभिचारः, द्वितीये च साधनविकलो दृष्टान्तः प्रदर्शितः,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परमिदन्दूषणं सर्वथा प्राज्ञैः विचारानर्हम्, यतः घटपटकटादीनां सन्तानत्वस्याभावाद्व्यभिचाराभावो बोध्यः। यदि च तेषामपि सन्तानत्वमभ्युपगम्यते तदोच्छिद्यमानत्वमपि स्वीकर्तव्यमेव। सन्तानस्य प्रतिपलमभिनवत्वाङ्गीकारात्। यश्च प्रतिपलमुत्पद्यते सोऽवश्यं विनाशशीलोऽतो विनाशशीलत्वाद्घटादौ व्यभिचाराभावो बोध्यः। एवं साधनवैकल्यमपि नास्ति दृष्टान्ते यतस्तस्योक्तविधस्य सन्तानत्वस्य प्रदीपेऽनुपलन्नूतनत्वविशिष्टस्याविर्भावात्। ननु यथा संसारिणः सुखदुःखे परस्परानुषक्ते स्यातान्न तथा मुक्तात्मनः, किन्तु केवलं सुखमेव, दुःखमूलस्य शरीरस्यैवाभावात्। न च शरीराभावात्कथं सुखमिति वाच्यम्—तस्यत्वात्मस्वरूपत्वादेवावस्थानात्। तत् स्वरूपावस्थानमेव मोक्षः। अत एवाशरीरमित्युक्तिरपि चरितार्था। स्मृतिरपि तदर्थानुपातिनी दृश्यते, तथाहि—सुखमात्यन्तिकं यत्र बुद्धिग्राह्यमतीन्द्रियम्। तं वै मोक्षं विजानीयाद्दुष्प्रापमकृतात्मभिरिति चेन्न, सुखशब्दस्यात्र दुःखाभावार्थकत्वेनादोषात्। यदि चाशरीरत्वेन दुःखाभावस्तदाऽशरीरत्वेन सुखाभावोऽपि कथन्नोभयोः सामानाधिकरण्यात्। नचात्मनः स्वरूपेणावस्थानात् कथन्न सुखमिति वाच्यम्। तत्रापि सुखशब्दस्य दुःखाभावार्थकत्वेनादोषात्, यत आत्यन्तिकदुःखनिवृत्तेरेव मोक्षत्वाङ्गीकारात्। सुखशब्दस्यापि दुःखाभावार्थपरत्वकल्पनया न कश्चिद्दोषः समापततीति। मुक्तौ केवलं प्रियमेव स्पृशत्यात्मा नाप्रियमिति तु वाङ्मात्रम्, कुतः प्रियाप्रिययोरैकाधिकरण्येन यत्र प्रियन्तत्रैवाप्रियमापि भवितुमर्हति। एकस्य सत्तापरस्य चाभाव इत्यत्र मानाभावो बोध्यः।

नचायं "रोगाद्विप्रमुक्तः सुखी जातः" इत्यादिवाक्येषु रोगाद्विप्रमुक्तशब्दप्रयोगादेव दुःखाभावार्थस्य बोधसम्भवे सुखी शब्दप्रयोगात्कथन्न पौनरुक्त्यमिति वाच्यम्, तत्र पूर्वपरवर्तिनोः "रोगाद्विप्रमुक्त-सुखी" शब्दयोः विशेषणविशेष्यभावस्वीकारेण तयोः सामान्यविशेषार्थप्रतिपादकत्वेनादोषात्। पूर्वपदेन रोगनिवृत्तिबोधसम्भवेऽपि सुखीशब्दमन्तरा पूर्णस्वस्थताबोधपूर्वकम्मनसि सन्तुष्टिः केन बुद्ध्येत। अतः यथा पूर्णस्वस्थतापूर्वको मनस्यानन्दः सुखी शब्देन बुद्ध्यते न तथा पूर्वपदेन बोधो भवति। नातस्तत्र किञ्चिद्व्यर्थन्नवा पुनरुक्तिरेवेति।

यच्चोक्तं (पृ. ४६ प. १४, स्या. म.) वरं वृन्दावने रम्ये क्रोष्टृत्वमभिवाञ्छति, नतु वैशेषिकीम्मुक्तिङ्गौतमो मुनिरब्रवीत्। इति तदतिगर्ह्यम्—यतो यत्र स्वर्गीयं सुखमपि तृणवदेव प्रतिभाति, "यद्गत्वा न निवर्तन्ते तद्धाम परमं मम" इति श्रीमद्भगवद्गीतावचनानुसारेण तथा "न स पुनरावर्तते" इति श्रुत्यनुसारेण चेदमेव निश्चीयते यद्यत्र लेशमात्रमपि दुःखन्न भवति, यत्र च गत्वा पुनः प्रत्यावर्तनन्न कस्यापि भवति, नच दन्दह्यमानं चेतो भवति कस्याप्यपि तु सर्वथा त्रिकालाबाधितस्य नैसर्गिकस्य सुखस्यानुभूतिरेव सर्वदा तेषाम्मुक्तानां यत्र यस्यामवस्थायां भवति स एव मोक्षो नापरः कश्चिदिति स्थितिः। परन्तत्र यदि परमपवित्रं वृन्दावनन्धाम प्राप्यापि क्रोष्टृत्वमेवाभिवाञ्छेत्, तदा तद्धामप्राप्तेः का विशेषता। यतस्तेषान्तत्रापि तच्छरीरे दुःखसम्भवात् अतो दुःखाभावस्य मोक्षस्वीकारे न काप्यनुपपत्तिरापत्तिरेव वेति बोध्यम्।

अपरञ्च सुखमपि दुःखासृष्टन्न किमपि भवितुमर्हति किन्तु दुःखसंस्पृष्टमेव सर्वं सुखम्भवति। तत्रावश्यं हेयन्दुःखं विवेकहानञ्च। पश्यन्तु भवस्थितानाञ्जीवानाम्प्रतिपलं किञ्चित्किञ्चिद्दुःखमनिवार्यरूपेण भवत्येव। यदा च किञ्चिद्दुःखं जहाति जीवस्तदापरन्दुःखमाप्नोति, ततो निवृत्तिस्तु सर्वथा-शक्यैव। "हेयन्दुःखमनागतमित्यत्रापि" मनोव्यापारस्यैव मुख्यत्वम्प्रसिद्धम्। अत "एकस्य दुःखस्य न यावदन्तं गच्छाम्यहं पारमिवार्णवस्य, तावद्द्वितीयं समुपस्थितम्मे छिद्रेष्वनर्था बहुली भवन्ति" इति नीतिवाक्यमपि सङ्गच्छते। इति त्ववश्यं यत्प्रतिपलमेव दुःखसन्तप्ता मानवास्तन्निवारणाय यतन्ते।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यतितव्यञ्च, परञ्च केवलं यत्नेच्छयैव न किमपि सञ्जायते, तेषामनुपलब्धवनवोत्पद्यमानत्वात्। तत्र नैतादृशः कोऽपि जीवो यः स्वीयमागतमनागतं वा दुःखं त्यक्तुमनिच्छन्नेव सुखमभिवाञ्छेदपि तु निर्दुःखमेव सुखमभिवाञ्छतीति तत्रापि दुःखाभावस्यैवोपयोगित्वं सर्वसम्मतम्। अतो लोकानुग्रहकांक्षिणस्तर्कमार्गप्रणेतार "आत्यन्तिकदुःखनिवृत्तेरेव" मोक्षत्वं व्याचक्रुः। न कोऽपि मानवो मधुविषसम्पृक्तान्नमुपभुञ्जते। एवमेव सदुःखम्मोक्षन्न कोऽपि वाञ्छति।

अतः प्रेक्षावतान्तत्र दुःखनिवृत्त्यर्थमेव प्रवृत्तिर्भवतीति न कश्चिद्विवादावसरः।

यच्चोक्तं "सुखसंवेदनस्वभाव एव मोक्षः" इति तन्न समीचीनम्, दुःखसंवेदनस्वभावोऽपि मोक्षोभवितुमर्हति। यथा भवे सुखसंवेदनकाले दुःखसंवेदनमप्यनुभूयते, तथा मोक्षेऽपि दुःखसंवेदनं प्रसज्येत। सति च सुखदुःखोभयसंवेदनस्वभावस्वरूपे मोक्षे स्वीकृते सांसारिकसुखदुःखानुभवापेक्षया मोक्षीय सुखदुःखानुभवस्य को भेदः का वा विशेषता?

अतो मोक्षे न किमपि सुखदुःखज्ञानम् अपितु—"सर्वथात्यन्तिकदुःखनिवृत्तिरेव मोक्ष" इति लक्षणं सुष्ठु प्रतिभाति।

अथापि यदि "सुखसंवेदनैकस्वभाव एव मोक्षः" स्वीक्रियेत चेत्, तदा तद्रागेण प्रवर्तमानो मुमुक्षुर्न मोक्षमधिगच्छेत्, यतो रागिणां कुतो मोक्षः। रागस्य बन्धकारणत्वात्। न च सांसारिकसुखविषयकरागस्यैव बन्धकारणात्मकत्वमिष्टम्, मोक्षीयसुखविषयकरागस्य च न बन्धकारणात्मकत्वमिति वाच्यम्, उभयत्रैव सुखविषयकरागस्य बन्धकारणात्मकत्वे बाधकाभावात्। नात्र कापि वाचोयुक्तिः यन्मोक्षीयसुखरागस्य बन्धकारणत्वन्नाङ्गीकार्यमिति। यद्यत्र भवीयसुखरागस्यैव बन्धकारणत्वमिष्यते तदा तत्रापि स्वीकार्यमेव। यद्यत्र नाङ्गीक्रियते तदा तत्रापि नाङ्गीकार्यमुभयोरेकविषयत्वात्। एकत्राङ्गीकार्यमन्यत्र नाङ्गीकार्यमिति न युक्तमर्धजरतीयत्वस्यानपायात्। अतः "ययोरेव समो दोषः परिहारस्तयोः समः नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे" इति नियमात् कृत्स्नकर्मक्षयान्न सुखसंवेदनात्मको मोक्षोऽपि तु बुद्ध्यादिनवविधगुणोच्छेदरूप एव मोक्षोऽङ्गीकर्तव्यः।

अपि च भो विद्वन्? भवन्मतेऽपि "मतिश्रुतावधिमनः पर्यायकेवलभेदाच्च" पञ्चधा ज्ञानम्। तत्राद्यं ज्ञानचतुष्टयं क्षयोपशमिकत्वात् केवलज्ञानाविर्भावकाल एव प्रलीनम्। "नट्ठंमि उ छाउमत्थिए नाणे" इत्यागमान्निश्चीयते। केवलन्तु सर्वद्रव्यपर्यागतं क्षायिकत्वेन निष्कलङ्कात्मस्वरूपत्वादस्त्येव मोक्षकाल इति तत्र सुखादेरुच्छेदः स्वीकार्य एव। तत्र सुखादिसंवेदनहेतुभूतस्य कर्मणोऽभावात्सुखस्यापि धर्ममूलकत्वेन तदुच्छेदादेवोच्छेदः। अधर्ममूलकदुःखोच्छेद इव। धर्माधर्मस्वरूपयोः कारणयोरुच्छेदे सति सुखदुःखरूपयोः कार्ययोरुच्छेद इष्ट एव प्रतिभाति। अत्रायं विचारः—कारणसत्वे कार्यसत्ता कारणाभावे कार्याभावः, इत्यन्वयव्यतिरेकसहचारौ भवतः। तत्र कारणसत्वे कार्याभावः कारणाभावसत्वे च कार्यसत्तेत्यन्वयव्यतिरेकव्यभिचारौ भवतः। तथाचात्र कारणोच्छेदे सत्यपि यदि कार्योच्छेदो न स्यात् तदा व्यतिरेकव्यभिचारात्मकन्दोषङ्को निवारयेत्।

अतः "संविदानन्दमयी मुक्तिरेव" युक्तियुक्ता विज्ञजनसंवेदनीया बोध्या। तत्र जैनाचार्याः केवलं स्वकपोलकल्पितकल्पनया दुराग्रहं कुर्वन्तः वास्तविकन्यायमार्गाद्भ्रश्यन्ति। इति स्याद्वादमञ्जर्युक्ताष्टमकारिकया प्रदत्ताक्षेपपरिहारः समाप्तः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ चैतन्यस्यात्मगतत्वेऽप्यात्मनो विभुत्वममन्यमानस्य तार्किकस्य मतमुपहसञ्जैनाचार्यः प्राह--(स्या. म. पृ. ४८, प. १८) "यत्रैव यो दृष्टगुणः स तत्र, कुम्भादिवन्निष्प्रतिपक्षमेतत् । तथापि देहाद्बहिरात्मतत्वमतत्ववादोपहताः पठन्ति " इति । अत्रायम्भावः—चैतन्यमात्मगतो धर्मो न खलु शरीरादेस्तस्य जडीभूतत्वात् । यदि चैतन्यस्यापि शरीरगतत्वमेव स्यात्, तदा जडचेतनयोः को भेदोऽस्तश्चैतन्यस्य चेतनस्वरूप आत्मन्येव व्यवस्थितत्वेनात्मनश्च विभुत्वमङ्गीकुर्वन्ति दार्शनिकवरास्तदुपरि पूर्वपक्षवादिनो जैनाः व्याहरन्ति, यद्यथा कुम्भादेः यत्रैव देशे रूपादयो गुणा उपलभ्यन्ते, तेषामस्तित्वञ्च तत्रैव प्रतीयते, नान्यत्रेति, तथैवात्मनोऽपि गुणाश्चैतन्यादयो देह एव दरीदृश्यन्ते न तस्माद्बहिरतस्तत्प्रमाण एवायमित्यादि यदुक्तम्परैस्तदसमीचीनम् । यतः पुष्पादीनामवस्थानदेशादन्यत्रापि गन्धादिगुणस्योपलभ्यमानत्वात् । यदि चोपलभ्यमानो गुणोऽवस्थान देश एव संस्तिष्ठेत् तदा गन्धादिगुणानामवस्थानदेशादन्यत्रोपलब्धिर्न स्यात् । किन्तु सर्वेन्यत्राप्युपलब्धिं कुर्वन्ति ।

किन्त्वात्मगुणानां समवायेनात्मन्येवोपलब्धिं कुर्वन्ति जनाः न शरीरेऽतोऽत्र न पुष्पादिः दृष्टान्तोऽपेक्षणीयः । मन्त्रादीनाञ्च विभिन्नदेशस्थानानामप्याकर्षणोच्चाटनादिगुणानां शतयोजनदूरादपि प्रयोगेन फलसम्भवात् । अपि च गुणाश्च गुणिनः सर्वथातिरिक्ता एवोपलभ्यन्ते । गुणिषु वर्तमानानाङ्गुणानान्न गुणिस्वरूपत्वङ्कथमपि केनापि कर्तुं शक्यम् । नचात्मा न सर्वगतः सर्वत्र तद्गुणानुपलब्धेः, यो यः सर्वत्रानुपलभ्यमानो गुणः स सर्वगतो न भवति यथा घटः, तथा चायम्, तस्मात्तथेति वाच्यम्, हेतोरसिद्धत्वेन स्वरूपासिद्धत्वाक्रान्तत्वात् । बुद्ध्यादीनाञ्चात्मगुणानाङ्कायव्यतिरिक्तदेशेऽनभ्युपगमात् । अत्र भट्टोऽप्याह—सर्वगतत्वेऽप्यात्मनो देहप्रदेशे ज्ञातृत्वन्नान्यत्रेति, यतः शरीरस्योपभोगायतनत्वात्, अन्यथा तस्य वैयर्थ्यात् । यद्यप्यात्मनो–विशेषगुणा अप्यदृष्टास्तथापि तेषां सर्वव्यापित्वेनोक्तदोषाभावो बोध्यः । इतरथा द्वीपान्तरादिष्वपि प्रतिनियतदेशवर्तिपुरुषोपभोग्यानि कनकरत्नचन्दनाङ्गनादीनि तेन कथमुत्पाद्यन्ते । गुणानां गुणिनो व्यतिरिक्तवृत्तित्वाभावात् । अत आत्मनः सर्वगतत्वे न किमपि बाधकम् ।

नचादृष्टस्य सर्वगतत्वे किम्मानमिति वाच्यम्, वह्नेरूर्ध्वज्वलनेन वायोश्च तिर्यग्गमनेन जीवानामेकस्माच्छरीरादन्यच्छरीरधारणसम्भवेन चादृष्टस्य सर्वगतत्वे प्रमाणात् ।

न च तत्स्वभावादेव क्रमशः उर्ध्वज्वलनतिर्यग्गमनयोः सिद्धिर्भवत्येवेति वाच्यम्, तत्राप्यदृष्टकारित्वस्य प्रकल्पनया निर्दोषसम्भवात् । नचात्मविशेषगुणानाम्बुद्ध्यादीनां शरीर एवोपलम्भात् कथन्न कायप्रमाणत्वमात्मन इति वाच्यम्, शरीरावच्छिन्न आत्मनि ज्ञानादीनामुत्पत्तिसम्भवे काये तेषामनुत्पादादात्मनः कायप्रमाणत्वाभावात् । आत्मा च कायविशिष्टो न खलु कायस्वरूपो येन तत्र बुद्ध्यादीनामुत्पत्तिसम्भवः स्यात् ।

यश्चात्मनो नानात्वे व्यापकत्वे च सङ्कराख्यो दोषः प्रदत्तस्सच न समीचीनः । यतः–नानात्वपक्ष एव तद्दोषवारणसम्भवात् । एकत्वे स्वीकृते सत्यात्मन एकात्मकृतशुभाशुभकर्मणा कथन्नान्यस्य सुखदुःखप्रसङ्ग आत्मन एकत्वात् । नानात्वे तु शुभाशुभकर्मणां सुखःदुखादीनाञ्च सामानाधिकरण्यसम्भवे नान्यकृतकर्मणान्यस्य सुखदुःखप्रसङ्गो वैयधिकरण्यात् । अतो न कोऽपि दोषलेशसम्भवः ।

अथात्मनो नानात्वे सर्वगतत्वे चैकैकस्य कथन्न सृष्टिकर्तृत्वम् । सर्वगतत्वेनेश्वरान्तरानुप्रवेशस्य सम्भावनीयत्वात् । यदीश्वरस्य तदन्तरप्रवेशो न मन्येत तदा तस्याप्यकर्तृत्वापत्तिः स्यात् । यतः क्षीरनीरयोः सम्मिश्रणे एकतरस्योपादानमन्यतरस्यानुपादानञ्च कथमपि कैरपि कर्तुन्न शक्यते । सति चैकैकस्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कर्तृत्वे बहवः कर्तारो भविष्यन्ति, कथमेक एवेश्वरो जगतः कर्तेति चेन्न, जीवेश्वरयोर्भेदेनात्मनो द्वैविध्याङ्गीकारात् सर्वज्ञस्यात्मनस्सर्वेश्वरस्य परमात्मन एकस्यैव सृष्टिनिर्मातृत्वसम्भवात्। अयम्भावः—यदि बहवः कर्तारो भवेयुस्तदा महद्वैषम्यं स्यात्। जीवानाम्प्रति शरीरभेदेन भिन्नत्वादल्पज्ञत्वेन स्रष्टृत्वाभावे सतीश्वरस्यैव निर्दोषस्य तत्कर्तृत्वमुपपद्यते। प्रतिशरीरावच्छिन्न आत्मनि यदि तत्कर्तृत्वमेव नाङ्गीक्रियते तदा तदन्तरप्रवेशः कथमीशस्यावश्यक इति विचारणीयम्।

नीरक्षीरयोः सम्मिश्रणेऽपि यथा विवेकशीलः पुरुषस्तयोरन्योन्यम्पृथक्त्वेन सञ्जानात्येव तथैव जीवेश्वरयोरैक्येऽपि परस्परन्तयोर्भेदो विस्पष्ट एव प्राज्ञैस्स्वीकृतः।

यदि चात्मनः सर्वगतत्वे स्वीकृते नरनारकादिपर्यायाणां युगपदनुभवानुषङ्गाख्यो दोष आपतेत् तदा तस्य भोगायतनाभ्युपगमादेव दोषस्य निरासो बोध्यः।

किञ्चात्मनो व्यापकत्वाभावे दिग्देशान्तरवर्तिपरमाणुभिः युगपत्संयोगाभावादाद्यकर्माभावः, तदभावाच्च तत्सम्बन्धादेरप्यभावात्सर्वदा सर्वेषामेव मोक्षप्रसङ्गः स्यात्। यदि च येन संयुक्तन्तदेव तम्प्रत्युपसर्पतीति नियमो नाङ्गीक्रियेत, तदा असंयुक्तस्याप्याकर्षणप्रसङ्गः स्यात्। तदाकर्षणे सति प्रभवन्त्यनेकविधाः दोषाः। तथाहि—असंयुक्ताकर्षणे हि तच्छरीरारम्भम्प्रत्येकमुखीभूतानान्त्रिभुवनोदरविवरवर्तिपरमाणूनामुपसर्पणप्रसङ्गान्न जाने तच्छरीरं कियत्प्रमाणं स्यात्।

मन्मते तु अदृष्टवशादेव विवक्षितशरीरोत्पादनानुगुणा नियताः परमाणव एवोपसर्पन्ति। तथा च न कोऽपि दोषलेश इति।

किञ्च यथाकथञ्चिच्छरीरोत्पत्तिर्भवतु तथापि भवन्मते "सावयवं शरीरं प्रत्यवयवमनुप्रविशन्नात्मा सावयवः कुतो न स्यात्। सति च कार्यत्वेऽस्य पटादिवत्कार्यत्वप्रसङ्गः। तथाच कैश्चिद्विजातीयैः सजातीयैर्वाकारणैरयमारभेत्। परतन्त्र विजातीयैस्तस्यानारम्भकत्वादेव नोत्पत्तिः। न च तन्तुभिर्घट उत्पद्यते, न वा कपालैरेव पट आरभ्यते विजातीयत्वात्। न च सजातीयैरपि निष्पादयितुं शक्यते, पार्थिवादिपरमाणूनामपि विजातीयत्वादेव कारणत्वाभावः सिद्ध्यति। तत्रात्मत्वाभिसम्बन्धादेवैतेषाङ्कारणानां सजातीयत्वम्भवितुमर्हति। तथाचात्मभिरात्मारभ्यत इति स्यादिति यदुक्तन्तच्चायुक्तम्, यत एकस्मिञ्छरीरेऽनेकात्मनामात्मारम्भकाणामसम्भवात्। कथञ्चित्सम्भवेऽपि तत्प्रतिसन्धानानुपपत्तिः। अन्येन दृष्टस्यान्येन प्रतिसन्धानाभावो बोध्योऽतिप्रसङ्गादिदूषणदूषितत्वात्। आरभ्यत्वे चास्य घटवदवयवक्रियातो विभागेन संयोगविनाशाद्विनाशः स्यात्। यदि चात्मनः शरीरपरिणामित्वमङ्गीक्रियते तदा तस्य मूर्तत्वानुषङ्गाच्छरीरेऽनुप्रवेशो न स्यात्। मूर्ते मूर्तस्यानुप्रवेशविरोधात्। तथा च निरात्मकमेवाखिलं शरीरं स्यादिति महत्यापत्तिः। यदि चात्मनोऽपि घटादिवदेव विनाश इष्टस्तदा जडचेतनस्वरूपयोः घटात्मनोः को भेदः। सति चाभेदे सर्वजनसिद्धप्रतीतेरपलापः कथङ्कारङ्कर्तव्यो केनेति विचारणीयः। अतो व्यापकस्सन्नात्मा सर्वगतः इति मार्गोऽविवादः। अपि चात्मनः कायप्रमाणत्वे बालशरीरपरिमाणसत्वे एवशरीरपरिमाणस्वीकारः कथं स्यात्, यत एकस्मिन्तच्छरीरेऽनेकशरीरत्वासम्भवात्। अत आक्षेपोऽयं विज्ञजनविचारपरिहास्यमय एव न तात्विक इति बोध्यम्।

यत्तूक्तमात्मा न व्यापकः चेतनत्वात् यद्यद्व्यापकन्न तच्चेतनम्, यथा व्योम। आत्मा तु चेतनस्तस्मान्न व्यापक इति विज्ञजनोपहसनीयतामात्रमार्हतानाम्, यतो न्यायमतसिद्धात्मनो द्वैविध्यान्तर्गतस्य परमात्मनो व्यापकत्वेऽपि चेतनत्वम्भवन्मतेऽपीष्टमेव। यतस्तमन्तरा जागतिकं समस्तङ्कार्यमसामञ्ज-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्यग्रस्तं स्यात्। यदि च परमात्मनोऽपि चेतनत्वं व्यापकत्वं च नाभ्युपगम्येत तदा हन्त भो! कः खलु चेतनो व्यापकश्च पदार्थो भवताभ्युपेतः इति मुहुर्मुहुः विचारणीयः। तत्र यदि-अचेतनत्वमव्यापकत्वञ्च स्वीक्रियते तदा चेतनत्वव्यापकत्वयोस्स्थितिः कुत्र कस्मिन्वा पदार्थे भवितुमर्हति। न चास्तु चेतनत्वन्तथापि व्यापकत्वन्तु दुर्घटमेवोक्तानुमानादिति वाच्यम्, प्रदर्शितानुमानेऽन्वयव्यतिरेकिव्याप्त्योरभावेन साध्यसिद्धेरभावात्। अत्रायम्भावः—प्रकृते यत्र चेतनत्वन्तत्राव्यापकत्वमित्यन्वयव्याप्तेः दृष्टान्ताभावादेवासिद्धिः, यत्राव्यापकत्वन्नास्ति तत्र चेतनत्वमपि नास्तीति व्यतिरेकिव्याप्तेः चैतन्यशून्यपदार्थे जडात्मके व्योमादाविव प्रसिद्धेश्चेतने तदभावोऽस्त्येवेति द्विविधव्याप्तेरत्राप्रसिद्धया हेतोर्दुष्टत्वाक्रान्तत्वेन साध्यसिद्धिः न कथमपि कर्तुं शक्यते।

अपि च भवमन्ते कुत्र चेतनत्वं कुत्र च व्यापकत्वमिति परिगणनं सर्वथा दुःशकमेव स्यात्। किञ्चात्मनोऽव्यापकत्वे कथमपि केनापि कदापि कुत्रापि वा कार्यमात्रन्न सम्पादयितुं शक्येतेति महदसमञ्जसम्।

मन्मते तु—"अणोरणीयान्महतो महीयानिति" श्रुत्याप्तानुभवेन चात्मनोव्यापकत्वञ्चेतनत्वञ्चाभीष्टमेवेति को दोषः। यद्यपि प्रतिशरीरभेदेन शरीरावच्छिन्नाः जीवपदवाच्या अनेक आत्मानस्सन्ति तथापि तेषाञ्चेतनत्वं सर्वथा सुष्ठुरूपेणैव घटते, "चेतनोऽहंकरोमीति" श्रुतेः। अतोऽत्र शास्त्रसम्मते चेतनत्वव्यापकत्वे आत्मनो घटेते।

भवन्मतेऽपि पुनरष्टसमयसाध्यके वलिसमुज्ञातदशायाञ्चतुर्दशरज्ज्वात्मकलोकव्यापित्वेनात्मनः सर्वव्यापित्वं सिद्धमेवेति कुतोऽव्यापकत्वमचेतनत्वञ्चात्मन इति मुहुर्मुहुर्विचार्यमेव।

अपि च कायप्रमाणत्वमात्मन इति विचारो न समीचीनो यतः किन्तत्परिमाणपरित्यागात्तदपरित्यागाद्वा स्यात्? आद्ये शरीरवत्तस्यानित्यत्वप्रसङ्गात्परलोकाभावानुषङ्गः स्यात्। अपरस्मिन् कल्पे पूर्वपरिमाणापरित्यागे शरीरवत्तस्योत्तरपरिमाणोत्पत्त्यनुपपत्तिप्रसङ्गः स्यादत असमीचीनः पक्षोऽयमबोध्यः। विफणावस्थोत्पादे सर्पवदिति दृष्टान्तस्तु सर्वथाऽकिञ्चित्करः यतस्तत्र नावस्थापरिमाणपरित्यागः येन दृष्टान्तः समीचीनः स्यात्–अतो दृष्टान्ताभावोऽयमिति। किञ्चात्मनः कायप्रमाणत्वे तत्खण्डने तस्यापि खण्डनप्रसङ्गो दुर्निवारः स्यात्। नच शरीसम्बद्धात्मप्रदेशेभ्यो हि कतिपयात्मप्रदेशानां खण्डितशरीरप्रदेशेऽवस्थानादात्मनोऽपि खण्डनङ्कथञ्चिदिष्टमेव का हानिरन्यथा शरीरात्पृथग्भूतावयवस्य कम्पोपलब्धिर्न स्यादिति वाच्यम्, खण्डितावयवानुप्रविष्टस्यात्मप्रदेशस्य पृथगात्मत्वप्रसङ्गात्। अर्थात् तस्यापि यदि खण्डनमिष्टन्तदात्मनः शरीरात्पृथक् कथन्नास्तित्वमिति चिन्त्यम्। सति च स्वीकृते खण्डने शरीरादिजडीभूतपदार्थवत्तस्याप्यनित्यत्वापत्तिः प्रसज्येत। सति चानित्यत्वे भवन्मते नित्यानित्यपदार्थविचारकसिद्धान्त एव भज्येत—इति "विनायकम्प्रकुर्वाणो रचयामास वानरमिति" विषयः समागतः।

अपि च खण्डितावयवयोस्संघट्टनं पश्चात् कथं स्यादिति विचारणीयम्। नचादृष्टवशादेव पश्चात्संघट्टनं स्यादेवेति को दोष इति वाच्यम्, तव मतेऽदृष्टस्याधिष्ठानाभावेन निराधारत्वप्रसङ्गात्। अयम्भावः—अदृष्टञ्च सुखदुःखोभयकारकन्धर्माधर्मविशेष एव। तयोरधिष्ठानमात्मैव भवति। किन्तु भवता तस्याप्यनित्यत्वमङ्गीक्रियते, इति भवदुक्तोऽदृष्टविशेषः कुत्र संस्तिष्ठेत्। अतः स्वयन्तर्कविचारसरणिमापद्यमानो जैनाचार्यः स्वयमेवोपहास्यास्पदो भवतीति महद्विचित्रम्।

इति स्याद्वादमञ्जर्युक्तस्य नवमकारिकयोक्ताक्षेपस्य परिहारः समाप्तः।

———

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चतुर्दशनिरुक्तानां तत्कर्तॄणाञ्च स्वरूपविवेचनम्

श्रीकेशवप्रसादमिश्र

परमात्मनो निश्वासभूता वेदा इति ह्युक्तं बृहदारण्यकोपनिषदि २, ४, १०. "अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वणो वेद इति। तेषां वेदानां पृथक् पृथक् कुलक्रमागतशाखानामध्ययनं श्रूयते—

पारम्पर्यागतो येषां वेदः सपरिबृंहणः ॥
तच्छाखं कर्म कुर्वीत तच्छाखाध्ययनन्तथा ॥

अध्ययनपरम्परया शिष्यपरम्परया वा चतुर्णां वेदानामेकत्रिंशदधिकैकादश शाखाः (११३१) अभवन्निति पतञ्जलिराहमहाभाष्ये एकविंशतिधा बाहूवृच्यम्, यजुरेकशतम्, सहस्रवर्त्मा सामवेदः, नवधाथर्वणो वेदः। तासु शाखासु ह्येकशाखासम्बद्धा बहवो ग्रन्था भवन्ति यथा—प्रतिशाखं—१ संहिता २ ब्राह्मणम् ३ आरण्यकम् ४ उपनिषत् (इत्येते चत्वारो ग्रन्था वेदा इत्यभिधीयन्ते "मन्त्रब्राह्मणयोर्वेदनामधेयम्" आप० श्रौ० सू० २४।१।३१) ५ शिक्षा ६ श्रौतसूत्रम् ७ गृह्यसूत्रम् ८ धर्मसूत्रम् ९ शुल्बसूत्रम् १० प्रातिशाख्यम् ११ निरुक्तम् १२ छन्दः १३ ज्योतिषम्। यद्येकस्याः शाखाया त्रयोदश ग्रन्थास्तदा सर्वशाखीयग्रन्थानां संख्या पञ्चदशसहस्रमिता जायते। विपुलो हि वैदिकग्रन्थसमुदाय आसीत्। हन्त! नाद्य ते ग्रन्था साकल्यरूपेणोपलभ्यन्ते।

तत्रेदम्विचार्यते निरुक्तं प्रतिशाखीयमासीत्, न वा। आसीत् कस्मिँश्चित्काले प्रतिशाखीयमेतत् परं न कुत्रापि प्रमाणमुपलभे।

यास्ककृतनिरुक्तटीकायां १ अ. १३ खण्डे श्रीदुर्गाचार्याः—वेदाङ्गानामेकैकमनेकप्रभेदम्, तद्यथा, "निरुक्तं चतुर्दश प्रभेदम्"। इत्यनेन ज्ञायते यद् दुर्गाचार्यकाले निरुक्तानां संख्या चतुर्दश आसीत्। तत्र कानि चतुर्दशनिरुक्तानि, के च तेषां कर्तार इति न कुत्रापि कैश्चित् निर्णीतम्। नाद्य तानि निरुक्तानि सन्ति, केवलमेकमेव यास्ककृतनिरुक्तमुपलभ्यते। तत्रैव चतुर्दशनिरुक्तानामुद्धरणभूता तत्त्वांशा विद्यन्ते। तच्चतन्निरुक्तानुशीलनेनैव स्पष्टीभवति। यास्कनिरुक्ते बहूनामाचार्याणामृषीणाञ्च नामानि सन्ति। तेषु के निरुक्तकाराः सन्ति के च न सन्ति, इति सुस्पष्टं भविष्यति। तत्रैव यास्कस्यापि नाम दीयते। अक्षरक्रमानुसारमेतत्—१ आग्रायणः। २ औदुम्बरायणः। ३ औपमन्यवः। ४ और्णवाभः। ५ कात्थक्यः। ६ क्रौष्टुकिः। ७ गार्ग्यः। ८ गालवः। ९ तैटीकिः। १० यास्कः। ११ वार्ष्यायणिः। १२ शतवलाक्षमौद्गल्यः। १३ शाकपूणिः। १४ स्थौलाष्टीविः। १५ कौत्सः। १६ चर्मशिराः। १७ परुच्छेपः। १८ पारस्करः। १९

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भारद्वाजः। २० भूतांशः काश्यपः। २१ मुद्गल भार्म्यश्वः। २२ शाकटायनः। २३ शाकपूणि-पुत्रः। २४ शाकल्यः। तत्रेदं विविच्यते यदेतेषु चतुर्विंशतिसंख्याकेषु के निरुक्तकारा आसन्। क्रमशश्चचतुर्दशसंख्यापरिगणिताश्चतुर्दश निरुक्तकारा आसन्। शेषा दश कौत्सादिशाकल्यान्ता न निरुक्तकाराः। एतेषां विषये निर्णयस्तु ह्यन्यलेखविषयः, अतोऽत्र चतुर्दशनिरुक्तानां तत्कर्तॄणाञ्च स्वरूप-विवेचनं क्रमशः क्रियते।

आग्रायणनिरुक्तम्

तत्र सर्वप्रथममस्य नाम्नः सिद्धिर्यथा—अग्रशब्दात्-नडादिभ्यः फक् पा० ४–१–९९ इति सूत्रेण फक् प्रत्यये तस्यायनि कृते स्वरूपसिद्धिः। पा० सूत्रे ४।१।१०२ शरद्वच्छुनकदर्भाद् भृगुवत्सा-ग्रायणेषु। अस्मिन् सूत्रे ह्यस्य नामायातम्। अनेन सूत्रेण फक् प्रत्ययो भवति दर्भशब्दात् यदि स आग्रायणश्चेत्। दार्भायण आग्रायणश्चेत्। दार्भिरन्यः। अस्य नाम अथर्वप्रायश्चित्ते ६.३ आयातम्, तथा बौधायनश्रौतप्रवरेऽपि पठ्यते २३.३।

वेदाङ्गेष्वस्यान्यत्र न कुत्रापि नामोपलभ्यते-यास्कीयनिरुक्तं विना। यास्ककृतनिरुक्ते आग्रायणनिरुक्तस्य यत्तत्वं तदधश्चिन्त्यते—निरुक्ते १. ९. **अक्षण्वन्तः कर्णवन्त** इति मन्त्रस्य व्याख्यानप्रसङ्गे यास्कोऽनुवदति मन्त्रम्—अक्षिमन्तः कर्णवन्त इति। तत्राक्षिपदस्य व्युत्पत्ति-मिच्छन्यास्को वदति—**अक्षिचष्टेः**, पश्यत्यर्थस्य दृश्यते ह्यनेन। तस्यामेवर्चि "अनक्तेरित्याग्रायणो वदति। **तस्मादेते व्यक्ततरे इव भवत** इति ब्राम्हणग्रन्थेनावगम्यते, इत्यनेन ज्ञायते यदयं ब्राम्हणगतनिर्वचनानां भूयस्त्वेन ग्रहीता। कर्णः कृन्ततेर्निकृत्तद्वारो भवतीति यास्कः, परञ्च ऋच्छतेरित्याग्रायणः, ऋच्छन्तीव खे उदगन्तामिति ब्राह्मणेन ज्ञायते।

तत्र अक्षि चष्टेः, चक्षिङ्धातोः क्सिरौणादिकः, चकारलोपे "अक्षि" रूपं जायते। पृषोदरादि-त्वात्। आग्रायणमतेन अञ्ज्धातोः क्सिरौणादिकः, अञ्ज् सि अक्षि रूपं जायते। अतस्ते व्यक्ततरे भवतोऽन्येभ्योऽङ्गेभ्यः। कर्णः, कृन्तधातोः, अन्, गुणे पृषोदरादित्वात् तस्य नः। आग्रायणमतेन, ऋच्छ धातोः कर्णावेतौ ऋच्छन्तीव खे भवन्ति शब्दग्रहणाय। ऋच्छ्+नः=ऋक्+नः, क्+ऋ नः= कृ+नः=कर्णः॥

निरुक्तस्य षष्ठेऽध्याये "ताँ अध्वर उशतो यक्ष्यग्ने श्रुष्टी भगंनासत्या पुरन्धिम्"॥ इति ५-४. ६. ४. ऋग्व्याख्यानप्रसङ्गे नासत्यैचाश्विनाविति यास्कः। सत्यावेव नासत्यावित्यौर्णवाभ आचार्यो मन्यते। अश्विनौ सत्यमेव ब्रूतो न कदाचिदप्यसत्यम्। **सत्यस्य प्रणेतारावित्याग्रायणः** सत्यस्य-उदकस्य यज्ञस्य वा प्रणेतारावित्याग्रायणो मन्यते। ऋतुसन्धिषु वै व्याधिर्जायते—अथर्व सं. । अतो व्याधेश्शमनाय यज्ञस्येमे प्रणेतारावित्युच्येते। यथार्त्विग्यजमानस्य रोगशान्ति-माचरति यज्ञद्वारा तथैवाश्विनावपि देवानामृत्विजौ। यथा अश्विनावध्वर्यू ऐ. ब्रा. १।१८। श. ब्रा. १-१-२-१७॥ ३-९-४-३। तै. ३-२-२-१। गोपथ उ०-२-६। एतेनानुमीयते यत्तस्य निरुक्तं ब्राह्मणेभ्य उद्धृतमासीत्॥ दशमेऽध्याये इन्द्रपदव्युत्पत्तिविषये यास्कः, इन्द्रइरां-दृणातीति वेरां ददातीति वेरां दधातीति वेरां दारयत इति वेरां धारयत इति वेन्दवे द्रवतीति वेन्दौ रमत इति वेन्धे भूतानीति वा। तद्यदेनं प्राणैः समैन्धँस्तदिन्द्रस्येन्द्रत्वम् इति विज्ञायते। इदं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

करणादित्याग्रायण आचार्यो मन्यते। इदं सर्वमकरोदसाविन्द्रः। यो ह खलु वाव प्रजापतिः स उ वेवेन्द्रः तै. १-२-२-५। तस्मादाहेन्द्रो ब्रह्मेति कौ. ६।१४॥ यत्परं भाः प्रजापतिर्वा स इन्द्रो वा श. २-३-१-७। तदित्थम् आग्रायणस्य त्रिषु स्थानेषु निरुक्ते उद्धरणं दत्तं यास्केन।

औदुम्बरायणनिरुक्तम्

अस्य नाम्नो निरुक्तिः—औदुम्बरस्य गोत्रापत्यमौदुम्बरिः। औदुम्बरेरनन्तरापत्यमौदुम्बरायणः। औदुम्बरिरित्यत्र "अत इञ्" इत्यपत्ये इञ्, वृद्धिः। यञिञोश्च इति यूनि फक्। औदुम्बरायणः। आथर्वणपरिशिष्टे चरणव्यूहे च पठ्यते—ऋग्वेदसप्तशाखासु औदुम्बरा एका शाखा।

परिचयः—पाणिनीयगणपाठे ४-१-९९ नडादिगणे तथा ४।२।५३ राजन्यादिगणे उदुम्बरशब्दपाठः। भागवते तृतीयस्कन्धे—

"वैखानसा वालखिल्यौदुम्बरा फेनपावने।
न्यासे कुटीचकः पूर्वं बह्वोदो हंसनिष्क्रियौ"॥ ३-१२-४३।

बोधायनश्रौतप्रवरेऽपि ३५-२ ह्यस्य नाम दृश्यते।

अस्य निरुक्तस्वरूपम्—औदुम्बरायणो भाषाया वैज्ञानिकपक्षतां मन्यते। निरुक्ते १।१ "इन्द्रियनित्यं वचनमौदुम्बरायणः"। तत्र चतुष्ट्वं नोपपद्यते। अयुगपदुत्पन्नानां वा शब्दानामितरेतरोपदेशः, शास्त्रकृतो योगश्च। या. १।२। एतत्पदचतुष्टयं यदुच्यते तस्य स्थितिरेव नहि, वचनानित्यत्वात्। इन्द्र आत्मा, तस्य इदं करणं यदिन्द्रियम्। यद्वचनं तत् इन्द्रिये वाग्रूपे नित्यं न ततः परमाशुविनाशित्वात्, इति औदुम्बरायणाचार्यो निरुक्तकृन्मन्यते। नहि विनष्टाविनष्टयोः पदयोस्सह परिसंख्यानमस्ति। अयुगपदुत्पन्नानां शब्दानामितरेतरोपदेश इतरेतरगुणप्रधानभावो नाम्न आख्यातं प्रतिगुणभावेनोपदेशः। आख्यातस्य च नाम प्रति प्रधानभावेनोपदेशोऽयं नोपपद्यते। शब्दानां योगः, शास्त्रदृष्टो यथा उपसर्गस्य धातुना, धातोः प्रत्ययेन एतत्सर्वं वचनानित्यत्वान्नोपपद्यते। अयुगपदुत्पत्तौ हि सत्यां धातुरुच्चरितो विनष्टः स कथमुपसर्गेण योक्ष्यते। अत औदुम्बरायणस्य मते वचनानित्यत्वम्।

औपमन्यवनिरुक्तम्

अस्य नाम्नो निरुक्तिः—अनृष्यानन्तर्ये बिदादिभ्योऽञ् पा. ४।१।१०४ अत्रोपमन्यु शब्दः, उपरतमन्युरुपमन्युस्तस्यापत्यमौपमन्यवः। अपत्यार्थेऽण् ओर्गुणः।

परिचयः—बौधायन श्रौतप्रवरे ४७-१-६ ह्यस्य नामायातम्। तथा बौधायनश्रौतसूत्रे बहुवारं समायातम्। तत्रायमाचार्यरूपेण स्मृतः।

ब्रह्माण्डे—पृथोः सुतायां संभूतः पुत्रस्तस्याभवद् वसुः।
उपमन्युः सुतस्तस्य यस्येमे ह्यौपमन्यवः। ३।८।९८॥

एतेनेदं ज्ञायते पृथोः पुत्रः वसुः, तस्य पुत्रः उपमन्युः, तस्य पुत्रः औपमन्यव इति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वायुपुराणे—१०-६-३९ आत्रेयंचाप्यङ्गिरसमौपमन्युं महाव्रतम् ।
गोकर्णं च गुहावासं शिखण्डिनमुमाव्रतम् ।।

ब्रह्मा मानसानृत्विजोऽसृजत्, येषाम्मध्येऽयमौपमन्युर्वर्तते ।।

मात्स्ये—प्रलम्बायनाश्चऋषय औपमन्यव एव च ।
सांख्यायनाश्च ऋषयस्तथा वै वेदशेरकाः ।। २००।११ ।।

अस्य (त्र्यार्षेयः प्रवरः) भर्गीवसुर्वसिष्ठश्च इन्द्रप्रमदिरेव च ।।

चरणव्यूहे तु—चरकाणां ये द्वादशभेदा तेष्वेका औपमन्यवशाखास्ति ।

हिरण्यकेशिश्रौतसूत्रे—वसिष्ठगोत्रप्रवरकाण्डे वसिष्ठप्रवरगणनायां उपमन्युविषये —अथोपमन्यूनां त्र्यार्षेयो वासिष्ठैन्द्र प्रमदाभरद्वसो इति । आभरद्वसुवदिन्द्रप्रमदवत् वसिष्ठवदिति । २१-३-१४ । अर्थात् वसिष्ठगोत्रे उपमन्यूनां त्र्यार्षेयः प्रवरो भवति, वासिष्ठइन्द्रप्रमद आभरद्वसो इति ।

आश्वलायन श्रौतसूत्रे—वासिष्ठेति वसिष्ठानां येऽन्य उपमन्युपराशरकुण्डिनेभ्यः । उपमन्यूनां वासिष्ठाभरद्वस्विन्द्रप्रमदेति । अर्थात् उपमन्युपराशरकुण्डिनातिरिक्ता वासिष्ठास्तेषामयं प्रवरः एकार्षेयः वासिष्ठ इति । परम् उपमन्यूनां वासिष्ठाभरद्वस्विन्द्रप्रमदेति ।

शतपथ ब्राह्मणे—१०-६-१-६ अथ होवाच महाशालञ्जाबालम् । औपमन्यवकन्त्वं वैश्वानरं वेत्थेत्याकाशमेव राजन्निति होवाचोमिति होवाचैष वै बहुलो वैश्वानर एतं हि वै त्वं बहुलं वैश्वानरं वेत्थ तस्मात्त्वं बहुः प्रजया पशुभिरिति यो वा एतं बहुलं वैश्वानरं वेदापपुनर्मृत्युञ्जयति सर्वमायुरेत्यात्मा वा एष वैश्वानरस्यात्मा त्वाहास्यत् यदि ह नागमिष्य इत्यात्मातेऽविदितोऽभविष्यत् यदि ह नागमिष्य इति वा ।। ६ ।। अश्वपतिः कैकेयो राजा पृच्छत्येतं प्रति-अत्र महाशालञ्जाबालमिति । अयमौपमन्यवो महाशालः, अर्थात् "महाशालाः श्रोत्रियाः" इत्युच्यते-अस्यापरं नाम जाबाल इति ।।

छान्दोग्योपनिषदि ५-११-१। प्राचीनशाल औपमन्यवः सत्ययज्ञः पौलुषिरिन्द्रद्युम्नो भाल्लवेयो जनः शार्कराक्ष्यो बुडिल आश्वतराश्विस्ते हैते महाशाला महाश्रोत्रियाः समेत्य मीमांसांचक्रुः को न आत्मा किं ब्रह्मेति । ते उद्दालकेनारुणिना सह अश्वपतिं कैकेयं जग्मुः वैश्वानरविद्याप्राप्तये । छा. उ. ५-११-२। अश्वपतिः पृच्छति औपमन्यव कं त्वमात्मनमुपास्से इति दिवमेव भगवो राजन्निति होवाचैष वै सुतेजा आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्तव सुतंप्रसुतमासुतं कुले दृश्यते ।।

बृहद्देवतायां ७-६९ । मनुष्या पितरो देवा गन्धर्वोरग राक्षसाः ।
गन्धर्वा पितरो देवा असुरा यक्षराक्षसाः ।।६९।।
यास्कौपमन्यवा वेतानाहतुः पञ्चवैजनान् ।।

अत्र गन्धर्वा पितरो देवा असुरा रक्षांसि, एत एव पञ्चजना औपमन्यव मतेनोच्यन्ते ।

१. निरुक्तात्—१-१ । "ते निगन्तव एव सन्तो निगमनान्निघण्टव उच्यन्त इत्यौपमन्यवः" । ते समाम्नाता गवादयः अर्थनिगमयितृत्वात् निगन्तव एते निगमनात् निघण्टव उच्यन्त इत्यौपमन्यवाचार्यस्य मतम् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२. नि. २-२। "दमनादित्यौपमन्यवः" आशयः एकपदतद्धितोदाहरणे दण्ड्यः पुरुष इति तत्र दण्ड्यः, दण्डमर्हतीति वा दण्डेन सम्पद्यत इति वा दण्डो ददतेर्धारयतिकर्मणः। अक्रूरो ददते मणिमित्यभिभाषन्ते। औपमन्यव आचार्यस्तु दमनाद् दण्ड इति मन्यते। दण्डमस्मै दीयत इति। दण्डमस्याकर्षतेति गर्हायाम्।

३. पर्ववति भास्वतीत्यौपमन्यवः २-६। आदित्योऽपि गौरुच्यते, इति प्रसङ्गे उद्धृते "उताद: परुषे गवि" इति मन्त्रे "परुषे" पदनिर्वचने (पर्ववति पर्वभिस्तद्वति अथवा भासा तद्वति) अहोरात्रादि पर्व तद्वति, इति औपमन्यवः तदेव पर्ववद्वा भासद्वा इत्यौपमन्यव आचार्यो मन्यते।

४. "ऋषिर्दर्शनात्" स्तोमान्ददर्शेत्यौपमन्यवः २-११। मन्त्राः स्तोमास्तानसौ तारकेण ज्ञानेन ददर्श—पश्यति, इत्यौपमन्यवो मन्यते।

५. चत्वारो वर्णा निषादः पञ्चम इत्यौपमन्यवः।३।८।

६. ऋषिः कुत्सो भवति, कर्तास्तोमानामित्यौपमन्यवः ३।११। वज्रनामसु कुत्सशब्दः कृन्ततेः सिद्ध्यति। ऋषिरपि कुत्सो भवति। कर्तास्तोमानामित्यौपमन्यव आचार्यो मन्यते। सोऽपि ऋषिः स्वस्तोमेनेन्द्रं तुष्टाव। तुष्टः सः शुष्णं जघान। अतः सोऽपि वधार्थक एव धातुः।

७. न शब्दानुकृतिर्विद्यत इत्यौपमन्यवः। ३।१८। काक इति शब्दानुकृतिः। तदिदं शकुनिषु बहुलम्। शकुनिनामसु शब्दानुकृतिर्नास्तीत्यौपमन्यव आचार्यो मन्यते। हंसादिषु न तथा नाम। काकः अपकालयितव्यो भवति। अपसारयितव्यो भवति।

८. बहुकृष्णाजिन इत्यौपमन्यवः ३।१९।। यज्ञपदनिर्वचनप्रसङ्गे यास्कः—याच्यो भवतीति वा। यजुर्भिरुन्नो भवतीति वा। बहुकृष्णाजिनः, अर्थात् यज्ञे कृष्णाजिनानां बाहुल्यं भवत्यतो यज्ञ इत्यौपमन्यव आचार्यो मन्यते।

९.–शिपिविष्टो–विष्णुरिति विष्णोर्द्वे नामनी भवतः इति यास्कस्य मतम्। कुत्सितार्थीयं पूर्वं भवतीत्यौपमन्यवः। ५.७। द्वयोर्नाम्नोः पूर्वं नाम शिपिविष्ट इति (शेप इव निर्वेष्टित इति।) कुत्सितार्थीयं भवतीति औपमन्यवस्याचार्यस्य मतम्।

१०. काणोऽविक्रान्तदर्शन इत्यौपमन्यवः ६.३०। अरायि काणे विकटे इति मन्त्रे काणे पदनिर्वचने काणः अविक्रान्तदर्शनः–अपूर्वदर्शनः–कान्तिर्वास्यादणूभावकर्मणः। कणतिः शब्दाणूभावे भाष्यते। अनुकणतीति मात्राणुभावात्कणः दर्शनाणूभावात्काण इति औपमन्यवस्याचार्यस्य मतम्।

११. विकटो विक्रान्तगतिरित्यौपमन्यवः, ६.३०। कुटतेर्वा स्यात् विपरीतस्य विकुटितो भवति। विक्रान्तगतिः विकृतगतिः, विकुटितः कुब्जीभूत इति, औपमन्यव आचार्यो मन्यते।

१२. इदं दर्शनादित्यौपमन्यवः। १०। ८। इन्द्रपदनिर्वचने, इदमसावद्राक्षीत् सर्वमिति इदंदर्शी सन् इन्द्रः इति औपमन्यव आचार्यो मन्यते। एतानि द्वादशोद्धरणानि निरुक्तेऽस्योपलभ्यन्ते।।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

और्णवाभनिरुक्तम्

अस्य परिचयः—ऊर्णवाभिवंशजोऽयम्। अथवा तस्य सन्ततिरस्ति। बृहदारण्यकोपनिषदि और्णवाभाः कौण्डिन्यात् १४.४.३.२६ अर्थात् कौण्डिन्यशिष्योऽयमौर्णवाभः।

बृहद्देवतायाम्—परस्याः प्रथमौ पादौ सौर्यौ चान्द्रमसौ परौ।
और्णवाभो द्वृचे तस्मिन् अश्विनौ मन्यते स्तुतौ॥

७-१२५।

अत्र द्वृचे सूक्ते "अश्विनौ" इति तत्र परस्या ऋचः प्रथमद्वितीयपादौ सूर्यदेवताकौ तृतीयचतुर्थौ चान्द्रमसौ चन्द्रदेवताकौ भवतः। एतच्च और्णवाभाचार्यस्य मतम्। तत्रायं हेतुः-सूर्याचन्द्रमसावेवाश्विनौ यतस्ताविव प्राणापानौ, ताविवाहोरात्रौ तथा रोदसी तावेव लोकान् ज्योतिषा रसेन चाश्नुवाते। अस्य नाम शुक्ल यजुर्वेदानुक्रमणिकायामपि पठ्यते।

१. निरुक्तात्—द्वितीयेऽध्याये नदीनामनिर्वचने "इन्द्रो अस्माँ" इति मन्त्रे, तस्य वयं प्रसवे याम उर्वीरित्यत्र उर्वीपदव्याख्याने उर्व्य ऊर्णोतेर्वृणोतेरित्यौर्णवाभः, उर्व्य इति ऊर्णुधातोस्तथा वृञ्धातोर्निष्पद्यते। तत्र ऊर्णोतेरिति यास्कस्य मतम्। वृणोतेरिति और्णवाभस्य मतम्।

२. षष्ठेऽध्याये श्रुष्टीति पदनिर्वचने उदाहृते मन्त्रे "ताँ अध्वर उशतोयक्ष्यग्ने श्रुष्टी भगं नासत्या पुरन्धिम्" मन्त्रस्य नासत्या इति पदव्याख्याने "सत्यावेव नासत्या इत्यौर्णवाभः अर्थात् यत्र नहि सत्यं तदसत्यम्, न असत्यं ययोस्तौ नासत्याविति। अत एव तौ सत्यावेव सत्यस्वरूपावेव स्तः। अत्रान्यत्प्रमाणम्। तद्यौ ह वा इमौ पुरुषाविवाक्ष्योः एतावेवाश्विनौ। श. १२-९-१-१२

३. सप्तमाध्याये अग्निदेवतापदनिर्वचनप्रसङ्गे उद्धृते "अग्निमीळे" इति मन्त्रे "होतारमिति" पदस्य यास्कमतेन ह्वातारमित्यर्थः सम्पद्यते। परं ह्यौर्णवाभस्य मतेन "जुहोतेर्होता" इति "हु दानादनयोः" इत्यस्माद् धातोर्यतः "अग्निर्वै देवानां होता" ऐ. ब्रा. १-२८।३-१४॥ इत्यनेनानुमीयते यदस्याचार्यस्यनिर्वचनतत्त्वं ब्राह्मणगतनिर्वचनतत्त्वेऽवतिष्ठते। "अग्निर्होता पञ्च होतॄणाम्" तै. ब्रा. ३-१२-५-२। तस्य यज्ञस्याग्निर्होतासीत्। गो. पू. १-१३। यास्कमते "उभयं वा एतदग्निर्देवानां होता च दूतश्च"॥ श. ब्रा. १-४-५-४। "स हि देवानां दूत आसीत्"। श. ब्रा. १-४-१-३४। "अग्निरेव देवानां दूत आस" ३-५-१-२१ श. ब्रा.।

४. द्वादशाध्याये—"अश्वैरश्विनावित्यौर्णवाभः" अश्ववन्ता वश्विना इति। एतेनानुमीयते, यदिमावैतिहासिकौ यथा राजानौ पुण्यकृतावित्यैतिहासिकाः—इतिहासे ह्यौर्णवाभस्य मतं सङ्गच्छते। सूर्याचन्द्रमसावित्येके। यदुक्तं तत्तु बृहद्देवतोद्धृतांशतोऽवगन्तव्यम्।

५. द्वादशाध्याये पुनः विष्णुपदनिर्वचनप्रसङ्गे "त्रेधा निदधे पदम्" इत्यत्र पृथिव्यामन्तरिक्षे दिवीति त्रेधाभावाय पदं निधत्ते। तत्रैव समारोहणे विष्णुपदे गयशिरसीत्यौर्णवाभः, अर्थात् समारोहणे, उदयगिरावुद्यन्पदमेकं निधत्ते। विष्णुपदे मध्यन्दिने अन्तरिक्षे, गयशिरसि अस्तङ्गिराविति और्णवाभ आचार्यो मन्यते।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कात्थक्यनिरुक्तम्

अस्य नाम्नो निरुक्तिः—कत्थकस्य पुत्रः गर्गादिभ्यो यञ् पा. ४-१-१०५ कात्थक्यः।

बृहद्देवतायाम्—पराश्चतस्रो यत्रेति इन्द्रोलूखलयोः स्तुतिः।
मन्येते यास्ककात्थक्याव् इन्द्रस्येति तु भागुरिः।३-१००।

अत्र यत्रेति मन्त्रे यास्ककात्थक्यौ इन्द्रोलूखलयोः स्तुतिरिति मन्येते। भागुरिस्तु इन्द्रस्यैव मन्यते। अत्र कात्थक्यः स्मर्यते॥

अस्य सामवेदानुक्रमणिकायामपि नामोपलभ्यते। निरुक्तस्वरूपमस्य—

१. निरुक्ते—अष्टमेऽध्याये-आप्रीपदनिर्वचने सर्वप्रथममिध्मस्यैव निर्वचनम्। तत्र "समिद्धो अद्य मनुषो दुरोणे" इति मन्त्रे इध्म इज्यते इति यास्कस्य मतम्। "यज्ञेध्म" इति कात्थक्यः। यत इष्ट्यादौ समिधो यज इति प्रेषितो होता समिधः समिधो अग्न आज्यस्य व्यन्तु इति वषट्कारं करोति। तस्मात् यज्ञेध्म इति कात्थक्यमतं युक्तमेव। यज्ञे या समित् आधीयते सैव इध्मशब्देनाभिधीयते लिङ्गाभावात् प्रैषे समिद्भ्य इति श्रूयते।

२. तत्रैव—तनूनपादाज्यं भवतीति कात्थक्यः। नपादित्यनन्तरायाः प्रजाया नामधेयम् निर्णततमा भवति। गौरत्र तनूरुच्यते। तता अस्यां भोगाः। तस्याः पयो जायते। पयस आज्यं जायते।

३. नराशंसो यज्ञ इति कात्थक्यः। नरा अस्मिन् आसीनाः शंसन्ति। युक्तमेतत्। ह्यस्य प्रमाणम् ऐ. २-२४। द्विनाराशंसं प्रातस्सवनं द्विनाराशंसं माध्यन्दिनं सवनं सकृन्नाराशंसं तृतीयसवनमेष वै यज्ञो नराशंसपङ्क्तिः।

४. द्वार इति पदनिर्वचने "गृहद्वार इति कात्थक्यः। यतो यास्कमतेन द्वारो जवतेर्वा द्रवतेर्वा वारयतेर्वा। अतो गृहद्वार एव कात्थक्यो मन्यते। यतो "द्वार" इत्यस्यैवैतन्निर्वचनं भवितुमर्हति।

५. वनस्पतिनिर्वचनप्रसङ्गे, तत्को वनस्पतिः, "यूप" इति कात्थक्यः "अञ्जन्ति त्वा मध्वरे" अत्र मन्त्रे यूपो देवता।

६. नवमेऽध्याये—देवी जोष्ट्रीपदनिर्वचने—द्यावा पृथिव्याविति वाहोरात्रे इति वा यास्कमतम्। "सस्यं च समा चेति" कात्थक्यः।

७. देवी ऊर्जाहुती—पद निर्वचने-यास्कः-देव्या ऊर्जाहुवान्यौ द्यावा पृथिव्याविति वाहोरात्रे इति वा। सस्यञ्च समा चेति कात्थक्यो मनुते। एवं सप्तकृत्वोऽयं निरुक्ते पठ्यते॥

क्रौष्टुकिनिरुक्तम्।

परिचयः—बृहद्देवतायां-पराभिस्त्वेति पञ्चर्चे सोमेनेन्द्रः स्तुतः सदा॥ ४।१३६
सोमप्रधानामेतांतु क्रौष्टुकिर्मन्यते स्तुतिम्॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पराभिस्त्वेति पञ्चर्चे सोमेन सह इन्द्र स्तुत इति शौनकः। परमेतां स्तुतिं सोमप्रधानामर्थात् सोम एव देवता ह्यस्यामिति क्रौष्टुकिर्मन्यते। अत्र क्रौष्टुकेराचार्यस्य मतं निर्दिष्टम्। इत्थं निरुक्तकृदयम्।

छन्दश्शास्त्रे—स्कन्धोग्रीवी क्रौष्टुकेः। ३।२८॥ यदि द्वितीयः पादो जागतो भवति तथान्ये पादा गायत्रा तदा न्यङ्कुसारिणी नाम्नी बृहती भवति। क्रौष्टुकेराचार्यस्य मतेनेयमेवन्यङ्कुसारिणी स्कन्धोग्रीवी नाम छन्दो भवति। इत्थमयं छन्दश्शास्त्रज्ञः। बौधायनीये भारद्वाजगोत्रकाण्डे "भृष्टयो भृष्टुभिन्दयः क्रोष्टुकयः" इति श्रुतानां कौष्टुकीनां कश्चित् स्यात्। अथर्ववेदपरिशिष्टेऽस्य नाम समायातम्। क्रोष्टुकिरिति—अङ्गिरसः आर्षेयप्रवरोऽयं क्रौष्टुकिः।

मत्स्यपुराणे—उतथ्यो गौतमश्चैव तौलेयोऽभिजितस्तथा।

सार्धनेमिस्सलौगाक्षिः क्षीरः क्रौष्टिकिरेवचा १९। ६। ६॥

एतेनायं गोत्रकारो लक्ष्यते। अत्र कौष्टुकिरेव क्रौष्टिकिर्नाम्ना भविष्यति॥ पुराणेषुपाठभेदतः। वायुपुराणे—

वार्षायणिस्तु सामुद्रं शरावं चैव गालवः
ऊर्ध्ववेणीकृतं गार्ग्यः क्रोष्टुकिः परिमण्डलम्॥

अयमाशयः—अव्यक्तात्पृथिवीपद्ममुत्पन्नम्। यदब्जं वैष्णवं कार्यं ततस्तन्नाभितोऽभवत्। पद्माकारा समुत्पन्ना पृथिवी सवनद्रुमा। तत्र कर्णिकसंस्थानो मेरुर्वर्तते। तामेव कर्णिकामत्रिः शताश्रिं मेने। भृगुः सहस्राश्रिम् सावर्णिः अष्टाश्रिम्। भागुरिः चतुरस्रम्। वार्षायणिः सामुद्रम्। गालवः शरावम्। गार्ग्यः ऊर्ध्ववेणीकृतम्। क्रोष्टुकिः परिमण्डलं मेने।

निरुक्तम्— निरुक्तस्याष्टमेऽध्याये द्रविणोदाः पदनिर्वचनप्रसङ्गे यास्कः—क्रौष्टुकिमतं पूर्वपक्षत्वेन स्थापयति–तत्को द्रविणोदाः धनं द्रविणमुच्यते—अर्थिनोधनम्प्रति द्रवन्ति तथा बलं द्रविणं येन बलेन शत्रूनभिभवन्ति। तत्को द्रविणोदाः इन्द्र इति क्रौष्टुकिराचार्यो मन्यते। यत इन्द्रः परमैश्वर्यवान्। स धनं दातुं प्रभवति। तथा देवेषु बलिष्ठः तस्यैव च सर्वा बलकृतिः। ओजसं जातमुत मन्य एनम्। इति चाह। अथाप्यग्निं द्रविणोदसमाह। एष पुनरेतस्माज्जायते। "यो अश्मनोरन्तरग्निं जजान" इत्यपि निगमो भवति।

अथाप्यृतुयाजेषु द्राविणोदसाः प्रवादा भवन्ति। तेषां पुनः पात्रस्येन्द्रपानमिति भवति। अथाप्येनं सोमपानेन स्तौति। अथाप्याह "द्रविणोदाः पिबतु द्राविणोदसः" इति क्रौष्टुकिः पञ्चभिरुदाहरणैः समर्थयामास यदिन्द्र एव द्रविणोदाः। इदमेवोदाहरणं यास्ककृतनिरुक्ते क्रौष्टुकेराचार्यस्योपलभ्यते॥

गार्ग्यनिरुक्तम्।

नाम्नो निरुक्तिः—गर्गस्य युवापत्यं पुमान् गार्ग्यः। गर्गादिभ्यो यञ् ४-१-१०५ इति यञि। अस्य मतं पाणिनिः स्वसूत्रेषु निर्दिदेश। ओतो गार्ग्यस्य पा. ८।३।२० अस्यार्थः–ओकारात्परस्यपदान्तस्यालघुप्रयत्नस्ययकारस्य नित्यं लोपः स्यात्। अन्यस्मिन्नपि सूत्रे अड् गार्ग्यगालवयोः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पा. ७।३।९९। अयमाशयः हलादेः पितः सार्वधातुकस्याप्रक्तस्य अट् स्यात् गार्ग्यगालवयोर्मतेन। अन्यदपि नोदात्तस्वरितोदयमगार्ग्यकाश्यपगाल्वानाम् पा. ८।४।६७। अस्यार्थः-उदात्त परः स्वरितपरश्चानुदात्तः स्वरितो न स्यात्। गार्ग्यादिमते तु स्यादेव। इत्थं ह्यष्टाध्याय्यां त्रिकृत्वोऽस्य नामायातम्।

परिचयः—शाङ्खायनारण्यके—६।१। अथ ह वै गार्ग्यो बालाकिरनूचानः संस्पृष्ट आस। सोऽवसदुशीनरेषु स वसन्मत्स्येषु कुरुपाञ्चालेषु काशिविदेहेष्विति। स हाजातशत्रुं काश्यमाव्रज्योवाच ब्रह्म ते ब्रवाणीति तं होवाचाजातशत्रुः सहस्रं दद्मि त इत्येतस्यां वाचि जनको जनक इति वा उ जना धावन्तीति। अत्र प्रथमकण्डिकायामेतदुपलभ्यते यदस्य गार्ग्यस्य निवासः उशीनरेषु, मत्स्येषु, कुरु-पाञ्चालेषु काशिविदेहेषु आसीत्। स बलाकाया अपत्यं बालाकिरभवत्। गर्गवंश्यः, अनूचानः (अनुवचनसमर्थः) षड्भिरङ्गैः सहितस्य वेदस्याध्येता श्रौतयज्ञप्रयोगवित्। काशिराजानमुपगम्याजातशत्रु-नामानं तुभ्यं ब्रह्मोपदेशं करिष्यामीति। स एतस्मै सहस्रं गवां दद्मि इति ह्युवाच। एषाख्यायि-कात्रोपलभ्यते।

कौषीतक्युपनिषदि—४।१। शाङ्खायनारण्यकवत्पाठः।

शतपथब्राह्मणे—१४।५।१ दृप्तबालाकिर्हानूचानो गार्ग्य आस स होवाचाजातशत्रुङ्का-श्यम्ब्रह्म ते ब्रवाणीति। स होवाचाजातशत्रुः सहस्रमेतस्यां वाचि दद्मो जनको जनक इति वै जना धावन्तीति। एवं प्रथमकण्डिकातः चतुर्दशकण्डिकापर्यन्तं तथा षोडशकण्डिकायामस्य नामोपलभ्यते। दृप्तबालाकिः, दृप्तः ब्रह्मवित्त्वादेव गर्वितः। दृप्तश्चासौबालाकिश्च दृप्तबालाकिः, अनूचान आस।

तैत्तिरीयारण्यके—१।७।३ अपश्यमेतत्सूर्यमण्डलं परिवर्तमानम्। गार्ग्यः प्राणत्रातः। गच्छन्त महामेरुम्। एकं चाजहतम्। इदं तत्वं यत्पञ्चकर्णो वात्स्यायनः सप्तकर्णश्च प्लाक्षिः, एतौ द्वावृषी सप्तसूर्यान् दृष्टवन्तौ। तौ प्रति गार्ग्यो वदति यदहमष्टमं सूर्यमपश्यम्। अतो युवां महामेरुं गच्छन्तौ कश्यपं मा त्यजतम्। अयं गार्ग्योऽधिकज्ञानवान् सिद्धयति।

वंशब्राम्हणे—अस्य नाम स्थिरकगार्ग्य इति।

प्रश्नोपनिषदि—सौर्यायणी च गार्ग्यः, अन्ये च ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणा एव ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः ॥ १ । १ ॥ अथ हैनं सौर्यायणी गार्ग्यः पप्रच्छ भगवन्नेतस्मिन्पुरुषे कानि स्वपन्तीत्यादि + + + + ४ । १ । तस्मै स होवाच। यथा गार्ग्यमरीचयोऽर्कस्यास्तं गच्छतः सर्वा एतस्मिँस्तेजोमण्डल एकीभवन्ति ॥ ४ । २ ॥ एतेन ज्ञायते यदयं गार्ग्यः ब्रह्मान्वेषमाणः पिप्पलादं जगाम।

आश्वलायन श्रौतसूत्रे—१२ । १२ । २ । गर्गाणामाङ्गिरसब्रार्हस्पत्यभारद्वाजगार्ग्यशैन्येति आङ्गिरसशैन्यगार्ग्येति वा। अयमाशयः गर्गगोत्रीयाणां पञ्चप्रवरा भवन्ति तेषु गार्ग्योपि एकः प्रवर-स्तथा गर्गाणां त्रिप्रवरा अपि भवन्ति येषु गार्ग्य एकः प्रवरोऽस्ति।

कौषीतकगृह्यसूत्रे २ । ५ । ३ । आचार्यादितर्पणप्रसङ्गे ब्रह्मचारी सर्वांस्तर्पयेत्, तत्र गार्ग्य-मपि तर्पयामि इति लिखितम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बृहद्देवतायाम्—चतुर्भ्य इति तत्राहुर्यास्कगार्ग्यरथीतराः ।
आशिषोऽथार्थवैरूप्याद् वाचः कर्मण एव च ॥ १ । २६ ॥

कतिभ्यः कर्मभ्यो नाम जायत इति विचिकित्सायां नवभ्यो जायत इति बहूनां मतम् चतुर्भ्यः कर्मभ्यो नाम जायते, आशिषः, अर्थवैरूप्यात्, वाचः, कर्मणः, इति गार्ग्यस्य मतम्वर्तते ।

अयं गार्ग्यः अश्वशास्त्रस्य ज्ञातासीत् ।

भागवते—गर्गाच्छिनिस्ततो गार्ग्यः क्षत्राद् ब्रह्म ह्यवर्तत ।
दुरितक्षयो महावीर्यात् तस्य त्रय्यारुणिः कविः ।१०।२०।१९

एतेन ज्ञायते यत् गर्गात् शिनिरजायत । शिनेः पुत्रः गार्ग्यः । अयं क्षत्रिय आसीत्, तपसा ब्रह्म प्रत्यपद्यत ।

ब्रह्माण्डे—वेणुहोत्रसुतश्चापि गार्ग्यो वै नाम विश्रुतः ॥ ३।६७।७७॥ गार्ग्यस्य गर्गभूमिस्तु वंशो वत्सस्य धीमतः । ७८॥ एते काश्यपाः प्रोक्ताः । ब्राह्मणाः क्षत्रियास्त्वैव तयोः पुत्राः सुधार्मिकाः ॥ ७८ ॥ + + + + जगाम सरथो नाशं शापाद्गार्ग्यस्य धीमतः ॥ ३ । ६८ । २१ ॥ गार्ग्यस्य हि सुतं बालं स राजा जनमेजयः । दुर्बुद्धिर्हिंसयामास + लोहगन्धी नराधिपः । ३ । ६८ । २२

मात्स्ये—गार्गीयः (गार्ग्यः) भृगुवंशे (गोत्रे) अस्य आर्षेयः प्रवरोभवति । १९५ । ३८॥ तत्रैव गार्ग्यः पञ्चार्षेयः प्रवरेषु पठ्यते इत्युक्तम् ॥ १९६ । २३ ॥

तस्मिन्नेवाध्याये—तित्तिरिः कपिभूश्चैव गार्ग्यश्चैव महानृषिः ।
त्र्यार्षेयो हि मतस्तेषां सर्वेषां प्रवरः शुभः ॥

कुत्राप्यस्य त्र्यार्षेयोऽपि प्रवरो भवति ।

विष्णुपुराणे—३।४।२६ शिष्यः कालायनिर्गार्ग्यः तृतीयश्च कथाजवः ।
इत्येते बह्वृचा प्रोक्ता संहिता यैः प्रवर्तिताः ॥

एतेन ज्ञायते यदयं संहिताप्रवर्तकोऽभूत् । तत्रैव ४।१९।२३

गर्गाच्छिनिः ततश्च गार्ग्याः शैन्याः क्षत्रोपेता द्विजातयो बभूवुः अर्थात् ब्राह्मणा बभूवुः । तत्रैव ५।२३।१—५। गार्ग्यस्य श्यालो गार्ग्यं यदूनां सन्निधौ षण्ढ इत्युक्तवान्। तच्छ्रुत्वा यादवा जहसुः। क्रुद्धः स दक्षिणापथमेत्य सुतमिच्छन् लोहचूर्णं भक्षयित्वा संतुष्य महादेवं वराँल्लब्धवान् । सः कालयवनो ज्ञातः पुत्ररूपः । एषा कथात्र वर्ण्यते गार्ग्यविषये तस्य तपसो विशेषणमेवात्रावगम्यते ॥

वायुपुराणे—९२। ६३-६४ ब्रह्माण्डपुराणवत्पाठः ९३। २१ ब्रह्माण्डवत् ।

तत्रैव ३४ । ६३ । ऊर्ध्वं वेणीकृतं गार्ग्यः । स्पष्टार्थः क्रौष्टुकिनिरुक्ते द्रष्टव्यः ।

तत्रैव ५९ । ९८ गार्ग्यः अङ्गिरसगोत्रे प्रवरः मन्त्रकृच्च ।

तत्रैव ६५ । १०६ । अङ्गिरस गोत्रे जातः ।

तत्रैव २३ । १४४ । तत्रापि मम ते पुत्रा भविष्यन्ति महौजसः ।
पराशरश्च गार्ग्यश्च भार्गवो ह्यङ्गिरास्तथा ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

माहेश्वरावतारेऽस्य संभूतिः। नवमे परिवर्ते (द्वापरे) ऋभयो नामाहं भविष्यामीति महेश्वरोक्तिः। तत्रैव २३–२२३ अष्टाविंशे द्वापरे व्यासः पराशरसुतः।

तत्रापि मम ते पुत्राः भविष्यन्ति तपस्विनः।
कुशिकश्चैव गार्ग्यश्च मित्रको रुष्ट एव च॥

तत्रैव ९९ । १६१ भागवतपुराणवत्पाठः । कौशिकसूत्रे १७ । २७ । गार्ग्य कुर्युर्गामिति गार्ग्यपार्थश्रवसौ नेति भागलिः । पूर्वया कुर्वीतेति गार्ग्यपार्थश्रवसभागलिकाङ्क्षायनपरित्रभ्रवकौशिकजाटिकायन कौरुपथयः कौशिकसूत्रे ९ । १० । बृहस्पति प्रसूत इति मन्त्रेण अनुज्ञाप्य कुर्वीत । ॐ सवितृप्रसूतः भवानि इत्यनुज्ञातः

ऋग्वेदप्रातिशाख्ये—१ तस्मादन्यमवसाने तृतीयं गार्ग्यस्पर्शम् १ । १५

२ यमान्नासिक्यास्वरभक्तिरुत्तरा गार्ग्यस्य ६ । ३६

३. अनन्तरे त्रिक्रमकारणे, यदि । त्रिभिश्च गार्ग्यः पुनरेव च त्रिभिः ११।१७।

४. कृते तु गार्ग्यस्य पुनस्त्र्यभिक्रमे ११ । २६ ॥

५. समापाद्यं नाम वदन्ति षत्वं तथा णत्वं सामवशाँश्च सन्धीन्।

उपाचारं लक्षणतश्च सिद्धमाचार्या व्यालिशाकल्यगार्ग्याः ॥ ११ । ३१ इत्थं ऋग्वेदप्रातिशाख्ये गार्ग्यस्य पञ्चसु सूत्रेषु मतानि दर्शितानि ॥

वाजसनेयि प्रातिशाख्ये—ख्यातेः खयौ कशौ गार्ग्यः सक्ख्योक्ख्य मुक्ख्यवर्जम्। बह्वृचानां मेहना इत्येकं पदम्, छन्दोगानां त्रीण्येतानि पदानि म+इह+ना, इति। तदुभयं पश्यता भाष्यकारेणोभयोः शाकल्यगार्ग्ययोरभिप्रायावत्रानुविहितौ ॥ दुर्गवृत्ति ४।४। मेहना एकमिति शाकल्यः। त्रीणीति गार्ग्यः स्कन्द टीका ४।३। अत्र एव जातीयनिर्वचनोपप्रदर्शनार्थमुभयोश्च प्रामाण्यख्यापनार्थम्।

एतेन ज्ञायते यदयं सामपदकार असीत्।

चरक सूत्रस्थाने १।१० गार्ग्यनामोल्लेखो वर्तते।

हरिवंशे—शैशिरायण गार्ग्यः त्रिगर्तानां पुरोहित आसीत्। वाजसनेयिप्रातिशाख्ये उवटभाष्ये—

पुनरुक्तानि लुप्यन्ते पदानीत्याह शाकलः।
अलोप इति गार्ग्यस्य काण्वस्यार्थवशादिति॥

अयं पदपाठविषयकनियम उद्धृतः।

सुश्रुत टीकाकर्तुः डल्हणस्य मते गार्ग्यो धन्वन्तरिशिष्यः। प्रभृति ग्रहणात् निमिकाङ्कायन गार्ग्यगाल्वाः ॥१।३॥

गार्ग्यः-शालाक्य तन्त्ररचनां कृतवान्।

आपस्तम्बशुल्बसूत्रे एकः श्लोकः गार्ग्यस्य तक्षशास्त्रग्रन्थत उद्धृतः। अतस्सिद्ध्यति यदयं तक्षशास्त्रज्ञातासीत्।

महाभारते शान्तिपर्वणि २१०।२१ देवर्षिचरितस्य कर्ता गार्ग्य उक्तः "देवर्षिचरितं गार्ग्यः।" सामतन्त्रं तु गार्ग्येणेत्येव वयमुपादिष्टा प्रामाणिकैरिति सत्यव्रतः अक्षरतन्त्रे कथयति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निरुक्तम्--अत्र निरुक्ते १।३ गार्ग्यस्यमतमुत्तररूपत्वेन स्थापितं वर्तते। पूर्वपक्षीयः शाकटायनः कथयति यत् "न निर्बद्धा अर्थान्निराहुरिति शाकटायनः", अर्थात् उपसर्गा नामाख्यात-मध्यात् निष्कृष्य पृथक् रचिताः सन्तो नार्थमभिदधति। नामाख्यातयोस्तु अर्थात् आख्याते उपसर्गयोगतः अर्थवैशिष्ट्यं जायते। तस्मादनर्थका उपसर्गा इति।

उच्चावचाः पदार्था भवन्तीति गार्ग्यः—उपसर्गपदानामर्था बहुप्रकारा भवन्ति-नामा-ख्याताभ्यां वियुक्तानामपि उपसर्गाणामर्था भवन्ति यथा आ इत्यर्वागर्थे, प्रपरेत्येतस्यप्रातिलोम्यमभीत्याभि-मुख्यं प्रतीत्येतस्य प्रातिलोम्यमतिसु इत्यभिपूजितार्थे निर्दुरित्येतयोः प्रातिलोम्यं न्यवेति विनिग्रहार्थीया उदित्येतयोः प्रातिलोम्यं समित्येकीभावं व्यपेत्येतस्य प्रातिलोम्यमन्विति सादृश्यापरभावमपीतिसंसर्ग-मुपेत्युपजनं परीतिसर्वतोभावमधीत्युपरिभावमैश्वर्यं वैवमुच्चावचानर्थान्प्राहुस्त उपेक्षितव्याः।

अथ नाम्नामाख्यातजत्वविचारः--तत्र नामान्याख्यातजानीति शाकटायनो निरुक्त समयश्च। न सर्वाणीति गार्ग्यः वैयाकरणानां चैके गार्ग्यस्य मतं दीयते —तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां संविज्ञातानि तानि—यथा गौरश्वः पुरुषो हस्तीत्यथ चेत्सर्वाण्याख्यातजानि नामानिस्युर्यः कश्च तत्कर्म कुर्यात्सर्वं तत्सत्वं तथाचक्षीरन् यः कश्चाध्वानमश्नुवीताश्वः स वचनीयः स्यात्यत् किञ्चित् तृन्द्यात् तृणं तत्। अथापि चेत् सर्वाण्याख्यातजानि नामानिस्युर्यावद्भिः भावैः संप्रयुज्येत तावद्भयो नामधेय-प्रतिलम्भः स्यात्। तत्रैवं स्थूणा दरशया वा सञ्जनी च स्यात्। १। १२॥

अथापि य एषां न्यायवान् कार्मनामिकः संस्कारो यथा चापि प्रतीतार्थानि स्युस्तथैनान्याचक्षी-रन्पुरुषं पुरिशयइत्याचक्षीरन्नष्टेत्यश्वंतर्दनमिति तृणमथापि निष्पन्नेऽभिव्याहारेऽभि विचारयन्ति प्रथमात्पृ-थिवीत्याहुः क एनामप्रथयिष्यत् किमाधारश्चेति। अथानन्वितेऽर्थेऽप्रादेशिके विकारे पदेभ्यः पदेतरार्धा-न्संचस्कार शाकटायन एतेः कारितं च यकारादिं चान्तकरणमस्तेः शुद्धं च सकारादिञ्च। अथापि सत्व-पूर्वो भाव इत्याहुरपरस्मात् भावात् पूर्वस्य प्रदेशो नोपपद्यत इति तदेतन्नोपपद्यते। १। १३।

यदतत्तत्सदृशमिति गार्ग्यः ।३।१३।। उपमाया लक्षणं गार्ग्यमते, इत्थं वर्तते यत् किंचित् अर्थजातम् अतत् तद्भिन्नं सत् तत्सदृशं तत्समानरूपं च भवति सा उपमा। यथाऽनग्निः खद्योतोऽग्नि-सरूपश्च सोऽग्निनोपमीयते अग्निरिव खद्योत इति। एवमतत्स्वरूपेण गुणेन गुण सामान्यादुपमीयते इति गार्ग्य आचार्यो मन्यते। [क्रमशः]

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ पाणिनीयप्लुतविमर्शः ॥

श्रीकृष्णशास्त्री कानिटकरः

सन्ति खलु अत्र जगतीतले प्रचलिताः संख्यातुम् अपि दुष्कराः भाषोपभाषाः। यथाचोक्तमभियुक्तैः—

पिण्डे पिण्डे मतिर्भिन्ना, कुण्डे कुण्डे नवं पयः।
जातौ जातौ नवाचारो नवा वाणी मुखेमुखे ॥ इति

अपि च—जलं चतुर्षु क्रोशेषु, भाषा क्रोशेषु चाष्टसु।
वेषर्विंशतौ याति–भिन्नतां त्रिंशतिच्छदिः ॥

इत्यर्थकमस्ति आभाणकं हिन्दीभाषायाम् (चार कोसपर पानी बदले, आठ कोसपर बानी। बीस कोसपर पगड़ी बदले, तीस कोस पर छानी ॥ छानी = छप्पर)। भाषातत्त्वविदः पुनः प्रतिपादयन्ति यत् भूतले अर्बुदद्वयपरिमितानां जनानां द्विसहस्रसप्तशतषण्णवतिसंख्याः (२७९६) भाषाः सन्तीति।

भाषाणामीदृशे वैविध्येऽपि गण्यन्ते केचन भाषापरिवाराः ये स्वपरिवारस्थभाषासु परस्परं साम्यं विदधति। तेषु प्राचीनतया, बहुलसाहित्यवत्तया, बहुजनव्यवहारोपयोगितया च सर्वपरिवारातिशायी "भारतयूरोपीयः" नाम विश्रुतः भाषापरिवारः। एतस्मिन् परिवारे "संस्कृतभारती" एव प्राचीनतमा, ज्येष्ठा, श्रेष्ठा, प्रत्नतमसाहित्यरक्षिका भाषा अस्तीत्यत्र न वैमत्यं भाषातत्त्वविदाम्। मन्त्रद्रष्टारो महर्षयः संसारस्य आद्यज्ञानभारत्यां वर्णयन्ति भाषामिमाम् "देवीं वाचमजनयन्त देवाः" (ऋग्वेदः ८।१००।११) इति। इयमेव सुरभारती परस्सहस्रेभ्यः संवत्सरेभ्यः अविच्छिन्नधारया प्रवहन्ती अद्यापि भारतवर्षे परस्कोटीनां जनमनसां भावनात्मकमैक्यं साधयन्ती, समस्तभारतीयभाषाः सञ्जीवयन्ती विजयतेतराम् इत्यहो महदाश्चर्यम्!

यद्यपि संस्कृतभाषाशब्दाः नियतदेशे नियतस्वरूपेण व्यवहृता अभूवन् अल्पीयांसः एव प्राचीनकाले। यथा निर्दिष्टम्—यास्काचार्यैः "शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते, विकारमस्यार्येषु भाषन्ते शव इति" निरुक्ते (२।१।४), पाणिनिना प्राचाम्, उदीचाम् शब्दैः (अष्टाध्याय्याम् ८।२।८२, ४।१। १५३ इत्यादौ), पतञ्जलिना—शवतिर्गतिकर्मा (महाभाष्ये प्रथमाह्निके) इत्यादिना, तथापि काश्मीरदेशात् केरलदेशं यावत् संस्कृतस्य ऐकरूप्यमेव लभ्यते सर्वत्र। पञ्चशताधिकद्विसहस्रवत्सरेभ्यः प्राक् भगवता पाणिनिना तात्कालिकजनजीवनस्य प्रत्यङ्गमध्ययनादनन्तरम् अष्टाध्याय्यां सङ्कलितां महौघां सामग्रीं दृष्ट्वा एतन्नूनं निश्चीयते यत् पाणिनेः समये संस्कृतभाषायाः समस्तजनजीवनव्यवहारनिर्वाहकत्वमभूदिति। तत्र रात्रिन्दिवं सम्भाषणावसरे दूराह्वानप्रत्यभिवादनभर्त्सनादेः बहवो नियमाः पाणिनिना प्लुतविधिमुद्दिश्य एकत्र विन्यस्ताः। तेषां प्लुतविधायकसूत्राणां सूक्ष्मदर्शनेन संस्कृतभाषायाः सर्वजनव्यवहारभाषात्वं नूनं स्फुटीभविष्यति। तत्रादौ प्लुतसम्बन्धीनि सर्वाण्येव पाणिनिसूत्राणि वार्तिकपाठविवरणादिपूर्वकं संनिवेश्यन्ते प्लुतसूत्रसूचीपत्रके।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सूत्रक्रमाङ्कः	३२ प्लुतसम्बन्धिसूत्राणि, तत्सूत्रस्थानि ४१ वार्तिकानि च	अध्यायपादसूत्राङ्काः	प्लुतविषयसम्बद्धः सूत्रार्थः	सूत्रं—केवलवैदिकम् केवललौकिकम् लौकिकं वैदिकं चेत्युभयम् वा	भाष्यकृता व्याख्यातं न वा	नित्यं वैकल्पिकं वा
१	ऊकालोऽज्झ्रस्वदीर्घप्लुतः । (१) ह्रस्वादिषु समसंख्याप्रसिद्धिर्निर्देशवैषम्यात् (२) सिद्धं तु समसंख्यत्वात् (३) त्रयाणां हि विकारनिर्देशः (४) दीर्घप्लुतयोस्तु पूर्वसंज्ञाप्रसङ्गः (५) सिद्धं तु तपरनिर्देशात् (६) द्रुतादिषु चोक्तम् ।	१।२।२७	उ ३ इत्यत्र इव त्रिमात्रिकः स्वरः प्लुतसंज्ञकः भवति । यथा देवदत्त ३	उभयम्	व्याख्यातम्	नित्यम्
२	अतोरोरप्लुतादप्लुते । (१) अप्लुतादप्लुतवचनेऽकारहशोः समानपदे प्रतिषेधः (२) न वा बहिरङ्गलक्षणत्वात् ।	६।१।११३	प्लुतभिन्नह्रस्वाकारात् परस्य रुत्वरेफस्य उत्वं भवति प्लुतभिन्ने ह्रस्वे अकारे परे । यथा—छात्रोऽत्र ।	उभयम्	व्याख्यातम्	नित्यम्
३	प्लुतप्रगृह्या अचि नित्यम् (१) प्लुतप्रगृह्येष्वज्ग्रहणमनर्थकमधिकारात्सिद्धम् (२) तत्तु तस्मिन् प्रकृतिभावार्थम् (३) प्लुतप्रकृतिभाववचनं तु ज्ञापकमेकादेशात्प्लुतो विप्रतिषेधेनेति (४) एकादेशात्प्लुतोविप्रतिषेधेनेतिचेच्शालेन्द्रेऽतिप्रसङ्गः (५) न वा बहिरङ्गलक्षणत्वात् ।	६।१।१२५	स्वरे परतः प्लुतः कदापि सन्धिकार्यं न लभते । एहि कृष्ण ३ अत्र गौश्चरति ।	उभयम्	व्याख्यातम्	नित्यम्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सूत्रक्रमाङ्कः	३२ प्लुतसम्बन्धिसूत्राणि, तत्सूत्रस्थानि ४१ वार्तिकानि च	अध्यायपादसूत्राङ्काः	प्लुतविषयसम्बद्धः सूत्रार्थः	सूत्रं—केवलवैदिकम् केवललौकिकम् लौकिकं वैदिकं चेत्युभयम् वा	भाष्यकृता व्याख्यातं न वा	नित्यं वैकल्पिकं वा
४	अप्लुतवदुपस्थिते । (१) वद्वचनं प्लुतकार्यप्रतिषेधार्थम् (२) प्लुतप्रतिषेधे हि प्रगृह्यप्लुतप्रतिषेधप्रसङ्गोऽन्येन विहितत्वात् ।	६।१।१२९	अवैदिके इतिशब्दे परतः प्लुतः अप्लुत इव भवति, अर्थात् तत्र सन्धिकार्यं भवति । सुश्लोक ३ इति = सुश्लोकेति ।	केवललौकिकम्	व्याख्यातम्	नित्यम्
५	ई ३ चाक्रवर्मणस्य । (१) ई ३ चाक्रवर्मणस्येत्यनुपस्थितार्थम् ।	६।१।१३०	चाक्रवर्मणः नाम ऋषिः ईकारप्लुतमप्लुतमिव मन्यते । चिनुहि ३ इदम् = चिनुहीदम् ।	उभयम्	व्याख्यातम्	वैकल्पिकम्
६	वाक्यस्य टेः प्लुत उदात्तः । (१) वाक्याधिकारः पदनिवृत्त्यर्थः (२) टिग्रहणमलोऽन्त्यनियमे व्यञ्जनान्तार्थम् (३) सर्वादेशप्रसङ्गस्तु (४) उक्तं वा	८।२।८२	इतः पादसमाप्ति यावत् (१) वाक्यस्य (२) टेः (३) प्लुतः (४) उदात्तः इति चत्वारि पदानि प्रतिसूत्रम् उपतिष्ठन्ति ।	उभयम्	व्याख्यातम्	अधिकारः
७	प्रत्यभिवादेऽशूद्रे । (१) अशूद्रस्त्र्यसूयकेषु (२) भोराजन्यविशां वा	८।२।८३	शूद्रादन्यमभिवादयमानं प्रति प्रयुक्ते आशीर्वादादिवाक्ये टेः प्लुतो भवति । आयुष्मान् भव देवदत्त ३ ।	उभयम्	व्याख्यातम्	नित्यम्
८	दूराद्धूते च ।	८।२।८४	दूरस्थं कंचन सम्बोधयितुं प्रयुक्तस्य वाक्यस्य टेः प्लुतः ।	उभयम्	व्याख्यातम्	नित्यम्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

९	ऽहेप्रयोगे हैहयोः । (१) हैहेप्रयोगे हैहेग्रहणं हैहयोः प्लुत्यर्थम् (२) प्रयोगग्रहणमर्थवद्ग्रहणेऽनर्थकार्थम् (३) पुनर्हैहेग्रहण-मनन्त्यार्थम्	८।२।८५	दूरस्थं कंचन सम्बोधयितुं प्रयुक्तेवाक्ये उच्चारितयोः " है, हे " शब्दयोरेव प्लुतः ।	उभयम्	व्याख्यातम्	नित्यम्
१०	गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् । (१) गुरोः प्लुतविधाने लघोरन्त्यस्य प्लुत-प्रसङ्गोऽन्येन विहितत्वात् (२) नवानन्त्यस्यापीति वचनमुभयनिर्देशार्थम् (३) प्राग्वचनं विभाषार्थम् (४) प्राग्वचनानर्थक्यं चैकैकस्येति वचनात्	८।२।८६	दूरस्थं कंचन बोधयितुं प्रयुक्ते वाक्ये अन्त्यस्य संबोध्यमानार्थ-वाचकपदस्य टेः तथा ऋकार-भिन्नस्य अनन्त्यस्यापि गुरोः पर्यायेण प्राचां मते–(विकल्पेन) प्लुतो भवति ।	उभयम्	व्याख्यातम्	वकल्पिकम्
११	ओमभ्यादाने ।	८।२।८७	आरम्भद्योतकस्य " ओम् " इत्यस्य टेः प्लुतः ।	उभयम्	न व्याख्यातम्	नित्यम्
१२	ये यज्ञकर्मणि । (१) ये यज्ञकर्मणीत्यतिप्रसङ्गः (२) सिद्धं तु ये यजामह इति ब्रूह्यादिषूपसंख्यानात्	८।२।८८	यज्ञकर्मणि प्रयुक्तस्य " ये " इत्यस्य प्लुतः ।	केवलवैदिकम्	व्याख्यातम्	नित्यम्
१३	प्रणवष्टेः । (१) टिग्रहणं सर्वदिशार्थम्	८।२।८९	यज्ञकर्मणि प्रयुज्यमानस्य मन्त्रादेष्टेः त्रिमात्रः ओ इति ओम् इति वा भवति आदेशः ।	केवलवैदिकम्	व्याख्यातम्	नित्यम
१४	याज्यान्तः ।	८।२।९०	यज्ञकर्मणि " याज्या "संज्ञक-मन्त्राणामन्त्यस्य टेः प्लुतः ।	केवलवैदिकम्	व्याख्यातम्	नित्यम्
१५	ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः ।	८।२।९१	यज्ञे ब्रूहि, प्रेष्य, श्रौषड्, वौषट्, आवह " इत्येषामादेः प्लुतः ।	केवलवैदिकम्	न व्याख्यातम्	नित्यम्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सूत्रक्रमाङ्कः	३२ प्लुतसम्बधिसूत्राणि, तत्सूत्रस्थानि ४१ वार्तिकानि च	अध्यायपादसूत्राङ्काः	प्लुतविषयसम्बद्धः सूत्रार्थः	सूत्रं—केवलवैदिकम् केवललौकिकम् लौकिकं वैदिकं चेत्युभयम् वा	भाष्यकृता व्याख्यातं न वा	नित्यं वैकल्पिकं वा
१६	अग्नीत्प्रेषणे परस्य च । (१) अग्नीत्प्रेषण इत्यतिप्रसङ्गः (२) सिद्धं त्वोश्रावये परस्यचेतिवचनात् ,	८।२।९२	आग्नीध्रनामकमृत्विजं प्रति अध्वर्युणा प्रयुज्यमानस्य वाक्यस्य यदाद्याक्षरं, द्वितीयाक्षरं च तत्र प्लुतः ।	केवलवैदिकम्	व्याख्याततम्	नित्यम् केषांचिन्मते व्यवस्थित विभाषा।
१७	विभाषा पृष्टप्रतिवचने हेः ।	८।२।९३	प्रश्नस्योत्तरार्थं प्रयुक्तवाक्यस्थस्य "हि" इत्यस्य वा प्लुतः ।	उभयम्	न व्याख्यातम्	वैकल्पिकम्
१८	निगृह्यानुयोगे च ।	८।२।९४	वादिनं स्वमतात्प्रच्याव्यतन्मताविष्कारार्थं साम्यसूयंप्रयुक्तस्य वाक्यस्यटेः वा प्लुतः।	उभयम्	न व्याख्यातम्	वैकल्पिकम्
१९	आम्रेडितं भर्त्सने । (१) भर्त्सने पर्यायेण ।	८।२।९५	भर्त्सनद्योतकद्विर्वचने पूर्वपरभागयोः टेः प्लुतः ।	उभयम्	व्याख्यातम्	नित्यम्
२०	अङ्गयुक्तं तिङाकाङ्क्षम् ।	८।२।९६	अङ्ग इत्यनेन युक्तस्य साकांक्षतिङन्तस्यटेः प्लुतः भर्त्सने ।	उभयम्	न व्याख्यातम्	नित्यम्
२१	विचार्यमाणानाम् ।	८।२।९७	किंचन प्रष्टुं प्रयुक्तस्य वाक्यस्य टेः प्लुतः ।	केवलवैदिकम्	न व्याख्यातम्	नित्यम्
२२	पूर्वं तु भाषायाम् ।	८।२।९८	किञ्चन प्रष्टुं प्रयुक्तानां लौकिकवाक्यानां प्रथमवाक्यस्य टेः प्लुतः ।	केवललौकिकम्	न व्याख्यातम्	नित्यम्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२३	प्रतिश्रवणे च ।	८।२।९९	अङ्गीकारे, प्रतिज्ञायां, श्रवणाभिमुख्ये च गम्यमाने वाक्यस्य टेः प्लुतः ।	उभयम्	न व्याख्यातम्	नित्यम्
२४	अनुदात्तं प्रश्नान्ताभिपूजितयोः ।	८।२।१००	प्रश्ने प्रयुक्तवाक्यान्त्यपदस्य टेः अभिपूजनार्थकवाक्यस्य च टेः प्लुतः ।	उभयम्	न व्याख्यातम्	नित्यम्
२५	चिदिति चोपमार्थे प्रयुज्यमाने ।	८।२।१०१	उपमार्थे चिदिति प्रयुज्यमाने सति वाक्यस्य टेः अनुदात्तः प्लुतः ।	उभयम्	न व्याख्यातम्	नित्यम्
२६	उपरिस्विदासीदिति च ।	८।२।१०२	"उपरिस्विदासीत्" इति वाक्यस्य टेः अनुदात्तः प्लुतः ।	उभयम्	न व्याख्यातम्	नित्यम्
२७	स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सनेषु । (१) असूयादिषु वावचनम् ।	८।२।१०३	वाक्यारम्भे विद्यमानस्यामन्त्रितस्य टेः स्वरितः प्लुतो भवति आम्रेडिते परे असूयायां, संमतौ, कोपे, कुत्सने चार्थे गम्यमाने ।	उभयम्	व्याख्यातम्	नित्यम्
२८	क्षियाशीः प्रैषेषु तिङाकाङ्क्षम् ।	८।२।१०४	साकांक्षस्य तिङन्तस्य टेः स्वरितः प्लुतः आचारोल्लंघनेष्टाशंसनप्रेरणासु ।	उभयम्	न व्याख्यातम्	नित्यम्
२९	अनन्त्यस्यापि प्रश्नाख्यानयोः	८।२।१०५	प्रश्नोत्तरयोः अन्त्यस्यानन्त्यस्यापि पदस्य टेः प्लुतः स्वरितः ।	उभयम्	न व्याख्यातम्	नित्यम्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सूत्रक्रमाङ्कः	३२ प्लुतसम्बन्धिसूत्राणि, तत्सूत्रस्थानि ४१ वार्तिकानि च	अध्यायपादसूत्राङ्काः	प्लुतविषयसम्बन्धः सूत्रार्थः	सूत्रं केवलवैदिकम् केवललौकिकम् लौकिकं वैदिकं चेत्युभयम् वा	भाष्यकृता व्याख्यातं न वा	नित्यं वैकल्पिकं वा
३०	प्लुतावैच इदुतौ । (१) ऐचोरुभयवृद्धिप्रसङ्गादिदुतोः प्लुतवचनम् (२) तत्रायथेष्टप्रसङ्गः (३) सिद्धं त्विदुतोर्दीर्घवचनात्	८।२।१०६	दूराद्धूतेच" इत्यादिशास्त्रविहितः प्लुतः ऐ औ इत्यनयोः स्थाने प्रसक्तश्चेत्, सः ऐ औ इति संध्यक्षरावयवयोः इकारोकारयोः स्थाने भवति ।	उभयम्	व्याख्यातम्	नित्यम्
३१	एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ । (१) एचः प्लुतविकारे पदान्तग्रहणम् (२) विषयपरिगणनं च (३) आमन्त्रिते छन्दस्युपसंख्यानम्	८।२।१०७	अप्रगृह्यसंज्ञकस्य "दूराद्धूते च" इत्येतद्भिन्नशास्त्रविहितस्य प्लुतस्य विषये ए ऐ ओ औ इत्येषां पूर्वार्धभागस्य प्लुतः अकारः भवति उत्तरार्धस्य इकारोकारौ स्तः ।	उभयम्	व्याख्यातम्	नित्यम्
३२	तयोर्य्वावचि संहितायाम्	८।२।१०८	प्लुतसंनियोगविहितेकारोकारयोः यकारवकारौ स्तः स्वरे परे, संहितायाम् ।	उभयम्	व्याख्यातम्	नित्यम्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ कोऽयं प्लुतो नाम, यस्य वैदिकलौकिकसंस्कृतभाषायां प्रसिद्धाः समस्तप्रकाराः— चतुस्सहस्रदेशीयेषु अष्टाध्यायीसूत्रेषु द्वात्रिंशता सूत्रैः आचार्येण पाणिनिना, द्विचत्वारिंशता वार्तिकैः आचार्येण कात्यायनेन, परश्शतेषु स्थानेषु विस्तृतव्याख्यानोदाहरणैश्च आचार्येण पतञ्जलिना सूक्ष्मतमेक्षिकया विशदीकृताः। काऽस्य व्युत्पत्तिः? कथमस्योच्चारणम्? किंप्रकारकं चास्य लेखनम्? सूत्रवार्तिकभाष्यानुसारं क्व क्व अस्य प्लुतस्य विशिष्टं विधानम्? कानि कानि चास्य प्रतिनिध्युदाहरणानि? विध्युदाहरणादिभिः केषां केषां वैदिकसामाजिकव्यावहारिकपरम्पराणां ततः स्फुटं दर्शनम्? अन्ततो गत्वा कथं वास्य समस्तप्लुतप्रकरणस्य सार्वजनीनं वैकल्पिकत्वं साधितम्? कथं वैतत् प्लुतप्रकरणं पाणिनिपूर्वपरकाले "संस्कृतभाषा सर्वजनव्यवहारभाषा अभूदिति प्रमाणीकरोति" इति सर्वं ससंक्षेपमत्र विवेचनीयम्।

भ्वादिगणे (च्युङ्, ज्युङ्, प्रुङ्) प्लु(ङ्) गतौ इति निर्दिष्टात् आत्मनेपदिनः प्लुधातोः क्तप्रत्यये निष्पन्नः प्लुतशब्दः त्रिमात्रकालेन उच्चार्यमाणं वर्णं बोधयति। इयं प्लुतसंज्ञा "ऊकालोऽज्झ्रस्वदीर्घप्लुतः" इति पाणिनिसूत्रेण विधीयते— उ ३ इत्यस्य त्रिमात्रकालवत् यस्य यस्य स्वरस्योच्चारणे त्रिमात्रः कालः अपेक्ष्यते स स स्वरः प्लुतसंज्ञको भवति इति सूत्रांशार्थः। एकमात्रादिकालस्तु चाषादिखगशब्दैः ज्ञातव्य इति पाणिनीयशिक्षायामुक्तम्—

चाषस्तुवदते मात्राम्, द्विमात्रं त्वेव वायसः।
शिखीरौति त्रिमात्रन्तु, नकुलस्त्वर्धमात्रिकम् ।।४५।।

अत्र चाषः = नीलकण्ठ, वायसः = कौआ, शिखी = मोर, नकुलः = नेवला इति क्रमशः हिन्दीभाषायामर्थः। प्लुतस्य त्रिमात्रत्वं प्राचीनकारिकायामेवं प्रतिपादितम्—

एकमात्रो भवेद्ह्रस्वो, द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो, व्यञ्जनं त्वर्धमात्रिकम् ।।

तदेवेदं हैमकोशेऽपि—प्लुतमश्वस्य गतौ, प्लुतस्त्रिमात्रके इति उक्तम्। एवञ्च अकारः प्लुतो भवति इत्यादेः—अकारः प्लवते = वृद्धिं गच्छति (काशिका ८।२।१०६) प्लुतिं लभते, तस्य त्रिमात्रकालेनोच्चारणं भवति इत्याद्यर्थः। ह्रस्वाकारापेक्षया त्रिगुणितकालेन प्लुताकारस्योच्चारणं कर्तव्यम् इति तस्य निर्गलितोऽर्थः।

अ इ उ ऋ ऌ ए ओ ऐ औ इति नवसु स्वरवर्णेषु केचन ह्रस्वाः सन्ति यथा-अइउऋऌ इति, एते दीर्घाः विद्यन्ते—अ इ उ ऋ ए ओ ऐ औ इति, परं प्लुताः सर्वे एव स्वरा भवन्ति। "त्रिषष्टिः चतुःषष्टिर्वा वर्णाः" इत्यारभ्य पाणिनीयशिक्षायां वर्णाः त्रिषष्टिः (६३) इति मते यद्यपि ऌकारस्य प्लुतत्वं नाङ्गीक्रियते तथापि उपसंहारे तत्रैव "ऌकारः प्लुत एव च" (पा. शि. ५) इत्युक्तवता शिक्षाकृता ऌकारस्यापि प्लुतत्वं स्वीकृत्य वर्णानां चतुष्षष्टित्वम् (६४) सिद्धान्तितम्। अत एव महाभाष्ये द्वितीयाह्निके "ऋऌक्" इति माहेश्वरसूत्रव्याख्यानावसरे "क्ऌ३प्तशिख" इति ऌकारप्लुतस्योदाहरणं सङ्गच्छते।

यवान् लुनीहि ३ सक्तूंश्च पिब, कटं कुरु ३ ग्रामं च गच्छ इत्यादौ इकारादिवर्णेषु प्लुतस्योच्चारणं "हि", "रु" इत्यत्र आदौ द्विमात्रिकं ध्वनिं ही, रू कृत्वा ततः त्रिमात्रिकं सर्वत्र एकरूपमेव क्रियते। हे ३ राम इत्यादौ दीर्घात् परस्य प्लुतस्योच्चारणं समं भवेदेवेति सुस्फुटम्। परं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ह्रस्वाकारात्परस्य प्लुतस्योच्चारणे अस्ति खलु विभिन्ना परम्परा। कृष्ण ३ इति ह्रस्वाकारप्लुतस्य उच्चारणम् इकारादिवत् "कृष्णा" इति द्विमात्रिकम् आकारात्मकध्वनिमादौ कृत्वा ततः—त्रिमात्रिकं कुर्वन्ति केचित्। अपरे पुनः कृष्ण इति अकारात्मकध्वनौ एव त्रिमात्रकालं प्लुतमुच्चारयन्ति, न तत्र आकारात्मकध्वनेरावश्यकतां मन्वते। अस्य भेदस्येदं दृश्यते कारणम्—अकारस्य मात्राद्वयेनोच्चारणे—आइत्युच्चारणं भवति, मात्रात्रयेण पुनरुच्चारणे यथा आकारध्वनेरेव विलम्बेनोच्चारणं कर्तुं शक्यते, तथैव अकारध्वनेरपि आइति अकृत्वैव त्रिमात्रिकमुच्चारणं कर्तुं पार्यते। इकारादिषु पुनः नेयं द्विविधा व्यवस्था संभवति। इकारस्य मात्राद्वयेनोच्चारणे ई इति ध्वनिर्भवति, मात्रात्रयेणोच्चारणेऽपि लुनीहि ३ इत्यादौ दीर्घैकारध्वनिरेव त्रिमात्रः सम्पद्यते। न हि अकारवत् तत्र ह्रस्वेकारध्वनेः दीर्घेकारध्वनिमनाश्रित्यैव त्रिमात्रिकमुच्चारणं कर्तुं शक्यते। अत एव अकारप्लुतस्योच्चारणे उपर्युल्लिखितं परम्पराद्वयं समुद्भूतम्, न तत् पुनस्तथा इकारादौ, असम्भवात्।

इदमत्रावधेयम्—"क्व १ वोश्वाः" इति ह्रस्वस्वरितोदाहरणे, उदात्ते ओकारे परतः "क्व" इत्यकारस्वरितस्थानुदात्तभागस्य स्पष्टश्रवणार्थं किंचिद्विलम्बेनोच्चारणसमये ऋग्वेदाध्यायिनो वैदिकाः क्व इत्यकारम् आकारात्मकमेव पठन्ति। महाराष्ट्रभाषायाम् रामा ३ कृष्णा ३ इति सम्बोधने अकारप्लुते आकारात्मकता दृश्यते। इत्थञ्च इदं द्विविधमप्युच्चारणं सत्सम्प्रदायानुसार्येवेति मन्ये। अतः कृष्ण ३ इत्यत्र कृष्णा ३ इति कृष्ण ३ इत्युभयविधमुच्चारणं साध्वेव।

लेखने अस्ति ह्रस्वः अकारः—अ इति, दीर्घश्च आकारः आ इति आकारभेदः अकारे आकारे च। एवमेव इ ई, उ ऊ इत्यादावपि ह्रस्वस्य दीर्घस्य च आकृतिविशेषो दृश्यते। प्लुतवर्णस्य तु ह्रस्वदीर्घाणामिव स्वरूपं स्वतन्त्रं न विद्यते लेखने। अतः ह्रस्ववर्णात् दीर्घवर्णाद् वा अग्रे त्र्यङ्कचिह्नेनैव लेखनं क्रियते प्लुतस्य पारम्परिकम्। यथा–दे३वदत्त, देवद३त्त देवदत्त३ इति। अतः केषुचित् पुस्तकेषु देवदत्ता३, भोः आयुष्मानेधि स्थाली३न् इति ह्रस्वाकारेकारादिप्लुतलेखनावसरे अकारादीन् दीर्घान् लिखित्वा ततः परं त्र्यङ्कचिह्नेन कृतं लेखनम् अयुक्तमेव। दीर्घे सत्येव दीर्घात् परं त्र्यङ्कचिह्नस्यौचित्यात्। देवदत्त३ इति स्थले "देवदत्ता३ इति" इति लेखने दीर्घात् परः प्लुत इति भ्रमोत्पादकत्वाच्च। इत्थञ्च देवदत्ता३ इत्युच्चारणे साधुनि सत्यपि तथा लेखनं भ्रमजनकत्वात्सर्वथा हेयमेवेतिज्ञेयम्।

प्राग्दर्शितात् "प्लुतसूत्रसूचीपत्रकात्" आद्यस्य संज्ञासूत्रस्य व्याख्यानं पूर्वमेव सम्पन्नम्। ततः परं चत्वारि सूत्राणि सन्धिकार्यसम्बद्धानि इति अनन्तरं व्याख्यास्यन्ते। आदौ षष्ठसूत्राङ्कात् प्लुतविधायकसूत्राणां प्रदर्श्यते संक्षिप्तः परिचयः।

संज्ञा, च परिभाषा, च विधिर्नियम, एव च।
अतिदेशो, ऽधिकार,श्च षड्विधं सूत्रमुच्यते॥

इत्यभियुक्तोक्त्यनुसारं (१) संज्ञा (२) परिभाषा (३) विधिः (४) नियमः (५) अतिदेशः (६) अधिकारश्च इति षड्विधानि भवन्ति पाणिनेः सूत्राणि। सर्वस्यास्य प्लुतप्रकरणस्यास्ति पदचतुष्टयात्मकमधिकारसूत्रम्—"वाक्यस्य, टेः, प्लुत, उदात्तः" इति। लाघवप्रियेण पाणिनिना—यानि पदानि अग्रेतनबहुसूत्रेषु अपेक्षितानि तान्येकीकृत्य प्रणीयते एकं सूत्रम् अधिकारनामकम्। अधिकारसूत्रं कियत्सूत्रावधि गच्छति इति बोधार्थम् अद्य प्रायेण व्याख्यानमेव शरणम्। कदाचित् सूत्रे एव मर्यादानिर्देशोऽपि दृश्यते—यथा "प्राक् कडारात् समासः" इत्यादौ। अधिकृतपदात्मकानि प्रायोऽधिकारसूत्राणि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वतन्त्राण्येव भवन्ति। परं कुत्रचित् सम्पूर्णसूत्रस्थमेकमपि पदं भवति अधिकृतम्, यथा—"तयोर्य्वावचि संहितायाम्" इति सूत्रे केवलमेकमेव पदमधिकृतम्, यद् अष्टमाध्यायसमाप्ति यावत् गच्छति। प्रकृते वाक्यस्य, टेः, प्लुतः, उदात्तः इति चत्वारि पदानि "तयोर्य्वावचि संहितायाम्" इति पादस्यान्तिमसूत्रं यावत् सर्वत्र आवश्यकतानुसारं सम्बध्नन्ति।

ततः "प्रत्यभिवादेऽशूद्रे" इति सूत्रम्। गुर्वादिवन्दनानन्तरम् अभिवादयमानं शिष्यादिकं प्रति गुरुर्यदा मङ्गलात्मकमाशीर्वचनादिवाक्यं प्रयुङ्क्ते तत्र अन्त्यस्य स्वरस्य प्लुतविधायकम् इदं सूत्रम्। देवदत्तो नाम छात्रः गुरोः समीपमागत्य स्वनामग्रहणपूर्वकं वन्दते "अभिवादये देवदत्तोऽहम् इति। तस्य तदभिवादनवाक्यं श्रुत्वा गुरुः आशीर्वचनवाक्यं वदति "आयुष्मान् भव देवदत्त३" इति। अत्र वाक्यान्त्यस्य अकारस्य उच्चारणं प्लुतेनैव कर्तव्यम्, न केवलं देवदत्त इति ह्रस्वाकारस्वरूपम्। परम् अभिवादनकर्ता यदि शूद्रो भवति तदा आशीर्वादवाक्ये प्लुतो न कर्तव्यः इत्यस्ति "अशूद्रे" इत्यस्यार्थः। तेन तुषजको नाम शूद्रः यदा अभिवादयते, तदा तत्र प्रयुक्ते प्रत्यभिवादवाक्ये न भवति प्लुतः, यथा—कुशल्यसि तुषजक इति। नात्र भवति-–तुजषक ३ इति।

सूत्रकारादनन्तरं वार्तिककृता स्त्रीणां कृते प्रयुक्ते आशीर्वचनवाक्ये प्लुतो निषिद्धः। तेन "अभिवादये गार्ग्यहम्" इति गार्ग्याः वन्दनानन्तरं प्लुतहीनम् "आयुष्मतीभव गार्गि" इत्येवाभिवादवाक्यं प्रयुज्यते। न तत्र गार्गि३ इति प्लुतो भवति। एवमेव भोः शब्दस्य, क्षत्रियवैश्यवाचकनाम्नोश्च अन्त्यस्वरस्य विकल्पेन प्लुतो विहितो वार्तिककृता। यथा—आयुष्मानेधि देवदत्त भोः (भो३ः) आयुष्मानेधीन्द्रवर्मन् (वर्म३न्), आयुष्मानेधीन्द्रपालित (पालित३) इत्यत्र उभयविधमपि रूपं प्रयोक्तुं शक्यते।

दूराद्धूतेच, हैहेप्रयोगे.., गुरोरनृतो...इति सूत्रत्रयं दूरस्थं कंचन उद्दिश्य प्रयुक्ते वाक्ये प्लुतं करोति। यथा—सक्तून् पिब देवदत्त ३ इत्यत्र दूरस्थं सम्बोधयितुं प्रयुक्ते वाक्ये प्लुतः। वाक्ये है, हे इति सम्बोधनद्योतकयोः शब्दयोः प्रयोगे तयोः अन्ते अविद्यमानत्वेऽपि प्लुतो भवति—हे३ राम, राम है३। गुरोरनृतो...इति सूत्रेण देवदत्तशब्दे "दे, द" इति द्वयोः गुरुवर्णयोः अनन्त्ययोरपि, तथा अन्त्यस्य "त्त" इत्यस्य प्लुतः विधीयते। दे३वदत्त, देवद३त्त, देवदत्त३ इति पर्यायेण प्लुतः। अनृतः इति कथनात् कृष्ण३ इत्यत्र ऋकारस्य गुरुत्वेऽपि न प्लुतः। अनृतः नाम ऋकारभिन्नस्य इत्यर्थः।

"ओमभ्यादाने" इति सूत्रेण प्रारम्भद्योतकस्य ओङ्काररूपेण प्रसिद्धस्य ओम् इत्यस्य प्लुतो भवति। यया—ओ३म् अग्निमीळे। अयं च प्लुतः शुद्धप्रणवजपेऽपि भवति इति केचित्।

ततः "ये यज्ञकर्मणि" इत्यतः "अग्नीत्प्रेषणे परस्यच" इति सूत्रं यावत् पञ्च सूत्राणि यज्ञकर्मविषयकाणि (१) ये३ यजामहे (२) जिन्वतो३म् (जिन्वति इतीकारस्य स्थाने त्रिमात्रः ओकारः ओङ्कारो वा आदेशः) (३) हव्यवाहा३म् (४) ब्रू३हि, प्रे३ष्य, श्रौ३षट्, वौ३षट्, आ३वह (५) ओ३ श्रा३ वय इत्युदाहरणेषु यज्ञकर्मप्रयुक्तमन्त्रब्राह्मणादिवाक्यस्वरूपेषु क्रमेण प्लुतो भवति। "विचार्यमाणानाम्" इति सूत्रेण दीक्षितस्य गृहे होतव्यं नवा होतव्यमिति विचार्यमाणार्थविषयके वैदिके होतव्यं दीक्षितस्य गृहे इतिवाक्ये अन्त्यस्य प्लुते, ८।२।१०७ क्रमाङ्कवता सूत्रेण 'ए' इत्यत्र पूर्वस्य "अ" इत्यस्य प्लुतः अकारः उत्तरार्धस्य चेकारस्ततः गृह३ इ इति रूपं सिद्ध्यति। वेदवाक्येषु एव "विचार्यमाणानाम्" इति प्रवर्तते।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

"विभाषापृष्टप्रतिवचने हेः" इति सूत्रेण अकार्षीः कटं देवदत्त ? इति प्रश्नस्योत्तरे अकार्षं हि३ इत्यत्र "हि" इत्यस्य विकल्पेन प्लुतः । 'निगृह्यानुयोगे च' इति सूत्रेण अद्यामावास्येत्यात्थ३ इत्यत्र प्लुतः । अत्र अद्य अमावस्या इति प्रतिपादयन्तं वादिनं उपपत्तिभिः (निगृह्य) स्वमतात्प्रच्याव्य साभ्यसूयं तस्यैवमतस्य उल्लेखार्थं तदुच्चारितशब्दैरेव (आज अमावास्या है कहता है नहीं !) यदा उच्यते अद्यामावास्येत्यात्थ तदा तत्र प्लुतः । 'आम्रेडितं भर्त्सने' इति सूत्रेण भर्त्सने = संतर्जने (डांट, फटकार) प्रयुक्तस्य दस्यो३ दस्यो३, चौर३ चौर३ इत्यत्र द्वयोरपि प्लुतः । "अङ्गयुक्तं तिङाकाङ्क्षम्" इति सूत्रेण "अङ्ग कूज३ इदानीं ज्ञास्यसि जाल्म" इति वाक्ये क्रोधवाचकेन अङ्गशब्देन युक्तम्, अन्यस्मिन् अर्थे साकाङ्क्षं तिङन्तं कूज इति प्लुतयुक्तं भवति । "पूर्वं तु भाषायाम्" इति सूत्रेण अहिर्नु३ रज्जुर्नु३ इति विचार्यमाणार्थकवाक्ये अन्त्यस्य (वितर्कार्थकनुशब्दस्य) लौकिकभाषायां द्वित्वम् । अत्र पूर्वत्वं प्रयोगापेक्षया ज्ञातव्यम् । "प्रतिश्रवणेच" इति सूत्रेण (१) स्वीकारे (गां मे देहि भोः इति कस्यचित् प्रार्थनायाम्) हन्त ! ते ददामि३ (२) प्रतिज्ञायाम्—नित्यः शब्दो भवितुमर्हति३ (३) श्रोतुं सम्मुखीभवने–दत्त ! किमात्थ३ इति प्रतिश्रवणस्य त्रिषु अर्थेषु गम्यमानेषु प्लुतः । "अनुदात्तं प्रश्नान्ताभिपूजितयोः, उपरिस्विदासीदिति च" इति सूत्राभ्यां विशेषतो वेदसम्बन्ध्यनुदात्तत्वमात्रं विधीयते प्लुतस्तु दूराध्दूतेच इत्यादिभिरेव सिद्धः । प्रश्नान्ते प्रयुक्तवाक्ये-(अगमः पूर्वान् ग्रामान्) अग्नि भूत३ इ, अभिपूजने–शोभनः खल्वसि माणवक३ इत्यत्र आद्येन विधिः । द्वितीयेन–उपरिस्विदासी३त् इत्यत्र विधिः । "चिदितिचोप..." इति सूत्रेण अनुदात्तः प्लुतो विधीयते अग्निचिद्भाया३त् इत्यत्र । चिदिति उपमावाचकमव्ययम् । "स्वरितमाम्रेडिते..." इति स्वरितः प्लुतो भवति आम्रेडिते परे असूयायाम्–माणवक३ माणवक, संमतौ–अभिरूपक३ अभिरूपक, कोपे–अविनीतक३ अविनीतक, कुत्सने शाक्तीक ३ शाक्तीक इत्यादौ । "क्षियाशीः..." इति आचारोल्लङ्घने–स्वयं रथेन याति३ उपाध्यायं पदातिं गमयति, इष्टाशंसने–पुत्रांश्च लप्सीष्ट३ धनं च तात, प्रेरणायाम्—कटं कुरु३ ग्रामं गच्छ इत्यादौ साकाङ्क्षस्य तिङन्तस्य प्लुतविधायकम् सूत्रम् । "अनन्त्यस्यापि..." इति सूत्रेण प्रश्ने, उत्तरे चार्थे गम्यमाने, अगम३ः पूर्वा३न् ग्रामा३न् अग्नि भूत३ इ, अगम३म् पूर्वा३म् ग्रामा३न् भो३ः इत्युदाहरणयोः सर्वपदानां प्लुतो भवति । "प्लुतावैच इदुतौ" इति सूत्रेण ऐ३तिकायन, औ३पगव इत्यादौ ऐ औ इत्यनयोः प्लुतप्रसङ्गे तदुत्तरावयवयोः इकारोकारयोः प्लुतः । तेन पूर्वभागस्य अकारस्य एका मात्रा, उत्तरभागस्य प्लुते सति त्रिमात्रता इति चतुर्मात्रता अत्र सम्पद्यते । "तयोर्य्वावचि संहितायाम्" इति सूत्रेण–अग्ने + आशा, पटो + आशा इत्यत्र एचोऽप्रगृह्यस्य इति पूर्वार्द्धस्य प्लुते अकारे, उत्तरार्धस्यच इकारोकारयोः सतोः, तत्संनियोगेन–अग्न३ इ आशा इत्यत्र इकारस्य यकारः, पट३उ आशा इत्यत्र उकारस्य वकारश्च आदेशो भवति ।

षष्ठाध्यायस्थ संन्धिसूत्राणां चतुर्णामयमर्थः—(१) "अतोरोः ...." इति सूत्रेण—एहि सुस्रोत ३ + अत्र स्नाहि, तिष्ठतु पय + अ३ग्निदत्त इत्यत्र प्लुतात् परस्य, प्लुते परेच रुत्वरेफस्य उत्वं व्यावर्त्यते, अप्लुतात्, अप्लुतेच इति ग्रहणात् । (२) "प्लुतप्रगृह्या ...." इति सूत्रेण "एहि कृष्ण ३ + अत्र गौश्चरति" इत्यत्र अचि परतः सवर्णदीर्घसन्धिः निषिध्यते । (३) "अप्लुतवदुपस्थिते" इति सूत्रेण सुश्लोक ३ + इति इति स्थिते विद्यमानस्यापि प्लुतस्य अप्लुतवद्भावारोपे अप्लुतकार्यं गुणादिकं भवति । तेन सुश्लोकेति इति रूपं सिद्ध्यति अवैदिके इति शब्दे परे । उपस्थितः=अवैदिकः इति शब्दः । (४) "ई ३ चाक्रवर्मणस्य" इति सूत्रेण चाक्रवर्मणस्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मते ई ३ प्लुतः अप्लुतवत् क्रियते। तेन "चिनुहि ३ इति" इत्यत्र अचि परतः सवर्णदीर्घसन्धौ "चिनुहीति" इति रूपं सिद्ध्यति। समाप्तमत्र प्लुतप्रकरणस्थसूत्रव्याख्यानं सोदाहरणम्।

गता सा अष्टाध्यायी-महाभाष्य-काशिकाध्ययनपरम्परा, यदनुसारं समस्तसूत्राणाम् अध्ययनम् एकदैवाभूत्। अधुना वैयाकरणसिद्धान्तकौमुद्यनुसारिणी सुकरा व्याकरणाध्ययनपरम्परा प्रचलति, यस्यां संज्ञापरिभाषासन्ध्यजन्तपुंल्लिङ्गादि-प्रकरणेषु प्रसङ्गानुसारं भवति सूत्राणामध्ययनम्। महावैयाकरणैः भट्टोजिदीक्षितैः सिद्धान्तकौमुद्याः लौकिके प्रकरणे "ऊकालोऽज्झ्रस्व . . . . ." इत्यतः "गुरोरनृतो . . . ." इत्यन्तान्येव सूत्राणि व्याख्यातानि, अन्यानि च सूत्राणि वैदिकप्रकरणे निरूपितानि। अत्राहुः सूक्ष्मदृशो महावैय्याकरणाः नागेशभट्टाः—यद्यपीह प्लुतप्रकरणे बहूनि सूत्राणि लोकवेदसाधारणानि, तथापि तस्य वैकल्पिकत्वेन लोके तदादराभावाद्वेदे च तदादराद् वैदिक्यामेव लिखितानीति ध्येयम् (वैदिकीशेखरे)। तेन समस्तप्लुतप्रकरणे भगवता पाणिनिना निर्दिष्टानाम् संस्कृतभाषायाः प्लुतविषये तदानींतने काले रूढानां समस्तसूक्ष्मभाषणनियमानामध्ययनम् महता कष्टेनैव लौकिकप्रकरणमप्यभ्यस्यतां छात्राणां नैव भवितुमर्हति। समस्तप्लुतप्रकरणाध्ययनादनन्तरं सिंहावलोकनन्यायेनैव एते निष्कर्षाः दृष्टिपथमागच्छन्ति।

(१) प्रत्यक्षप्लुतविधायकसूत्रेषु केवलं त्रीण्येव सूत्राणि वैकल्पिकानि, अन्यानि सर्वाणि सूत्राणि नित्यानि।

(२) नित्यत्वेन प्लुतविधायकानां सूत्राणामुदाहरणेषु प्रयोगकरणमनिवार्यमस्ति। वैकल्पिकेषु विधिप्रवृत्त्यप्रवृत्ती यथेष्टं भवतः।

(३) यज्ञकर्मणि प्लुतविधायकानां प्रायेण सर्वसूत्राणां प्रत्यक्षविधिप्रवृत्तिश्रवणम् अद्यापि (हन्त! केषुचिदेव स्थलेषु) जीवतामग्निहोत्रिणां गृहेषु साधारणेष्टिकालेऽपि कर्तुं शक्येत।

(i) याज्यामन्त्राः समाख्यातप्रकरणे "याज्यानुवाक्याकांड" संज्ञया प्रसिद्धाः सन्ति। एते सर्वे ऋग्वेदादेव गृहीताः। आश्वलायनगृह्यसूत्रे, अन्यश्रौतसूत्रेषु च हौत्रकाण्डे एतेषां निर्देशोस्ति।

(ii) अग्नीध् अथवा आग्नीध्रः अथर्ववेदऋत्विग् उच्यते।

(iii) यजुर्वेदऋत्विग् अध्वर्युः ऋग्वेदऋत्विजं होतारं याज्यापुरोनुवाक्यामन्त्रान् पठितुं प्रेरयति। इयमेव प्रेरणा प्रैष इत्युच्यते। होता प्रेषणं श्रुत्वा, याज्यापुरोनुवाक्यामन्त्रान् पठति अन्ते च वौषडिति वषट्कारं ब्रूते। तच्छ्रवणे एव अध्वर्युः स्वाहाशब्दमुच्चार्य आहुतिं जुहोति। अस्मिन् यज्ञकर्मणि उदात्तस्वरेण कृतस्य प्लुतस्योच्चारणं स्वयमेव प्रत्यक्षीकरणीयम्, येनोदात्तादिप्लुतस्य अनादिपरम्परया अविच्छिन्नस्वरूपेण च प्रचलितं स्वरूपं स्फुटं भविष्यति।

(iv) "अनुदात्तं प्रश्नान्ता . . . ., उपरिस्विदासीदिति च" इत्यत्र अनुदात्तस्वरेण तथा "स्वरितमाम्रेडिते . . . . ." इत्यत्र स्वरितस्वरेण च उच्चारणं प्लुतस्य विधीयते, अतः न तत्र उदात्तोच्चारणं भवति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(४) इदमत्रावधेयम्—"अग्निमीळे" इत्यादौ अधोरेखाङ्कितस्य "अ" इत्यनुदात्तस्य, उर्ध्वरेखाङ्कितस्य "ई" इति स्वरितस्य चोच्चारणं विशिष्टाघातेन (Accent) विधीयते। रेखारहितयोः "ग्नि", "ळे" इति उदात्तपदयोः उच्चारणम् निराघातमेव क्रियते। इयमुच्चारणप्रक्रिया वैदिकमन्त्राद्युच्चारणे एव दृश्यते। भाषायाम् पुनः त्रयाणामपि स्वराणां नियमाः अधुना निरर्थका एव।

(४) दूरतः आह्वाने प्रयुक्तस्य वाक्यस्य अन्त्यस्वरे प्लुतविधिः आवश्यक एवासीत्।

(५) ओङ्कारस्य वेदाध्ययनारम्भे सप्लुतमेवोच्चारणं विहितम्।

(६) प्रश्नोत्तरभर्त्सनामर्षविचारासूयादिषु गम्यमानेषु प्लुतेन भाषणमावश्यकमासीत्, येन तत्तद्भावप्रदर्शनमपि साधुतममजायत। पूर्वप्रसङ्गेषु, भर्त्सने, निगृह्यानुयोगे, प्रत्यभिवादने च प्लुतपद्धतिः अद्यापि प्रायेण सर्वासु भाषासु दृश्यते इति न तिरोहितं साधारणदृशामपीति विस्तरं नापेक्षे।

(७) प्लुते विहिते तत्र सन्धिकार्ये प्लुतस्य श्रवणं न स्यात् इति निषिद्धं प्लुते सन्धिकार्यम्।

(८) सूत्रकारसमये शूद्रं परित्यज्य सर्वत्र प्रत्यभिवादने प्लुतकरणमावश्यकमासीत्। वार्तिककार-भाष्यकारसमये स्त्रीणां कृतेऽपि प्रयुक्ते प्रत्यभिवादवाक्ये प्लुतो निषिद्धः। क्षत्रियवैश्ययोः प्रत्यभिवादने च विकल्पो जातः। एतेन स्फुटं ज्ञायते—स्त्रियः क्षत्रियवैश्याश्च क्रमेण संस्कृतव्यवहारात् कथं प्रच्युता इति।

पाणिनिकाले प्लुतप्रकरणस्य कुत्र नित्यत्वं कुत्र वा वैकल्पिकत्वमासीत् इति पूर्वमेव प्रदर्शितम्। अधुना ततः उत्तरकाले कथं सर्वस्यैव प्लुतस्य वैकल्पिकत्वं विहितमिति विचार्यते।

यद्यपि पाणिनिकाले अभूत् प्लुतस्य तादृशी स्थितिः यादृशी आचार्येणाष्टाध्याय्यां लिखिता। परं प्रतिक्षणं भाषणे एतेषां सर्वेषां विधीनां नियमेन पालनं नाम अतीव दुष्करमित्यनुभूतम् उत्तरवर्तिभिरनुभावकैः। भाष्यकृता "अग्नीत्प्रेषणे परस्य च" इति सूत्रव्याख्यानावसरे सूत्रोक्तादन्यत्र "उद्धर३ उद्धर, आहर३ आहर" इत्यादौ प्लुतसिद्ध्यर्थं "बहुलमन्यत्रेति वक्तव्यम्" इति वचनं कृतम्। ततः अग्रेतनसूत्रात् अस्मिन् सूत्रे विभाषापदमनुकृष्य विभाषा इत्यस्य व्यवस्थितविभाषामाश्रित्य, उद्धर३ उद्धर इत्यादौ सिद्धे प्लुते "बहुलमन्यत्रेति वक्तव्यम्" इति वचनं न कर्तव्यमिति सिद्धान्तितम्।

एतत् व्याख्यानं च "अपर आह—" सर्व एव प्लुतः साहसमनिच्छता विभाषा वक्तव्यः" इति वचनेन उपसंहृतम्। (इस सम्बन्ध में दूसरे मान्य अभियुक्त का कहना है कि—इस प्लुतप्रकरण में किसी भी सूत्रद्वारा विहित प्लुत (साहसमनिच्छता) सोचसमझकर बोलनेवाले व्यक्ति को भी विकल्पसे करना चाहिये।)

वैयाकरणोऽपि विहितस्य प्लुतस्य अकरणे, प्रत्यवायान्न बिभीयात् इत्यर्थः। सर्वस्यैव प्लुतस्य वैकल्पिकत्वेन, प्लुतशास्त्रे विशेषश्रद्धां विहायापि यथेष्टं प्रयोक्तव्यमिति यावत्। इत्थं च सर्वप्लुत-प्रकरणस्य वैकल्पिकत्वविधायकम् अपरस्य वाक्यं भाष्यकृता दोषदर्शनादिकमकृत्वैव स्वीकृतत्वात्, तदनुयायिभिः अस्माभिरपि प्लुतकरणे नाग्रहः कर्तव्यः। काशिकाकृता एष एवार्थः उपर्युक्तपङ्क्ति-मुद्धृत्य "अग्नीत् प्रेषणे" ८।२।९२ इति सूत्रे प्रदर्शितः। सिद्धान्तकौमुद्याम् महावैयाकरणैः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीभट्टोजिदीक्षितैः "गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्" ८।२।८६ इति सूत्रे—प्राचाम् इति योगं विभज्य, सर्वः प्लुतः प्राचां मते भवति, अर्थाद् अन्येषां मते न भवति प्लुतः इति विकल्पः साधितः सर्वस्य प्लुतस्य।

एतस्य प्लुतप्रकरणस्य वैकल्पिकत्वादेव—

यं प्रव्रजन्तमनुपेतमपेतकृत्यम्
द्वैपायनो विरहकातर आजुहाव।
"पुत्रेति" तन्मयतया तरवोऽभिनेदुः
तं सर्वभूतहृदयं मुनिमानतोऽस्मि ।।

इति भागवतोक्तिरपि सङ्गच्छते। अन्यथा दूरादाह्वाने, "पुत्र ३ इति" इत्यत्र "दूराद्धूते च" इति नित्ये प्लुते कृते "प्लुतप्रगृह्या" इति नित्ये प्रकृतिभावे पुत्रेति इति "आद्गुण" इति गुणसन्ध्यकरणमनिवार्यमेव स्यादिति।

संस्कृतभाषा पाणिनिकाले जनभाषा आसीत्, साहित्यभाषा वा केवलम् इति विचिकित्सन्ति केचन। भारतीयपरम्परानुसारं दिव्येयं वाक् सर्वजनभारती एव आसीत्। परं जनानां सर्वकालानुभूतया अशक्त्या इयं जनवाणी पालिप्राकृतापभ्रंशादिभिः संकीर्णा अजायत। तदुक्तम्—"दैवी वाग् व्यवकीर्णेयमशक्तैरभिधातृभिः।" इति महावैय्याकरणतल्लजैः श्रीभर्तृहरिभिः वाक्यपदीये (ब्रह्मकाण्डे १५५ श्लोके)। गोल्डस्टूकर, कीथ, लीबिश्, आदि पाश्चात्याः संस्कृतमहापण्डिता अपि संस्कृतभाषायाः शिष्टसमाजव्यवहारभाषात्वमेव निश्चिन्वन्ति। कीथमहाभागः स्फुटमेव प्रतिपादयति यद् "भाषायां सदवसश्रुवः" (३।२।१०८) "पूर्वे तु भाषायाम्" (३।२।९८) इति सूत्रयोः पाणिनिः स्वयमेव छन्दोभाषातः भिन्नायाः अस्याः जनभाषायाः कृते भाषाशब्देन व्यवहारं कुर्वन्, अस्याः भाषणभाषात्वं निर्दिशति" इति।

प्लुतप्रकरणे प्रायेण सर्वाण्येव सूत्राणि प्रतिदिनं व्यवहारेषु रूढां भाषणपद्धतिं ध्यायं ध्यायं पाणिनिना विरचितानि। यदि पुनः, संस्कृतम् तदा जनभाषा नाभविष्यत् तदा प्रायेण एतानि सूत्राणि वैयर्थ्यमेव अलप्स्यन्त।

भाषैवहि मानवस्य सर्वान् भावान् प्रदर्शयति। भाषायां प्रसिद्धान् व्यवहारान्, जनरूढाः कथाश्च गृहीत्वा साहित्यकाराः रचयन्ति साहित्यम्। व्याकरणं पुनः जनव्यवहारे साहित्ये च बद्धमूलां भाषां गृहीत्वा साधुत्वासाधुत्वव्यवस्थां करोति। पाणिनिना साधारणजनव्यवहारे साहित्ये च दृढबद्धमूलायाः संस्कृतवाण्याः महतः शब्दौघान्, वाक्यशैलीः, शब्दाभिव्यक्तान् अर्थांश्च संध्याय प्रणीतं व्याकरणशास्त्रम्। अतः तत्र प्रदर्शिताः विषयाः पाणिनेः काले सर्वजनरूढाः नाभूवन् इति कथनमुपहासमेव जनयेत्। एतत्सूत्रं संस्मृत्यैव प्रमन्थनीयोयं पाणिनिव्याकरणमहोदधिः।

यदि कश्चिद् दूरस्थं पुरुषमाह्वयति, किञ्चित् संबोधयितुं च आकाङ्क्षति, तदा स्वभावत एव आहूयमानो दूरप्रदेशस्थितः शृणुयादिति अधिकप्रयत्नेन शब्दमुच्चारयति। अयमेव दूराद्धूते चेति प्लुतः। एतदेव प्रतिदिनं तदानींतनभाषायाम् दृश्यमानं स्वरूपं पाणिनिना सूत्ररूपेण स्थापितम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रत्यभिवादनविषये मनुना उक्तम्ः—

"यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम्।
नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः ॥ (मनुमृतिः २।१२६)

(जो ब्राह्मण अभिवादनके पश्चात् प्रत्यभिवादन देना जानता नहीं है उसके प्रति विद्वान् व्यक्ति अभिवादनके समय शूद्रके समान व्यवहार करे। नामगोत्र का उच्चारण कर "अभिवादये देवदत्तोऽहम्" ऐसा न कहकर "अभिवादयेऽहम्" इतने ही साधारण शब्द कहे।) एतेन सिद्धम् प्राचीनकाले प्रत्यभिवादरीतिज्ञानम् अत्यावश्यकमासीद् इति। जनाः संस्कृतभाषायामेव च तत्सर्वम् अकुर्वन्। तदेव पाणिनिना सूत्रितम्। किंच शूद्राः स्त्रियश्च संस्कृते अभिवादनं बाढमजानन् संस्कृते एव अकुर्वन् च। यथा 'गार्ग्यहं भोः', 'अभिवादये-गार्ग्यहम्' इति भाष्यकाशिकादिषु स्त्रियाः वाक्यं संस्कृते एव प्रदत्तम्। परं प्रत्यभिवादने कृतस्य प्लुतस्य ज्ञानं स्त्रीणां शूद्राणां च नाभूत् यथावत्, अतः तत्र प्रत्यभिवादने प्लुतो न कर्तव्यः इति मर्यादा आसीत्। एतेन इत्थम् अनुमातुं शक्यते–यत् शूद्राणां, स्त्रीणां च संस्कृतभाषणे अभूत् अस्खलिता गतिः, परं प्लुतनियमज्ञानं पाणिनिकाले केवलं शूद्राणां, वार्तिक-भाष्यकारसमये च स्त्रीणामपि किञ्चित् कठिनमेवाभूत्।

प्रत्यभिवादनप्लुतविषये स्मर्तव्यमेतत्सर्वदा-यत् अभिवादनकर्ता प्रत्यभिवादनप्लुतं न जानाति अतएव तत्र प्लुतो न कर्तव्य इति मर्यादा सर्वत्रास्ति प्राचीनशास्त्रेषु। तदुक्तम् महाभाष्यकृता—पस्पशाह्निके व्याकरणाध्ययनप्रयोजनकथनावसरे—

अविद्वांसःप्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः।
कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत् ॥ इति।

एवमेव प्राक्संकेतितं भर्त्सनकुत्सनसंमत्यादिषु गम्यमानेषु शब्दवाक्ययोः प्रयुक्तं प्लुतं, विशेषतः उदात्तानुदात्तस्वरितविधानं च दृष्ट्वा एतत्सर्वं भाषणभाषायामेव सम्भवेत् इत्यत्र न संशय-लेशोऽपीत्यलं पल्लवितेन।

व्याख्याता प्लुतगत्यात्र पाणिनिप्लुतपद्धतिः।
प्रेरको लेखकोऽध्येता सुखी भूयात् प्रकाशकः ॥

इति शम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धातु और आख्यात

श्री. रामनन्दन ओझा

भारतवर्ष की प्राचीन संस्कृति की निधि जिस भाषा में सुरक्षित है, वह है संस्कृत भाषा,— जो अनादिकाल से सर्व प्राणियों को एक सूत्र में बांधनेवाली, सर्वे च सुखिनः सन्तु, सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःखमाप्नुयात् ।। का-सन्देश विश्व के आपाभरतक अबाध गति से भेजने वाली है। आज कल के विद्वानों का यह मत है कि संस्कृत भाषा से ही प्रायः सभी भारतीय भाषाएं अनुप्राणित हैं। वेदों की रचना काल से लेकर आज तक जो संस्कृत का उज्जवल स्वरूप है उसका कारण उस समय के महर्षियों की महती साधना ही कही जा सकती है। इसकी व्यापकता के कारण शब्दों में जो अधिकतर परिवर्तन हुए उसमें कुछ दिनों बाद इसके दो स्वरूप दिखाई देने लगे और तब इस भाषा के प्राचीन और नवीन संस्कृत के रूप में वैदिक तथा लौकिक ये दो भेद कर दिये गये। यह भाषा जितनी समृद्ध है उतनी ही सर्वांगपूर्ण भी है। इसमें साहित्य की रचना के साथ साथ अनेक व्याकरण ग्रन्थों की भी रचना की गई है जो भाषा का एक स्वरूप बनाये रखने में सहायक सिद्ध हुए हैं। उन वैय्याकरणों में महर्षि पाणिनि का स्थान सबसे ऊंचा है। यद्यपि महर्षि पाणिनि के पहले के विद्वानों ने भी संस्कृत भाषा को संयत करने का प्रयास किया था किन्तु महर्षि पाणिनि का प्रयास सर्वांगसफल हुआ। उनके व्याकरण की सर्वांगीणता तथा दोनों प्रकार की संस्कृत की नियमितता के कारण ही लोक में पुराने वैयाकरणों के प्रयास लुप्तप्राय हो गए। उनसे कुछ नवीन वैय्याकरणों ने भी उनके यश को मन्द करने का प्रयास किया है किन्तु वे, दिन में दीपक के समान, टिम-टिमाकर रह गये हैं। आज कल का संस्कृत समाज इस भाषा के अध्ययन के लिए केवल पाणिनीय व्याकरण को ही उपयुक्त समझता है जिसपर महर्षि कात्यायन के वार्तिक और महर्षि पतञ्जलि का महाभाष्य उसकी शोभा को और बढा दिये हैं। महर्षि पाणिनि का एक ही ग्रन्थ, "अष्टाध्यायी" उनकी यशः-पताका को फहराने का सुदृढ आधारस्तम्भ है। उन्होंने अपनी अनुपम कृति "अष्टाध्यायी" के अन्तर्गत सभी मानवीय तत्त्वों के विकास का साधन भर दिया है। विशुद्ध वैयाकरण होते हुए भी शब्द ब्रह्म के विवर्त रूप इस अर्थात्मक जगत् की सृष्टि, सत्ता, वृद्धि, स्थिति, ह्रास, नाश इत्यादि काल्पनिक प्रक्रियाओं को दिखलाकर "जन्माद्यस्य यतः" इत्यादि दार्शनिक दृष्टिकोण का भलीभांति निर्देश किया है। साथ ही जगत् के उन सभी मायिक व्यवहारों का स्पष्ट रूप से वर्णन किया है जिसे उन्होंने संधि, विग्रह, व्यास, (वाक्य) समास आदि नाम दिये हैं। सभी दार्शनिकों ने एकमत से स्वीकार किया है कि संसार में मेल, झगड़े, विस्तार और पुनः संक्षेप ये सब क्रियायें मायिक हैं। कोई आचार्य जगत् को ब्रह्म का परिणाम और कोई विवर्त मानते हैं। महर्षि पाणिनि ने भी विवर्तवाद को ही स्वीकार किया है। शब्द ब्रह्म नित्य है, अनादि है, व्यापक है, निर्लेप है, यह बात—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

"सर्वे सर्वपदादेशा, दाक्षीपुत्रस्य पाणिनेः।
एकदेशविकारे हि, नित्यत्वं नोपपद्यते ॥
अर्थवदधातुरप्रत्ययः प्रातिपदिकम्।
यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम् ॥

इत्यादि अनेक वाक्यों से स्पष्ट होती है। तभी तो दार्शनिकशिरोमणि वैयाकरण—मूर्धन्य श्री भर्तृहरि ने ब्रह्मकाण्ड के मंगल श्लोक में स्पष्ट घोषणा की है किः—

अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम्।
विवर्ततेऽर्थ भावेन प्रक्रिया जगतो यतः ॥

इत्यादि।

निरुक्तकार महर्षि यास्क ने भी "व्याप्तिमत्वात्तु शब्दस्य" इससे उपर्युक्त सिद्धांत ही व्यक्त किया है। महर्षि पाणिनि का दार्शनिक दृष्टिकोण एक बहुत बड़े महत्व का विषय है किन्तु यहां पर इससे अधिक उस विषय की चर्चा करने का अवसर इस लिये नहीं है कि प्रस्तुत निबंध उसी महर्षि की रचित अष्टाध्यायी की संज्ञाओं पर विचार करने के लिये आयासित है। यद्यपि कुछ संज्ञाओं के ऊपर कुछ विद्वानों ने थोड़ा बहुत विचार किया है फिर भी हम एक अलग दृष्टिकोण विद्वज्जन के सम्मुख उपस्थित करने की चेष्टा करेंगे।

इसमें यह ध्यान में रखकर कि महर्षि की ये संज्ञायें आधुनिक हैं या प्राचीन काल से संबंधित हैं, प्राचीन वैयाकरणों ने भी इसका प्रयोग किया है या उनकी अपनी हैं, यदि किया भी है तो महर्षि पाणिनि ने उसे क्यों अपनाया, संज्ञायें केवल कार्यनिर्वाहक हैं या उनका और भी कोई आर्थिक महत्व है, प्राचीन विद्वानों ने उसी पदार्थ (संज्ञी) के लिये कुछ दूसरी संज्ञायें मानी हैं तो महर्षि पाणिनि को मानने में अड़चन क्या थी, उनकी संज्ञाओं का कुछ वर्गीकरण भी हो सक्ता है क्या—इत्यादि सब बातों का स्पष्ट करने का यथाशक्य प्रयास किया जायेगा।

सर्वप्रथम महर्षि पाणिनि की उन संज्ञाओं में से केवल धातु और आख्यात संज्ञा पर विचार किया गया है। किन्तु इसके पूर्व उन संज्ञाओं का वर्गीकरण आवश्यक है।

महर्षि पाणिनि की सभी संज्ञायें निम्न प्रकार से दो वर्गों में विभक्त की जा सक्ती हैं।

(१) अन्वर्थ और (२) कार्यनिर्वाहक

(१) **अन्वर्थः**-वे संज्ञायें जो पदार्थ (संज्ञी) के साथ अर्थतः या लौकिक व्यवहार को लेकर रखी गई हैं जैसे प्रातिपदिक, तद्धित, समास, कारक, अधिकरण, आत्मनेपद, परस्मैपद इत्यादि।

(२) **कार्यनिर्वाहकः**-वे संज्ञायें जिनका स्वतः कुछ अर्थ नहीं होता किन्तु उच्चारण सौकर्य के लिये, या प्रदेश सम्बन्धी ज्ञान की गुरुता के भय से, केवल विधिसूत्रों के कार्य संचालन में सहायक बनती हैं—जैसेः-टि, घु, घ, भ, इत्यादि।

इसके अतिरिक्त पाणिनि की ये संज्ञाएं ऋग्वेद के व्याकरण ऋक्प्रातिशाख्य इत्यादि में उसी रूप में मिलती हैं, जिस रूप में अष्टाध्यायी में वर्णित हैं। किन्तु कुछ ऐसी भी हैं जो महर्षि पाणिनि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

की अपनी हैं और उनमें उनका भिन्न दृष्टिकोण है, ये सब बातें उदाहरण सहित न लिखकर तत्तत् संज्ञाओं के विवेचन के साथ ही दर्शाई जायेंगी।

जिन संज्ञाओं को हम अन्वर्थ मानते हैं उनका एक नाम और है जिसे महासंज्ञा कहकर व्याख्याकारों ने प्रयोग किया है और उनका मत है कि महासंज्ञा करना अन्वर्थ संज्ञा का सूचक है। किन्तु श्री भट्टोजि दीक्षित, श्री नागेशभट्ट, इत्यादि आधुनिक विद्वानों ने महाभाष्य के पर्यालोचन से यह निकाला है कि बहुतसी ऐसी संज्ञायें हैं जो महासंज्ञा होते हुए भी अन्वर्थ नहीं मानी जातीं, यह बात संप्रदान संज्ञासूत्र की व्याख्या में आए हुए—

" भाष्यकारस्तु नान्वर्थतायामाग्रहः खण्डिकोपाध्यायः शिष्याय चपेटां ददाति इति सिद्धयति "

वाक्य से स्पष्ट होती है।

तथा अर्थवत् सूत्र की व्याख्या के अवसर पर शब्दकौस्तुभ में श्री भट्टोजि दीक्षित भी " महासंज्ञाकरणम् प्राचामनुरोधेन ", लिखकर यह स्वीकार करते हैं कि सभी महासंज्ञायें अन्वर्थ नहीं होतीं, जब कि इन्हीं लोगों ने जगह जगह पर यह भी कहा है कि " महासंज्ञाकरणादन्वर्थलाभः " उदाहरणार्थ शब्दकौस्तुभ में " प्रथमा निर्दिष्टं समास उपसर्जनम् , " इस सूत्र की व्याख्या में श्री भट्टोजि दीक्षित लिखते हैं कि—" महासंज्ञाकरणमन्वर्थसंज्ञार्थम्। लोकेहि अप्रधानमुपसर्जनमाहुः " ॥ इत्यादि। अतः ये सब बातें भी तत्तत् संज्ञाओं के विवेचन में हीं लिखूंगा। किन्तु देखने से यह स्पष्ट है कि आवश्यकतानुसार ही इन महासंज्ञाओं को अन्वर्थ माना गया है और जहां कहीं आवश्यकता नहीं है वहां विना महासंज्ञा के भी लघु (कार्यनिर्वाहक) संज्ञाओं से कार्य चल सकता है, ऐसा उन लोगों ने माना है। मेरा प्रयास सभी महासंज्ञाओं को अन्वर्थ संज्ञा सिद्ध करने के दृष्टिकोण से है क्योंकि यदि महर्षि पाणिनि को अन्वर्थता से तात्पर्य न होता तो-टि, घु, भ, आदि संज्ञाओं के समान ही कोई कार्यनिर्वाहक संज्ञा रखते।

महर्षि पाणिनि ने प्राचीन वैयाकरणों की संज्ञाओं को भी अपने अष्टाध्यायी में स्थान दिया है किन्तु सबके लिये अपनी संज्ञा का रूप न देने पर भी कार्य में उपयोग किया है। यह एक उनका नया ढंग है। उदाहरण के लिये प्राचीनों की प्रथमा द्वितीया तृतीया आदि संज्ञायें अष्टाध्यायी में नहीं है किन्तु उनका कार्य में उपयोग उन्होंने किया है जैसे—" प्रथमायाश्च द्विवचने भाषायाम् ", " प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा "। " कर्मणि द्वितीया, " इत्यादि। इसीलिये श्री. भट्टोजी दीक्षित इत्यादि ने स्पष्ट लिखा है कि—

" प्रथमादयः प्राचां संज्ञास्ताभिरिहापि व्यवहारः। आङिति टासंज्ञा प्राचाम्।" इत्यादि।

ऊपर मैंने जिन अन्वर्थ संज्ञाओं की चर्चा की है उनमें से ये दो संज्ञायें धातु और आख्यात हैं जिनपर कुछ विचार करने का प्रयास किया जा रहा है।

मैं यह स्पष्ट कर देना चाहता हूं कि मैंने धातु और आख्यात इन दो संज्ञाओं को एक साथ विचारार्थ क्यों स्वीकृत किया है। मैं पहले प्रश्न उपस्थित कर चुका हूं कि एकही अर्थ के लिये प्राचीन वैयाकरणों की और महर्षि पाणिनि की संज्ञाओं में भिन्नता क्यों हैं? इस बात को स्पष्ट करने

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

के लिये ही इन दोनों को एक साथ लिया है। क्योंकि पाणिनीय-व्याकरण के अतिरिक्त ये संज्ञायें एक ही अर्थ (संज्ञी) के लिये दूसरे व्याकरण तंत्रों में प्रयुक्त हुई हैं।

धातु और आख्यात शब्दों की व्युत्पत्तियों के बारेमें इतनाही कहना पर्याप्त है कि धारण-पोषणार्थक डुधाञ् धातुसे–"सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्" इस उणादि सूत्र से तुन् प्रत्यय के करने के बाद धातु शब्द निष्पन्न हुआ है। और तुन् प्रत्यय कर्त्ता में हुआ है, यथा–दधाति इति धातुः। आङ् उपसर्गविशिष्ट चक्षिङ् व्यक्तायां वाचि इस धातु से कर्म में या अविवक्षित-कर्मस्थल पर भाव में क्त प्रत्यय करने के बाद आख्यात शब्द निष्पन्न हुआ है यथा–आख्यायते यत् इति अथवा आख्यानम् इति आख्यातम्।

महर्षि पाणिनि ने अष्टाध्यायी में धातु शब्द भ्वादिगणपठित क्रियावाचियों के लिये कार्य-निर्वाहार्थ व्यवहृत किया है, जिसका–"भूवादयोधातवः" यह सूत्र प्रमाण है। यह संज्ञा उनकी अन्वर्थ है या कार्यनिर्वाहक–यह आगे स्पष्ट किया जायेगा। किन्तु अष्टाध्यायी इत्यादि के पर्यालोचन से कार्यनिर्वाहक मानने में कोई अड़चन इस लिये नहीं जान पड़ती कि अन्वर्थ संज्ञाओं का भी तो कार्यनिर्वहन करना ही मुख्य तात्पर्य रहता है।

आख्यात नाम की महर्षि ने अपनी कोई संज्ञा स्वतंत्र नहीं रखी है। किन्तु तत्पुरुष समास के "मयूरव्यंसकादयश्च" इस सूत्र के मयूरव्यंसकादि गण के "आख्यातमाख्यातेन क्रिया-सातत्ये" इस गणसूत्र में कार्यान्वित किया है और उसका अर्थ तिङन्त माना है। अब यह बात स्पष्ट है कि धातु और आख्यात का अर्थ एक नहीं हो सकता क्योंकि व्युत्पत्ति और प्रयोगस्थल दोनों के भिन्न भिन्न हैं।

अब हम इन दोनों शब्दों को अलग अलग प्राचीन प्रयोग प्रदेशों से विचार करेंगे कि सर्वप्रथम इन शब्दों का प्रयोग कहां पर हुआ है, इनका अवान्तर प्रयोग किस किस रूप में प्रवाहित होकर किस किस अर्थ में बदल गया तथा उनके सभी प्रयोग स्थलों में समन्वितार्थ एक ही है या भिन्नभिन्न।

सर्वप्रथम संस्कृतवाङ्मय का सबसे पुराना ग्रन्थ ऋग्वेद के मंडल पांच सूक्त ४४ के–अन्त्यं हविः सचते सच्च धातु चाऽरिष्टगातुः सहोता सहोभरिः।·········इत्यादि इस तीसरे मंत्र में धातुशब्द नपुंसक लिंग में प्रथमान्त प्रयोग हुआ है और इसका अर्थ श्री सायणाचार्य ने अपने भाष्य में "धातु धारकम्" इस प्रकार धारणकारक माना है। मंडल १ सूक्त १६० के–

एवा महस्तुविजातस्तुविष्मान् बृहस्पतिर्वृषभो धायि देवः।
स नः स्तुतो वीरवद् धातु गोमत्·········। इत्यादि

इस आठवें मंत्र में धातुशब्द का प्रयोग करोति के अर्थ में हुआ है यह भी श्री सायणाचार्य का ही मत है। मंडल १० सूक्त ११ और ५६ के क्रमशः

रपद्गन्धर्वीरप्या . . . . इष्टस्यमध्येऽदितिर्निधातु . . . इत्यादि
तनुष्टे वाजिन् तन्वं नयन्ती वाममस्मभ्यं धातु शर्मतुभ्यम्॥ . . . इत्यादि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दूसरे मंत्र में भी धातुशब्द का प्रयोग मिलता है और श्री सायणाचार्य ने इसका स्थापन करना अर्थ स्वीकार किया है। प्रायः सभी भाष्यकार इससे सहमत हैं। वेद भाष्यकारों में श्री सायणाचार्य अधिक प्रमाणित माने जाते हैं इसीलिए मैंने उनका नाम लिया है।

अब थोड़ा विचार करने पर आता है कि धातु शब्द कर्ताकारक के रूप में केवल एक स्थान पर ही प्रयुक्त हुआ है जिसका अर्थ "धारक" बतलाया गया है। शेष प्रयोग क्रिया परक हैं किन्तु क्रिया परक होते हुए भी "धा" यह प्रकृति सब की एक है अतः धातु शब्द का धारण करने वाला, कारक, या स्थापन करने वाला" भी अर्थ है और समन्वय की दृष्टि से इन तीनों अर्थों में कोई भेद नहीं दिखाई पड़ता। अब आगे चलकर देखना है कि, प्रवाहित धातु शब्द ऋग्वेद के बाद के वाङ्मय में किस रूप में ग्रहण किया गया और उत्तरोत्तर महर्षि पाणिनि के काल तक उसके अर्थ में भिन्नता आई या नहीं? यदि भिन्नता आई भी हो तो पूर्वार्थ से उसका समन्वय हो सकता है या नहीं।

ऋग्वेद का ५ मंडलीय धातु शब्द जगत्-धारकत्वेन ब्रह्म परक है। अतः वह कारक और स्थापक भी उपाधि भेद से हो सकता है। इस दृष्टि से ऋग्वेदीय प्रयोग आपस में समन्वितार्थ हो सकते हैं।

स्वस्तिन इन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्व वेदाः स्वस्तिन–
स्ताक्ष्यो‌ऽरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥

इस मंत्र में प्रयुक्त 'दधातु' इस क्रिया का अर्थ प्रसादीकरोतु है। यह काश्यप क्षितीशचन्द्र का मत है। किन्तु उस क्रिया का भी अन्तिम निष्कर्ष निकाला जाय तो पूर्वार्थ से भलीभांति उसका समन्वय हो सकता है। और इससे श्री काश्यप महोदय के अर्थ से कोई वैमत्य न होगा यह मेरा मत है।

इसके अतिरिक्त धातु शब्द अथर्व संहिता के काण्ड १८ सूक्त १ मंत्र १९ और काण्ड २० सूक्त १२ मंत्र ६ में नपुंसक लिंग में ही प्रयुक्त दिखाई देता है जैसे क्रमशः

"इष्टस्य मध्येऽदितिर्धातु नो भ्राता.............।

सनस्तुतो वीरवद्धातु गोमद्...............। इत्यादि।

किन्तु इसी संहिता काण्ड ३-२ सूक्त ३६ मंत्र २ में वही धातुशब्द पुल्लिंग में प्रयुक्त दिखाई देता है। आधुनिक विद्वानों ने इस संहिता की रचना का काल अपने आनुमानिक साक्ष्य के आधार पर ऋक्संहिता से दो हजार वर्ष बाद माना है। जो भी हो हम इतना मानते हैं कि धातु शब्द धारण करने वाले के अर्थ में नपुंसक लिंग में प्रयुक्तु होकर अथर्व संहिता काल में लिंग परिवर्तन कर दिया और पुल्लिंग में प्रयुक्त होने लगा। इसके बाद दोनों लिंगों में प्रयुक्त होने पर भी अर्थ में कोई विशेष अन्तर नहीं आया।

उपनिषदों तथा ब्राह्मण ग्रन्थों में भी कई स्थानों पर धातु शब्द का प्रयोग उपर्युक्त दोनों लिंगों में होता आया है और अर्थ भी प्रायः मिलते जुलते हैं। जैसे गोपथ ब्राह्मण पूर्व भाग के २७ वें पाठ में "धात्वर्थवचनं शैक्ष्यम्" ऐसा लिखा है। इसके अतिरिक्त भी शतपथ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

'ब्राह्मण, आर्षेय ब्राह्मण, जाबालोपनिषद्, छान्दोग्योपनिषद्, नारदपरिव्राजेकोपनिषद्, याज्ञवल्क्योपनिषद्, वराहोपनिषद्, प्रणवोपनिषद्, इत्यादि अनेक ग्रन्थों में इसका अनेक बार प्रयोग हुआ है। महाभारत और पुराणों में धातु शब्द का प्रयोग प्रायः आयुर्वेद और दर्शनशास्त्र से मिलते जुलते अर्थ में ही हुआ है। भविष्यत् पुराण में एक स्थानपर महर्षि पाणिनि और धातुपाठ की चर्चा मात्र की गई है।

इत्युक्त्वाऽन्तर्दधे रुद्रः पाणिनिः स्वगृहं ययौ।
सूत्रपाठं धातुपाठं गणपाठं तथैव च ।।
लिङ्गसूत्रं तथा कृत्वा परं निर्वाणमाप्तवान् ।।

अब हम अनेक प्रयोग स्थलों से विचार करें कि धातु शब्द लौकिक क्षेत्र में किस प्रकार प्रयुक्त है। कोषकारों में प्राचीन कोषकार श्री अमरसिंहने—

श्लेष्मादि रसरक्तादि महाभूतानि तद्गुणाः।
इन्द्रियाण्यश्मविकृतिः शब्दयोनिषु धातवः ।। (नानावर्थवर्ग,)

इस प्रकार अर्थ दिये है

इसके अतिरिक्त शेष कोषकारों ने धातुशब्द का वाच्य निम्न प्रकार से माना है।

धातुर्नेन्द्रियेषु च, शब्द-योनि-महाभूत-तद्गुणेषु रसादिषु
मनःशिलादौ श्लेष्मादौ विशेषाद्गैरिकेऽस्थिन च (मेदिनी)

अयं (धातुः) पुल्लिगे कोशेषु नियम्यतेऽधोङ्कितेष्वर्थेषु (शब्दार्थचिन्तामणि)

क्रियावाचित्वमाख्यातुं प्रसिद्धोर्थः प्रदर्शितः।
प्रयोगतोऽन्ये मन्तव्या अनेकार्था हि धातवः ।।

आकाशादिमहाभूतेषु, शब्दाद्याकाशादिगुणेषु, रसादिषु।
रसासृङ्मान्समेऽदोस्थिमज्जाशुक्राणि धातवः, इत्युक्तेषु
गैरिकमनःशिलाद्यश्मकविकारे। श्लेष्मादौ इति
तेधातवोपि विद्वद्भिर्गदिता देहधारणात्।

इत्यादि कोष के भी साक्ष्य से धारकत्व शक्ति प्रधानन ही धातु शब्द है यह सिद्ध हो रहा है क्योंकि जिस जिस वाच्यार्थ में धातु शब्द को संयत किया है वे सभी धारण करने वाले ही पदार्थ हैं और इस प्रकार उनके लिए धातु शब्द का पर्याय होना स्वाभाविक है।

दर्शनिकों ने धातु शब्द का प्रयोग पृथिव्यादि के लिए किया है यह दृष्टिकोण खासकर बौद्धदर्शन में इदं प्रत्यय फलम्, सूत्र के प्रसंग में भली भांति वर्णित है। आयुर्वेद दर्शन तथा रसेश्वर दर्शन में धातु शब्द सुवर्ण, पारद, अभ्रक आदि के लिए पुल्लिग में प्रयुक्त है इसके अतिरिक्त धातुः जीवनाधारकत्वेन सर्वोत्कृष्टः शरीरस्य द्रव्यविशेषः" किसी आयुर्वेद के टीकाकार नें लिखा है इस से पता चलता है कि शरीर धारक शुक्र के लिए भी इसका प्रयोग प्रचलित है। कोष मे भी "रसासृङ्मान्स..मज्जा शुक्राणि, धातवः इस श्लोक में शुक्र के लिए धातु का प्रयोग मिलता है। अब आप हमारी पूर्व कल्पना के अनुसार विचार करें तो इन स्थलों पर भी धारकत्वशक्ति प्रधान ही धातु

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शब्द का प्रयोग है यह सिद्ध होगा। दार्शनिकोंने पृथिव्यादि को और वैद्याचार्यों ने सभी रसों को जीवन का धारक ही माना है। यह बात—

विसर्गदानविक्षेपैःसोमसूर्यानिला यथा।
धारयन्ति जगद्देहं कफपित्तानिलास्तथा॥
सुवर्णरूप्यताम्राणि, हरितालं मनःशिला।
गैरिकाञ्जनकासीससीसलोहाः सहिङ्गुलाः॥
गन्धकोऽभ्रकमित्याद्या धातवो गिरिसम्भवाः।

सुश्रुत के इस पद्य से स्पष्ट हो जाती है। और भी अनेक स्थानों पर आयुर्वेद बतलाता है कि :—

वलीपलितखालित्यकार्श्यावल्यजराभयात्।
निवार्य देहं दधति नृणां तद्धातवो मताः॥
शरीरदूषणाद्दोषा मलिनीकरणान्मलाः।
धारणाद्धातवस्तेस्युर्वातपित्तकफास्त्रयः॥
हेमातारारनागाश्च ताम्ररङ्गे च तीक्ष्णकम्।
कांस्यकं कान्तलौहश्च, धातवो नव कीर्तिताः॥
हिरण्यं रजतं कास्यं ताम्रं सीसकमेव च।
रंगमायसरौप्यं च धातवोऽष्टौ प्रकीर्तिताः॥

इत्यादि।

धीयते—आत्मनि सर्वं निक्षिप्यते सुप्त्यादौअनेन इति व्युत्पत्तिः। यह भी वाक्य आयुर्वेद के टीकाकारों से मिलता है और इस व्युत्पत्ति के स्वारस्य को देखा जाय तो वह भी धारकत्वशक्ति प्रधान ही है अन्य नहीं।

जहां तक आख्यात शब्द का प्रश्न है,—मेरे देखने से ऋग्वेद में इस शब्द का किसी भी रूप में प्रयोग नहीं है। यजुःप्रातिशाख्य में श्री कात्यायन ने आख्यात शब्द का प्रयोग क्रिया के अर्थ में अर्थात् तिङन्त के लिए किया है। साथ में भारद्वाज ऋषि के नाम लेने से ऐसा प्रतीत होता है कि यह आख्यात शब्द भारद्वाज-प्रयुक्त हो सकता है जैसा कि (भारद्वाजकमाख्यातम्) इस सूत्र से पता चलता है। जो भी हो इतना अवश्य है कि सर्व प्रथम आख्यात शब्द क्रिया के रूप में प्रयुक्त हुआ। प्रातिशाख्य के बाद के और महर्षि पाणिनि के सामयिक वैयाकरणों ने भी प्रायः क्रिया के ही अर्थ में आख्यात शब्द का प्रयोग किया है। इसका प्रयोगस्थल बाद के संस्कृत-वाङ्मय में विस्तृत है, क्योंकि संज्ञा के अलावा यह शब्द कृदन्तीय क्रिया होने के नाते कथोपकथन में "आख्यातम्–कथितम्–वर्णितम् इत्यादि के रूप में उपनिषदों से लेकर आज तक के वाङ्मय में अधिक पाया जाता है। कोषकारों ने कोषों में आख्यात को तिङन्त के अर्थ में माना है। किन्तु महावैयाकरण निरुक्तकार महर्षि यास्क ने उसका प्रयोग धातु और तिङन्त दोनों के अर्थ में करना प्रारम्भ किया। निरुक्त के प्रथम अध्याय के प्रथम पाद नैघण्टुक काण्ड में—

"तद्यानि एतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति" ऐसा लिखा है। इसके देखने से स्पष्ट हो जाता है कि पद की चार जातियां उन्होंने मानी हैं सुबन्त,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तिङन्त, उपसर्ग, निपात, ये सभी पद हैं और आख्यात शब्द तिङन्त का वाचक है किन्तु आगे चलकर महर्षि यास्क ने निरुक्त प्रथमाध्याय चतुर्थपाद के खण्ड १३ में लिखा है:—

तत्र नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च ।
न सर्वाणीति गार्ग्यः । वैयाकरणानां चैके ॥

